प्रयागः बैजनाथप्रसादगुप्तः

दिनांकः—५-३-६० ई०

(स्वीकृति-सूचनयाऽनुग्राह्यः)

(७) परिषदः सूचना

श्रीमन्तो मान्याः,

सविनयमेतद् निवेद्यते यद् आस्माकीनाया महाविद्यालयीयसंस्कृतपरिषदः साप्ताहिकमधिवेशनम् आगामिनि शुक्रवासरे (दिनांकः—२२-७-६० ई०) सायंकाले चतुर्वादने महाविद्यालयस्य महाकक्षे भविष्यति। सर्वेषामपि विद्यार्थिनामुपाध्यायानां चोपस्थितिः सादरं सविनयं प्रार्थ्यते।

दिनांकः—१८-७-६० ई०

निवेदिका—

(कु०) माया त्रिपाठी (मन्त्रिणी)

(८) प्रस्तावः, अनुमोदनम्, समर्थनं च।

(१) (क) आदरणीयाः सभासदः, प्रिया विद्यार्थिबान्धवाश्च!

'सौभाग्यमेतदस्माकं यदद्य'··(कर्णपुरस्थ डी० ए० वी० कॉलेज-संस्थायाः संस्कृत-विभागस्याध्यक्षवर्याः श्रीमन्तो हरिदत्तशास्त्रिणः, नवतीर्थाः, व्याकरणवेदान्ताचार्याः, एम० ए०, पी-एच० डी० आदि—विविधोपाधिविभूषिताः) अत्र समायाताः सन्ति। अतः प्रस्तौमि यत् श्रीमन्तो मान्या विद्वद्वरेण्या आचार्यवर्या अद्यतन्याः सभाया अस्याः सभापतित्वं स्वीकृत्यास्मान् अनुग्रहीष्यन्तीति। आशासे एतेषां सभापतित्वे सदसोऽस्य सर्वमपि कार्यकलापं सुचारुतया सम्पत्स्यते इति। आशासे अन्येऽपि सभासदः प्रस्तावस्यास्यानुमोदनं समर्थनं च करिष्यन्ति।

(२) (क) मान्याः सभासदः!

अहमेतस्याः सभाया मन्त्रिपदार्थं (सभापतिपदार्थम्, उपसभापतिपदार्थम्, कोषाध्यक्षपदार्थम्) श्रीमतः·····नाम प्रस्तवीमि।

(ख) अहं प्रस्तावस्यास्य हृदयेनानुमोदनं करोमि।

(ग) अहं प्रस्तावस्यास्य हार्दिकं समर्थनं करोमि।

(९) पुरस्कार-वितरणम्

श्रीयुताय··(रामचन्द्रशर्मणे), (एम० ए०) कक्षायाः (द्वितीय)··वर्षस्थाय··(व्याख्यान-प्रतियोगितायां सर्वप्रथमस्थानप्राप्त्यर्थं) निमित्तं·····(प्रथमं) पारितोषिकमिदं सहर्षं प्रदीयते।

······ ······

मन्त्री सभासंचालकः (सभाध्यक्षः, प्रधानः)

(१०) जयन्ती-समारोहः

एतत् संसूचयता मया भूयान् प्रहर्षोऽनुभूयते यदागामिनि शुक्रवासरे गुरुपूर्णिमा-दिवसे (आषाढ-पूर्णिमा वि० २०१७) दिनाङ्के ८-७-६० ईसवीये महाविद्यालयस्य महाकक्षे सायंकाले चतुर्वादने व्यास-जयन्ती-समारोहः संयोजयिष्यते। समेषामपि संस्कृत-ज्ञानां संस्कृतप्रेमिणां च समुपस्थितिः प्रार्थ्यते। आशासे यत् सर्वैरपि यथासमयं समागत्य महाकवये श्रीमते व्यासाय श्रद्धाञ्जलिं समर्प्य, तद्गुणग्रामं समाकर्ण्य, तद्विरचितानि हृद्यानि पद्यानि निशम्य, गूढभावावलिविभूषितां तदीयामाध्यात्मिकविद्यां च श्रावं श्रावं स्वान्तःसुखमनुभविष्यते इति।

दिनाङ्कः ६-७-६० ई०

(कु०) रश्मि-कोचरः
सभा-संयोजिका

(११) दर्शनार्थं समय-याचना

श्रीमन्तो मुख्यमन्त्रिमहोदयाः डा० सम्पूर्णानन्दमहाभागाः,
उत्तर-प्रदेशः, लक्ष्मणपुरम् (लखनऊ)

श्रीमन्तः परमसंमाननीयाः,

अहं कालिदास-जयन्ती-समारोहविषयमाश्रित्यात्रभवद्भिः सह किञ्चिदालपितु-कामोऽस्मि। आशासे भवन्तो दशकलामात्रसमयप्रदानेन मामनुग्रहीष्यन्ति। भवन्निर्दिष्ट-समये भवतां सविधे समागत्य भवद्दर्शनेन भवत्परामर्शेन चात्मानं कृतकृत्यं मंस्ये।

दिनाङ्कः ६-७-६० ई०

भवद्दर्शनाभिलाषी—
प्रेमनाथः

(१२) व्याख्यानम्

श्रीमन्तः परमसंमाननीयाः परिषत्पतयः! आदरणीयाः सभासदश्च!

अद्याहं भवतां समक्षे ··(विद्या, अहिंसा, देश-सेवा, समाज-सुधार-) विषयमङ्गी-कृत्य किंचिद् वक्तुकामोऽस्मि। संस्कृतभाषाभाषणस्यानभ्यासवशाद् न संभाव्यते साधी-यस्या भावाभिव्यक्त्या भाषितुम्। पदे पदे स्खलनमपि च संभाव्यते। 'गच्छतः स्खलनं क्वापि भवत्येव प्रमादतः। हसन्ति दुर्जनास्तत्र समादधति सज्जनाः'। अतः प्रमाद-प्रभूतास्त्रुटयो मे भवद्भिः क्षन्तव्याः परिमार्जनीयाश्च।··(तदनन्तरं व्याख्यानस्य प्रारम्भः)।

(८) निबन्ध-माला

आवश्यक-निर्देश

(१) किसी विषय पर अपने विचारों और भावों को सुन्दर, सुगठित, सुबोध एवं क्रमबद्ध भाषा में लिखने को निबन्ध कहते हैं। निबन्ध के लिए दो बातों की आवश्यकता होती है :—१. निबन्ध की सामग्री। २. निबन्ध की शैली।

निबन्ध की सामग्री एकत्र करने के ३ साधन हैं:—१. निरीक्षण अर्थात् प्रकृति को स्वयं देखना और ज्ञान एकत्र करना। २. अध्ययन अर्थात् पुस्तकों आदि से उस विषय का ज्ञान प्राप्त करना। ३. मनन अर्थात् स्वयं उस विषय पर विचार या चिन्तन करना।

(२) निबन्ध-लेखन में इन बातों का सदा ध्यान रक्खें—(क) **प्रस्तावना या आरम्भ**—प्रारम्भ में विषय का निर्देश, उसका लक्षण आदि रक्खें। (ख) **विवेचन**—बीच में विषय का विस्तृत विवेचन करें। उस वस्तु के लाभ, हानि, गुण, अवगुण, उपयोगिता, अनुपयोगिता आदि का विस्तृत विचार करें। अपने कथन की पुष्टि में सूक्ति, पद्य या श्लोक उद्धरणरूप में दे सकते हैं। (ग) **उपसंहार**—अन्त में अपने कथन का सारांश संक्षेप में दें। प्रस्तावना और उपसंहार एक या दो सन्दर्भ (पैराग्राफ) में ही हों। अधिक स्थान विवेचन में दें।

(३) निबन्ध की शैली के विषय में इन बातों का ध्यान रक्खें :—१. भाषा व्याकरण की दृष्टि से शुद्ध हो। २. भाषा प्रारम्भ से अन्त तक एक-सी हो। ३. भाषा में प्रवाह हो। स्वाभाविकता हो। ४. उपयुक्त और असंदिग्ध शब्दों का प्रयोग करें। ५. भाषा सरल, सरस, सुबोध और आकर्षक हो। ६. लोकोक्ति और अलंकारों को भी स्थान दें। ७. अनावश्यक विस्तार, पुनरुक्ति, अधिक पाण्डित्य-प्रदर्शन तथा क्लिष्टता का त्याग करें।

(४) निबन्ध के मुख्यतया तीन भेद हैं :—

(क) वर्णनात्मक निबन्ध—इसमें पशु, पक्षी, नदी, ग्राम, नगर, पर्वत, समुद्र, ऋतु-वर्णन, यात्रा, पर्व, रेल, तार, विमान आदि का स्पष्ट एवं विस्तृत वर्णन होता है।

(ख) विवरणात्मक निबन्ध—इनमें घटित घटनाओं, युद्धों, प्राचीन कथाओं, ऐतिहासिक वर्णनों, जीवन-चरितों आदि का संग्रह होता है।

(ग) विचारात्मक निबन्ध—इनमें आध्यात्मिक, मनोविज्ञान-सम्बन्धी, सामाजिक, राजनीतिक तथा अमूर्त विषयों चिन्ता, क्रोध, अहिंसा, सत्य, परोपकार आदि का संग्रह होता है। इन निबन्धों में इन विषयों के गुण, दोष, लाभ, हानि आदि का विचार होता है।

उदाहरण के लिए २० निबन्ध अतिप्रसिद्ध विषयों पर प्रौढ़ संस्कृत में दिए गए हैं।

१. वेदानां महत्त्वम्

ज्ञानार्थकाद् विद्धातोर्घञि वेद इति रूपं निष्पद्यते। सत्तार्थकाद् विचारणार्थकात् प्राप्त्यर्थकाद् विद् धातोरपि रूपमेतद् निष्पद्यते। ज्ञानराशिर्वेद इति सुकरं वक्तुम्। किं वेदस्य वेदत्वम्? कति वेदाः? किं तेषां महत्त्वम्? किं तत्र विशिष्टं ज्ञानमित्यादयो बहवोऽनुयोगाः पुरतोऽवतिष्ठन्ते। एतदेवात्र समासत उपस्थाप्यते। वेदा हि विविधज्ञानविज्ञानराशयः, संस्कृतेराधाररूपाः, कर्तव्याकर्तव्यावबोधकाः, शुभाशुभनिदर्शकाः, सत्यतायाः सरणयः, जीवनस्योन्नायकाः, विश्वहितसम्पादकाः, आचारसंचारकाः, सुखशान्तिसाधकाः, ज्ञानालोकप्रसारकाः, कलाकलापप्रेरकाः, नैराश्यनाशकाः, आशाया आश्रयाः, चतुर्वर्गावाप्तिसोपानस्वरूपाश्च। चतुष्टयी वेदानाम् ऋग्यजुःसामाथर्वभेदेन।

वेदानां महत्त्वं, तत्र प्रतिपादितं विशिष्टं ज्ञानं च समासतोऽत्रोपस्थाप्यते। विवृतिस्तु तस्य स्वयमेवाभ्यूह्या। **(१) भाषायाः प्राचीनतमत्वम्**—विश्ववाङ्मये प्राचीनतमा ग्रन्था वेदा इत्यत्र न कस्यापि विपश्चितो विप्रतिपत्तिः। वैदिकसाहित्यस्य प्राचीनतमं रूपमत्रोपलभ्यते। भाषाविज्ञानदृष्ट्या वेदानामतीव महत्त्वम्। वैदिकलौकिकसंस्कृतयोस्तुलनया तुलनात्मकभाषाशास्त्रस्य जनिरभूत्। भाषा कथं परिवर्तते, प्रचलति, प्रसरति चेत्यादिप्रश्नानामुत्तरमिहासाद्यते। **(२) प्रथमा संस्कृतिः**—प्राचीनतमायाः संस्कृतेः स्वरूपमिहोपलभ्यते। काऽऽसीत्तदा समाजदशा? कासीत् जनानामार्थिकी धार्मिकी राजनीतिकी सामाजिकी च स्थितिः? कीदृशमासीत्तेषां जीवनम्? किं क्रियाकलापमन्वतिष्ठन् जना इति सर्वं वेदाध्ययनेन वेत्तुं पार्यते। वैदिकी संस्कृतिः प्रथमा संस्कृतिरासीत् (यजु० ७-१४)। धार्मिककृत्येषु यज्ञस्य विशिष्टं महत्त्वमासीत् (यजु० १-१, १-२, ३-१-३, अथर्व० ७-९७, १९-१)। ऋतस्य सत्यस्य च विश्लेषणम्, ऋतं च सत्यं चा० (ऋग्० १०-१९०-१)। अश्वमेधवाजपेयसौत्रामण्यादियागानां वर्णनम्। धर्माधर्मयोर्विवेचनम्, दृष्ट्वा रूपे व्याकरोत्० (यजु० १९-७७)। **(३) समाजचित्रणम्**—प्राचीनसमाजस्य वास्तविकं चित्रणं वेदेष्वेवोपलभ्यते। यथा—आश्रमादिवर्णनं तत्कर्तव्यविधानं च। अथर्ववेदेऽधस्तनसूक्तेषु एतद्विषयकं विवरणमुपलभ्यते। ब्रह्मचर्यम् (अ० ११-५), मेधा (अ० १९-४०), वाक् (अ० ७-४३), वेदमाता (अ० १९-७१), अतिथिसत्कारः (अ० ९-६), जायाकामना (अ० ६-८२), दम्पतिसुखप्रार्थना (अ० ६-७८), शालानिर्माणम् (अ० ७-६०, ९-३), विवाहः (अ० १४. १-२), व्रात्यवर्णनम् (अ० १५. १-८)। सूर्याविवाहः (ऋग्० १०. ८५-६-१६), मुसलोलूखलवर्णनम् (ऋग्० १-२८-५-८)। यजुर्वेदस्य त्रिंशेऽध्याये विविधानां जातीनां तासां वृत्तीनां च विस्तरशो वर्णनमाप्यते। (यजु० ३०. ५-२२)। **(४) अध्यात्मवर्णनम्**—आत्मस्वरूपादिविचारोऽत्र प्राप्यते। तद्यथा—अध्यात्मम् (अथर्व० ११-८, १३. २-९), आत्मा (अ० ५-९, ७-१, १९-५१), आत्मविद्या (अ० ४-२), ब्रह्म (अ० ७-६६), ब्रह्मविद्या (अ० ४-१, ५-६), विराट् (अ० ८. ९-१०)। **(५) दार्शनिक-विचाराः**—तत्त्वज्ञानमीमांसामाश्रित्य विषयविवेचनम्। तद्यथा—सृष्ट्युत्पत्तिः (ऋग्० १०-१२९-१३०), कालमीमांसा (अ० १९-५३-५४, ऋग्० १-१६४-४८), अमावास्या (अ० ७-७९), पूर्णिमा (अ० ७-८०), रात्रिः (अ० १९-४७), अद्वैतवेदान्तप्रतिपादितो भावः 'सोऽहम्'

इति (यजु० २-२८,४०-१७), वाग्ब्रह्मवर्णनम् (ऋग्० १०·१२५. १-८), श्रद्धा(ऋग्० १०·१५१.१-५)। (६) **राजनीतिः**—राज्ञो वरणं तत्कर्तव्यादिकं चात्र वर्ण्यते। राष्ट्रम् (यजु० ९-२३, १०. २-४), प्रजातन्त्रराज्यम्, महते जान-राज्याय० (यजु० ९-४०), साम्राज्यम् (यजु० १०-२७), राष्ट्रम् (अथर्व० १९-२४), राष्ट्रसभा (अ० ७-१२), राजा राजकृतश्च (अ० ३-५), राज्ञो वरणम् (अ० ६-८७), राज्याभिषेकः (अ० ४-८), प्रजाः (अ० ७-१९), राष्ट्ररक्षा (अ० २-१६, १९-१७), विजयः (अ० ७-५०, १०-५), शत्रुसेनानाशनम् (अ० ७-९०), सपत्ननाशनम् (ऋग्० १०·१६६.१—५), सेनानिरीक्षणम् (अ० ४-३१), सेनासंयोजनम् (अ० ४-३२), आसुरी माया (यजु० ११-६९, १३-४४), कृत्याप्रयोगः (यजु० ५-२३, २५)। (७) **विविधविद्यानिधानत्वम्**—(क) **आयुर्वेदः**—आयुर्वर्धनम् (अ० १९-६३), कुष्ठौषधिः (अ० ६-९५), वाजीकरणम् (अ० ४-४), विषनाशनम् (अ० ४-७), जलचिकित्सा (अ० ६-५७, यजु० ६-२२, ९-६, ११-३८), ज्वरनाशनम् (अ० १-२५, ७-११६), यक्ष्मनाशनम् (अ० १-१२, ३-७)। (ख) **कामशास्त्रम्**—कामः (अ० ९-२,१९-५२), रतिः (ऋग्० १·१७९-१-६)। (ग) **गणितविज्ञानम्**—संख्याः (यजु० १७-२, १८·२४-२५)। (घ) **मनोविज्ञानम्** (यजु० ३४·१-६)। (ङ) **निर्वचनशास्त्रम्**—वृत्रं हनति वृत्रहा० (यजु० ३३-९६)। (८) **कलातत्त्वम्**—सामवेदो गीतात्मकः संगीतस्य च तत्र पूर्वरूपं प्राप्यते। उदात्तादिस्वरत्रयं वेदेषु संगीतमेव द्योतयति। 'नृत्ताय सूतं गीताय शैलूषं० (यजु० ३०-६), महसे वीणावादं' 'पाणिघ्नं तूणवध्मं' 'तलवम् (यजु० ३०-२०) इत्यादिभ्यो नृत्यगीतवाद्यादीनां प्रचारो द्योत्यते। शिल्पवर्णनम्(यजु०४-९)। (९) **आर्थिकी स्थितिः**—कीदृश्यासील्लोकानामार्थिकी स्थितिरित्यपि प्राप्यते। आदान-प्रदानस्य महत्त्वम्, देहि मे ददामि ते० (यजु० ३-५०), अन्नम् (अ० ६-७१, ७-५८), अन्नसमृद्धिः (अ० ६-१४२), वासः (अ० ७-३७), कृषिः (अ० ३-१७; ऋग्०४·५७. १-८), (यजु० ४-१०, १२·६८-७१), वाणिज्यम् (अ० ३-१५), पशवः (अ० २-३४), ऋषभः (अ० ९-४), गौः (ऋग्० ६·२८·१-६, अ० ६-३१), मृत्पात्राणि (यजु० ११-५९)। (१०) **नाट्यशास्त्रम्**—नाट्यशास्त्रस्य मूलं संवाद ऋग्वेदे गीतं सामवेदेऽभिनयो यजुर्वेदे रसा अथर्ववेदे च प्राप्यन्ते। ऋग्वेदे संवादसूक्तानि यथा—यमयमीसूक्तम् (ऋ० १०-१०), पुरूरव-उर्वशीसंवादः (ऋ० १०-९५), सरमा-पणि-संवादः (ऋ० १०-१०८)। (११) **प्रांतद्य-बोधिका सामग्री**—यथा—नदीनामानि (ऋ० ३-३३, १०-७५), अक्षसूक्तम् (ऋ० १०-३४), ग्रावस्तुतिः (ऋ० १०-७६, १०-९४), पशु-पक्षि-नामानि (यजु० २४·२०-४०), जातिनामानि (यजु० ३०·५-२२)। (१२) **काव्यशास्त्रम्**—वेदेष्वनेकेऽलंकाराः छन्दोवर्णनं च प्राप्यते। तद्यथा—अनुप्रासः(ऋ० १० १४५. ३, १०·१५९·५)। उपमाः (ऋ० १०. १०३. १, १०. १८०. २; अथर्व० १.१. ३, १.३.७-९, १.१४.१, १-१४-४, २०.५९. १-२, २०. ९२. ९), छन्दोनामानि (यजु० १-२७; १४-९, १०, १८), पर्यायवाचिनः—दश गोनामानि (यजु० ८-४३), अश्वपर्यायाः (यजु० २२-१९)। एवं ज्ञायते यद् वेदेषु प्राक्कालीनस्थितिपरिज्ञानाय सर्वमावश्यकं वस्तु प्राप्यते। ऐतिहासिकदृष्ट्या वेदानां महत्त्वं सर्वातिशायि वर्तते।

२. वेदाङ्गानि, तेषां वेदार्थबोधोपयोगिता:

वेदार्थावबोधाय तत्स्वराद्यवगमाय तद्विनियोगज्ञानाय चासीद् महत्यावश्यकता केषाञ्चित् सहायकग्रन्थानाम्। एतदभावपूर्तये एव जनिरभवद् वेदाङ्गानाम्। षडिमानि वेदाङ्गानि। १. शिक्षा, २. व्याकरणम्, ३. छन्दः, ४. निरुक्तम्, ५. ज्योतिषम्, ६. कल्पः। तथा चोच्यते—'शिक्षा कल्पो व्याकरणं निरुक्तं छन्दसां चयः। ज्योतिषामयनं चैव वेदाङ्गानि षडेव तु'। षडिमान्यङ्गानि वेदार्थबोधादिविधौ उपकुर्वन्तीति निरूप्यतेऽत्र। षण्णामेतेषां महत्त्वं निरीक्ष्यैव प्रतिपाद्यते पाणिनीयशिक्षायाम्:—"छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते। ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते॥ शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्। तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते"॥ (श्लो० ४१-४२)।

वेदाङ्गानामेतेषां विवरणं तेषां वेदार्थबोधोपयोगिता च समासतोऽत्र प्रस्तूयते। **(१) शिक्षा**—शिक्षाग्रन्था वर्णोच्चारणविधिं विशेषतो वर्णयन्ति। कथं वर्णा उच्चारणीयाः, किं तेषां स्थानम्, कश्च तत्र यत्नः, कण्ठताल्वादीनामुच्चारणे किं महत्त्वम्, कति वर्णाः, कथं कायमारुतो वर्णत्वेन विपरिणमते, कति स्थानानि, कति स्वराः, कथं च ते प्रयोज्या इत्यादयो विषयाः शिक्षाग्रन्थेषु विविच्यन्ते। वर्णोच्चारणादिविधिज्ञानमन्तरेण न शक्यो वेदानां विशुद्धः पाठोऽर्थावगमश्चेति शिक्षाग्रन्थानां विशिष्टं महत्त्वम्। साम्प्रतं केचन शिक्षाग्रन्था उपलभ्यन्ते। तेषां सम्बन्धश्च केनचिद् विशिष्टेन वेदेन वर्तते। तद्यथा—ऋग्वेदादेः पाणिनीयशिक्षा, शुक्लयजुर्वेदस्य याज्ञवल्क्यशिक्षा, कृष्णयजुर्वेदस्य व्यासशिक्षा, सामवेदस्य नारदशिक्षा, अथर्ववेदस्य च माण्डूकीशिक्षा। अन्येऽपि केचन शिक्षाग्रन्थाः सन्ति। यथा—भरद्वाजशिक्षा, वसिष्ठशिक्षादयः। **(२) व्याकरणम्**—व्याकरणे प्रकृति-प्रत्ययस्य विचारः, उदात्तादिस्वरविचारः, उदात्तादिस्वरसंचारनियमाः, सन्धि-नियमाः, शब्दरूपधातुरूपादिनिर्माणनियमाः, प्रकृतेः प्रत्ययस्य च स्वरूपावधारणं तदर्थनिर्धारणं चेति विविधा विषया विविच्यन्ते। वेदेषु प्रकृति-प्रत्ययविचारस्य स्वरस्य च महन्महत्त्वमिति तत्र व्याकरणमेव साहाय्यमनुतिष्ठतीति षडङ्गेषु व्याकरणमेव प्रधानम्। संस्कृतव्याकरणं प्रातिशाख्यमूलकमेव। वेदानां प्रतिशाखामाश्रित्य व्याकरणग्रन्था आसन्, ते च प्रातिशाख्यग्रन्था इति पप्रथिरे। केचन एव प्रातिशाख्यग्रन्थाः साम्प्रतमुपलभ्यन्ते। ते कमप्येकंवेदमाश्रित्य वर्तन्ते। तद्यथा—ऋग्वेदस्य शाकलशाखायाः शौनकप्रणीतम् ऋक्प्रातिशाख्यम्। एतदेव पार्षदसूत्रमित्यप्यभिधीयते। शुक्लयजुर्वेदस्य माध्यन्दिन-शाखायाः कात्यायनविरचितं शुक्लयजुःप्रातिशाख्यम्। कृष्णयजुर्वेदस्य तैत्तिरीय-शाखायाः तैत्तिरीयप्रातिशाख्यम्। सामवेदस्य सामप्रातिशाख्यं (पुष्पसूत्रं वा), पंच-विधसूत्रं च। अथर्ववेदस्य अथर्वप्रातिशाख्यं (चातुरध्यायिकं वा)। संस्कृतव्याकरणाव-

बोधाय च पाणिनेरष्टाध्यायी सर्वप्रमुखा। अन्ये प्राचीना व्याकरणग्रन्था लुप्तप्राया एव। (३) **छन्दः**—वेदेषु मन्त्राः प्रायशश्छन्दोबद्धा एव। अतो वृत्तज्ञानाय छन्दःशास्त्रमनिवार्यम्। छन्दःशास्त्रविषयको मुख्यो ग्रन्थः पिंगलप्रणीतं छन्दःसूत्रमेवोपलभ्यते। प्रातिशाख्यग्रन्थेष्वपि वृत्तविचारः प्राप्यते। (४) **निरुक्तम्**—निरुक्ते क्लिष्टवैदिकशब्दानां निर्वचनं प्राप्यते। विषयेऽस्मिन् यास्कप्रणीतं निरुक्तमेव प्रमुखो ग्रन्थः। अत्र मन्त्राणां निर्वचनमूलाया व्याख्यायाः प्रथमः प्रयासः समासाद्यते। वैदिकशब्दानां संग्रहात्मको ग्रन्थो निघण्टुरिति कथ्यते। तस्यैव व्याख्यानभूतं निरुक्तमेतत्। यास्को निरुक्ते स्वपूर्ववर्तिनः सप्तदश निरुक्तकारान् परिगणयति। निरुक्ते काण्डत्रयं नैघण्टुककाण्डं नैगमकाण्डं दैवतकाण्डं चेति। (५) **ज्योतिषम्**—शुभं मुहूर्तमाश्रित्यैव विशिष्टोऽध्वरः प्रावर्ततेति शुभमुहूर्तकलनाय ज्योतिषस्योदयोऽभूत्। अत्र सूर्यचन्द्रमसोर्ग्रहाणां नक्षत्राणां च गतिर्निरीक्ष्यते परीक्ष्यते विविच्यते च। सौरमासश्चान्द्रमासश्चोभयं परिगण्यतेऽत्र। मखमुहूर्तनिर्धारणे चान्द्रमासस्य प्रधानत्वं परिलक्ष्यते। विषयेऽस्मिन् आचार्यलगधप्रणीतं 'वेदाङ्गज्योतिषम्' इति ग्रन्थ एव साम्प्रतमुपलभ्यते। (६) **कल्पः**—कल्पसूत्रेषु विविधाध्वराणां संस्कारादीनां च वर्णनं प्राप्यते। मन्त्राणां विविधकर्मसु विनियोगश्च तत्र प्रतिपाद्यते। कल्पसूत्राणि चतुर्धा विभज्यन्ते—(क) श्रौतसूत्रम्, (ख) गृह्यसूत्रम्, (ग) धर्मसूत्रम्, (घ) शुल्वसूत्रं च। (क) **श्रौतसूत्रम्**—श्रौतसूत्रेषु श्रुतिप्रतिपादितानां सप्त हविर्यज्ञानां सप्त सोमयज्ञानामेवं चतुर्दशयज्ञानां विधानं विधिर्विनियोगादिकं च प्रतिपाद्यते। तत्र प्रमुखाणि श्रौतसूत्राणि सन्ति—आश्वलायनश्रौतसूत्रम्, शांखायनश्रौतसूत्रम्, बौधायन०, आपस्तम्ब०, कात्यायन०, मानव०, हिरण्यकेशी०, लाट्यायन०, द्राह्यायण०, वैतानश्रौतसूत्रं च। श्रौतसूत्राणीमानि कमप्येकं वेदमाश्रित्य वर्तन्ते। (ख) **गृह्यसूत्रम्**—गृह्यसूत्रेषु षोडशसंस्काराणां पञ्चमहायज्ञानां सप्तपाकयज्ञानामन्येषां च गृह्यकर्मणां सविशेषं वर्णनमाप्यते। गृह्यसूत्राण्यपि कमप्येकं वेदमाश्रित्य वर्तन्ते। तत्र प्रमुखाणि सन्ति—आश्वलायनगृह्यसूत्रम्, पारस्कर०, शांखायन०, बौधायन०, आपस्तम्ब०, मानव०, हिरण्यकेशी०, भारद्वाज०, वाराह०, काठक०, लौगाक्षि०, गोभिल०, द्राह्यायण०, जैमिनीय०, खदिरगृह्यसूत्रं च। (ग) **धर्मसूत्रम्**—धर्मसूत्रेषु मानवानां कर्तव्यं नीतिर्धर्मो रीतयश्चतुर्वर्णाश्रमाणां कर्तव्यादिकमन्यच्च सामाजिकनियमादिकं वर्ण्यते। तत्र प्रमुखा ग्रन्थाः सन्ति—बौधायनधर्मसूत्रम्, आपस्तम्ब०, हिरण्यकेशी०, वसिष्ठ०, मानव०, गौतमधर्मसूत्रं च। (घ) **शुल्वसूत्रम्**—शुल्वसूत्रेषु यज्ञवेद्या मानादिकं वेदीनिर्माणविध्यादिकं च वर्ण्यते। तत्र मुख्या ग्रन्थाः सन्ति—बौधायनशुल्वसूत्रम्, आपस्तम्ब०, कात्यायन०, मानवशुल्वसूत्रं च। एवं षडिमानि वेदांगानि वेदार्थबोधे तत्क्रियाकलापवर्णने चोपयुक्तानि सन्ति।

३. सर्वोपनिषदो गावो, दोग्धा गोपालनन्दनः ।
पार्थो वत्सः सुधीर्भोक्ता, दुग्धं गीतामृतं महत् ॥

कस्य न विदितं विपश्चितो भगवद्गीताया गुणगौरवम् । गीतेयं न केवलं प्रस्तवीति सर्वासामप्युपनिषदां सारभागम्, अपि तु श्रुतिसारमपि प्रस्तौतितराम् । सांख्ययोगदर्शनयोः सिद्धान्तानां वैशद्येन विवेचनात् प्रतिपादनाच्च दर्शनसारसंग्रहोऽप्यत्रोपलभ्यते । वेदान्तदर्शनप्रतिपादितस्य तत्त्वमसीति महावाक्यस्याप्यत्रोपलम्भाद् वेदान्तावगाहित्वमप्यस्य लक्ष्यते । सेयं सरलया भावाभिव्यक्तिप्रक्रियया, भूयिष्ठयाऽर्थगभीरतया, प्रेष्ठया पद्धत्या, श्रेष्ठया विवृतिसरण्या, साधिष्ठया योगसाधनादीक्षया, वरिष्ठयाऽऽत्मविशुद्धिशिक्षया सर्वस्यापि लोकस्याद्दतिमनुभवति । एतदेवात्र समासत उपस्थाप्यते विव्रियते च ।

(१) निष्कामकर्मयोगस्य वर्णनं महत्या विवृत्या समुपलभ्यते गीतायाम् । तद्यथा— कर्मण्येवाधिकारस्ते, मा फलेषु कदाचन । (गीता २-४७) । विहायासक्तिं फलप्रेप्सामनास्थाय कर्मणि प्रवर्तितव्यम् । निष्कामकर्मयोगप्रतिपादकाः केचन श्लोका अत्र दिङ्मात्रं निर्दिश्यन्ते । योगस्थः कुरु कर्माणि० (२-४८), कर्मयोगेन योगिनाम् (३-३), न कर्मणामनारम्भात्० (३-४), कार्यते ह्यवशः कर्म० (३-५), यस्त्विन्द्रियाणि मनसा० (३-७), नियतं कुरु कर्म त्वं० (३-८), तस्मादसक्तः सततं० (३-१९), कर्मणैव हि संसिद्धिम्० (३-२०), सक्ताः कर्मण्यविद्वांसो० (३-२५), कुरु कर्मैव तस्मात् त्वं०(४-१५), कर्मणो ह्यपि बोद्धव्यं० (४-१७), कर्मण्यकर्म० (४-१८), त्यक्त्वा कर्मफलासङ्गं० (४-२०), कर्मयोगो विशिष्यते (५-२) । निष्कामकर्मयोगस्य वर्णनं मूलरूपेण यजुर्वेदे चत्वारिंशत्तमेऽध्याये ईशोपनिषदि च समासाद्यते । तद्यथा—कुर्वन्नेवेह कर्माणि जिजीविषेच्छतँ समाः । एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे (यजु० ४०-२, ईश० २) । (२) गीतायां यज्ञस्य महत्त्वं तस्यावश्यकर्तव्यता च निरूप्यते । तद्यथा—सहयज्ञाः प्रजाः० (३-१०), देवान् भावयतानेन० (३-११), इष्टान् भोगान्० (३-१२), यज्ञशिष्टाशिनः० (३-१३), अन्नाद् भवन्ति भूतानि० (३-१४, १५), एवं प्रवर्तितं चक्रं० (३-१६), दैवमेवापरे यज्ञं० (४-२५-२७), द्रव्ययज्ञास्तपोयज्ञा० (४-२८), यज्ञशिष्टामृतभुजो० (४-३१-३३) । यतिनाऽपि नोज्झितव्यो यागः । यज्ञदानतपःकर्म न त्याज्यं कार्यमेव तत्० (१८-५) । यज्ञस्य महत्त्वं तदुपयोगिता तत्फलादिकं च शतशो मन्त्रेषु यजुर्वेदे वर्ण्यते । तद् दिङ्मात्रमिह निर्दिश्यते—पाहि यज्ञं पाहि यज्ञपतिं० (यजु० २-६), समिधाग्निं दुवस्यत० (यजु० ३. १-५), देवान् दिवमगन् यज्ञः० (यजु० ८-६०), आयुर्यज्ञेन कल्पतां० (यजु० ९-२१), भद्रो नो अग्निराहुतो० (१५. ३८-३९), उद्बुध्यस्वाग्ने० (यजु० १५. ५४-५५), अशीतिर्होमाः० (यजु० २३-५८), अयं यज्ञो भुवनस्य नाभिः (यजु० २३-६२), तस्माद् यज्ञात् सर्वहुतः० (३१-६-९), वसन्तोऽस्यासीदाज्यं०(३१-१४), यज्ञेन यज्ञमयजन्त० (३१-१६) । यज्ञमहत्त्वप्रतिपादकानि मन्त्राण्यन्यानि—(यजु० ६-२५, ८-६१, ९-१, ११-८, १२-४४, १७-५२, १७-७९, १८-२९, १९-३१, २२-३३) ।
(३) कर्मकाण्डस्य ब्रह्मज्ञानापेक्षया गौणत्वं प्रतिपाद्यते गीतायाम् । यामिमां पुष्पितां वाचं० (२.४२-४३) । विषयोऽयं विस्तरशो वर्ण्यते मुण्डकोपनिषदि । तद्यथा—प्लवा ह्येते अदृढा

यज्ञरूपा:० (मुण्डक० १.७-१०)। (४) आत्मनोऽजरत्वममरत्वमनादित्वादिकं च महता विस्तरेण गीतायां सम्प्राप्यते। तद्यथा— अन्तवन्त इमे देहा० (२-१८), य एनं वेत्ति० (२-१९), न जायते म्रियते० (२-२०), वासांसि जीर्णानि० (२-२२), नैनं छिन्दन्ति० (२-२३), अच्छेद्यो० (२-२४), देही नित्य० (२-३०)। आत्मनो नित्यत्वमीशोपनिषदि कठे च विस्तरतो वर्णितमस्ति। तद्यथा—स पर्यगाच्छुक्रमकायमव्रण० (ईश० ८), अनेजदेकं० (ईश० ४), तदेजति तन्नैजति० (ईश० ५), अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे (कठ १.२. १८-२१)। (५) गीतायां द्वितीये चतुर्थे चाध्याये ज्ञानयोगस्य विस्तरशो वर्णनमाप्यते। मूलमेतस्येशोपनिषदि लभ्यते—विद्यां चाविद्यां च यस्तद्वेदोभय ँ सह०। (ईश० ९-११)। मन्त्रत्रयेऽस्मिन् विद्यामार्गेण ज्ञानमार्गोऽविद्या-मार्गेण च कर्ममार्गो गृह्यते। सांख्याभिमतोऽयं पन्थाः सांख्यदर्शने विशेषतो विव्रियते। (६) पञ्चमाध्याये षष्ठाध्याये च गीतायां योगो वर्ण्यते। तस्य स्वरूपं साधनाविध्यादिकं च तत्र प्राप्यते। वर्णनमेतद् वेदान्तदर्शनं योगदर्शनं चाश्रित्य वर्तते। मुण्डकोपनिषदि माण्डूक्योपनिषदि चायं विषय उपलभ्यते। तद्यथा—धनुर्गृहीत्वौपनिषदं० (मु० २-३), प्रणवो धनुः शरो ह्यात्मा० (मु० २-४), यः सर्वज्ञः०(मु० २-७), सत्येन लभ्यस्तपसा ह्येष आत्मा० (मु० ३-५), यत्र सुप्तो न कंचन कामं कामयते० (मा० ५)। (७) अक्षर-ब्रह्मणो वर्णनं तदनुध्यानेन मोक्षाधिगमश्चाष्टमाध्याये गीतायां वर्ण्यते। मुण्डकोपनिषदि, छान्दोग्ये, बृहदारण्यके च ब्रह्मणो वर्णनं प्रणवानुध्यानेन मोक्षावाप्तेश्च वर्णनं विस्तरश उपलभ्यते।(८) नवमेऽध्याये गीतायामीश्वरार्पणमीश्वरप्राप्तिसाधनत्वेनोपदिश्यते। भावोऽयं मुण्डकोपनिषदि मुख्यत्वेनोपलभ्यते। यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वाम् (मु० ३-३)। (९) गीतायां दशमेऽध्याये विभोर्विभूतीनां वर्णनमासाद्यते। कठोपनिषदि विस्तरशो विभोर्विभूतिवर्णनं निरीक्ष्यते। तद्यथा—रूपं रूपं प्रतिरूपो बभूव (कठ २.५. ८-११), तमेव भान्तमनु भाति सर्वं तस्य भासा सर्वमिदं विभाति (कठ २.५.१५) भयादस्याग्निस्तपति० (कठ २.६.३)। (१०) गीतायामेकादशेऽध्याये विराड्रूपदर्शनमुपलभ्यते। विभोर्विराड्रूपस्य वर्णनं यजुर्वेदे पुरुषसूक्ते ३१ अध्याये प्राप्यते। तद्यथा—सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्०। (यजु० ३१. १-१३)। (११) द्वादशेऽध्याये भक्तियोगवर्णनं गीतायाम्। कैवल्योपनिषदि भक्तियोगो ध्यानयोगश्च वर्ण्यते। तद्यथा—श्रद्धाभक्तिध्यानयोगादवैहि (कैव० १-२)। (१२) त्रयोदशेऽध्याये क्षेत्रक्षेत्रज्ञवर्णनं सांख्यदर्शनानुसारि ज्ञातव्यम्। सांख्याभिमतं प्रकृतिपुरुषवर्णनमिहोप-लभ्यते। (१३) चतुर्दशेऽध्याये गुणत्रयवर्णनमपि सांख्यदर्शनानुसार्येव बोद्धव्यम्। श्वेताश्वतरोपनिषद्यपि गुणत्रयवर्णनमुपलभ्यते। तद्यथा—अजामेकां लोहितशुक्लकृष्णां० (श्वेता० ४-५), स विश्वरूपस्त्रिगुणः० (श्वेता० ५-७)। सप्तदशेऽष्टादशे चाध्याये श्रद्धाया ज्ञानादिकस्य च सात्त्विकादिभेदो वर्ण्यते। तदपि सांख्यानुसार्येवावगन्तव्यम्। (१४) पञ्चदशेऽध्यायेऽश्वत्थवर्णनं कठोपनिषदमाश्रित्य वर्तते। तद्यथा—ऊर्ध्वमूलोऽवाक्-शाख एषोऽश्वत्थः सनातनः (कठ २.६.१)। तत्र वर्णिता क्षराक्षरद्वयी श्वेताश्वतरे प्राप्यते। तद्यथा—क्षरं प्रधानममृताक्षरं हरः० (श्वेता० १-१०)। विशदीभवत्येतस्माद्यद् गीतेयं सर्वासामुपनिषदां समेषां दर्शनानां श्रुतीनां च सारं सरलया सरण्या प्रस्तवीतीति।

४. भासनाटकचक्रम्

महाकवेर्भासस्य कृतित्वेन त्रयोदश नाटकरत्नानि समुपलभ्यन्ते। 'भासनाटकचक्रेऽपि छेकैः क्षिप्ते परीक्षितुम्' इति राजशेखरभणितिमाश्रित्य भासनाटकचक्रमिति तत्कृतनाटकानां नाम व्यवह्रियते। नाटकत्रयोदशस्य परिचयः समासतोऽत्र प्रस्तूयते। **(१) प्रतिज्ञायौगन्धरायणम्**—अङ्कचतुष्टयमत्र। उदयनस्य वासवदत्तया सह प्रणयः परिणयश्चेह वर्ण्यते। यौगन्धरायणप्रयत्नतः प्रद्योतप्रासादादुदयनस्य मोक्षः। **(२) स्वप्नवासवदत्तम्**—अङ्कषट्कमत्र। वासवदत्ताऽग्निदाहेन दग्धेति प्रवादं प्रचार्य यौगन्धरायणप्रयत्नात् पद्मावत्या सहोदयनस्योपयमोऽपहृतराज्यावाप्तिश्च वर्ण्यते। **(३) ऊरुभङ्गम्**—नाटकमेतदेकाङ्कि। पाञ्चालीपरिभवप्रतिक्रियार्थं भीमेन गदायुद्धे दुर्योधनोरुभञ्जनं वस्तु प्रतिपाद्यते। निखिलेऽपि संस्कृतवाङ्मये दुःखान्तमेतदेव नाटकम्। **(४) दूतवाक्यम्**—एकाङ्कि नाटकम्। महाभारताहवात् प्राक् पाण्डवार्थं दुर्योधनसंसदि श्रीकृष्णस्य दूतत्वेन गमनं प्रयत्नवैफल्यं चात्र वर्ण्यते। **(५) पञ्चरात्रम्**—अङ्कत्रयमत्र। यज्ञान्ते द्रोणो दक्षिणास्वरूपं पाण्डवेभ्यो राज्यार्धं ययाचे दुर्योधनम्। पञ्चरात्राभ्यन्तरे पाण्डवानामुदन्त उपलभ्यते चेद्राज्यार्धं दास्यते मयेति दुर्योधनोक्तिः। पञ्चरात्राभ्यन्तरे पाण्डवानां प्राप्तिर्दुर्योधनकृतराज्यार्धप्रदानं च। **(६) बालचरितम्**—अङ्कपञ्चकमत्र। बालस्य श्रीकृष्णस्य जन्मारभ्य कंसवधान्तं चरितमिह वर्ण्यते। **(७) दूतघटोत्कचम्**—एकाङ्कि नाटकमदः। अभिमन्युनिधनानन्तरं श्रीकृष्णप्रेरणया घटोत्कचस्य दौत्यमाश्रित्य धृतराष्ट्रान्तिकं गमनम्। दुर्योधनकृतस्तस्यावमानः। दुर्योधनोक्तिश्च—'प्रतिवचो दास्यामि ते सायकैरिति'। **(८) कर्णभारम्**—नाटकमिदमेकाङ्कि। ब्राह्मणवेषधारिणे शक्राय कर्णस्य कवचकुण्डलार्पणम्। **(९) मध्यमव्यायोगः**—नाटकमिदमेकाङ्कि। मध्यमः पाण्डवो भीमो मध्यमनामानं ब्राह्मणसूनुमेकं घटोत्कचात् त्रायते। अपत्यदर्शनेन भीमस्यानन्दावाप्तिः पत्न्या हिडम्बया च समागमः। **(१०) प्रतिमानाटकम्**—अङ्कसप्तकमिह। रामवनवासादारभ्य रावणवधान्ता कथाऽत्र वर्णिता। दशरथप्रतिमां प्रेक्ष्य भरतः पितुर्निधनमवगच्छति। **(११) अभिषेकनाटकम्**—अङ्कषट्कमत्र। किष्किन्धाकाण्डादारभ्य युद्धकाण्डान्ता रामकथाऽत्र वर्णिता। रावणवधानन्तरं रामस्य राज्येऽभिषेकः। **(१२) अविमारकम्**—अङ्कषट्कमत्र। राजकुमारस्याविमारकस्य राज्ञः कुन्तिभोजस्य दुहित्रा कुरङ्गया सह प्रणयपरिणयोऽत्र वर्णितः। **(१३) चारुदत्तम्**—अङ्कचतुष्टयमिह। वितीर्णविपुलवित्तेनोदारचित्तेन चारुदत्तेन सह वसन्तसेनानामवाराङ्गनायाः प्रणयापयमोऽत्र वर्णितः।

नाटकानामेतेषां प्रणेता भास एवान्यो वेति विविधा विप्रतिपत्तिर्विषयेऽस्मिन्। भास एवैतेषां नाटकानां प्रणेतेति विद्वद्भिरधिकैरुररीक्रियते। एक एवैतेषां प्रणेतेत्यवगम्यतेऽन्तःसाक्ष्यादिना। (१) नाटकानि सर्वाण्यपि सूत्रधारप्रवेशादारभन्ते। 'नान्द्यन्ते ततः प्रविशति सूत्रधारः' इति वाक्येन ग्रन्थारम्भः सर्वत्र। (२) नाटकभूमिकार्थे प्रस्तावनाशब्दस्थाने 'स्थापना'शब्दप्रयोगः। (३) प्ररोचनाभावोऽर्थात् नाटककृत्परिचयाभावः स्थापनायाम्। (४) नाटकपञ्चके (स्वप्न०, प्रतिज्ञा०, प्रतिमा०, पंच०, ऊरु०) मुद्रालंकारप्रयोगोऽर्थात् प्रथमश्लोके प्रमुखनाटकीयपात्राणां नामोल्लेखः। (५) भरतवाक्यं प्रायशः सममेव सर्वत्र। 'इमामपि महीं कृत्स्नां राजसिंहः प्रशास्तु नः।' (६) भूमिका संक्षिप्ततमा। संवादारम्भेऽपि प्रायः साम्यमेव। यथा—एवमार्यमिश्रान् विज्ञापयामि।'

(७) पात्रनामसाम्यमपि। यथा—कांचुकीयो बादरायणः, प्रतीहारी विजया च कतिपयेषु नाटकेषु। (८) अप्रचलितवृत्तानां प्रयोगो यथा—सुवदना दण्डकादयः। (९) बहुषु नाटकेषु पताकास्थानकप्रयोगः। (१०) नाटकेषु सर्वेषु भाषासाम्यं रीतिसाम्यं च। (११) अपाणिनीयप्रयोगाश्च सर्वेष्वेव नाटकेषु। (१२) अन्योन्यसंबद्धानि नाटकानि। यथा—स्वप्न० प्रतिज्ञायौगन्धरायणस्योत्तरभाग एव। प्रतिमाऽभिषेकनाटके च तथा।

बाणो हर्षचरिते 'सूत्रधारकृतारम्भैः०' इति भासनाटकवैशिष्ट्यमाचष्टे। तच्च सर्वत्रेहावाप्यते। राजशेखरोऽभिधत्ते—'भासनाटकचक्रेऽपि छेकैः क्षिप्ते परीक्षितुम्। स्वप्नवासवदत्तस्य दाहकोऽभून्न पावकः।' एतस्मात् भासकृतनाटकबहुत्वस्य स्वप्नवासवदत्तस्य च तत्कृतित्वेनावगतिर्भवति। भोजदेवो रामचन्द्रगुणचन्द्रौ च स्वप्नवासवदत्तं भासकृतिमामनन्ति। अतो भास एव सर्वेषां प्रणेतेत्यवगम्यते।

भासस्य जनिकालश्च ४५० ई० पूर्वादनन्तरं ३७० ई० पूर्वात्प्राक् च स्वीक्रियते।

साम्प्रतकालं यावदुपलब्धं संस्कृतवाङ्मयं परीक्ष्यते चेद् भास एव नाटककृदग्रणीरिति शक्यं वक्तुम्। त्रयोदशनाटकानां प्रणेता स इति प्रतिपादितमेव। नाटकानां बाहुल्येन विषयवैविध्येनाभिनयोपयोगित्वेन च तस्य नाट्यनैपुण्यं नाटकनिर्मितौ वैशारद्यं चावधार्यते। नाटकेषु तस्य मुख्या विशेषताः सन्त्येताः—भाषायां सरलता, अकृत्रिमा शैली, वर्णनेषु यथार्थता, चरित्रचित्रणे वैयक्तिकत्वं, घटनासंयोजने सौष्ठवं, कथाप्रसङ्गस्याविच्छिन्नश्च प्रवाहः। सर्वाण्येव नाटकान्यभिनयोपयोगीनीति तस्य महनीयतामभिवर्धयन्ति। नाटकेषु मौलिकता कल्पनावैचित्र्यं च विशेषत उपलभ्यते। स एव सर्वाग्रणीरेकाङ्किनाटकप्रणयने। नाटकपञ्चकमस्यैकाङ्कि। पताकास्थानकमपि मधुरं प्रयुङ्क्ते। शैली चेद् विविच्यते तस्य तर्हि प्रसादमाधुर्यौजसां त्रयाणामपि गुणानां समन्वयस्तत्रावेक्ष्यते। भाषा तस्य सरला, सुबोधा, सरसा, नैसर्गिकी, सप्रवाहा च। उपमारूपकोत्प्रेक्षार्थान्तरन्यासालंकाराणां प्रयोगो विशेषतोऽवाप्यते तस्य कृतिषु। अनुप्रासादिकं विशेषतः प्रियं तस्य। यथा—हा वत्स राम जगतां नयनाभिराम (प्रतिमा० २-४)। मनोवैज्ञानिकविवेचने नितरां निपुणः सः। यथा—दुःखं त्यक्तुं बद्धमूलोऽनुरागः० (स्वप्न० ४-६), प्रद्वेषो बहुमानो वा० (स्वप्न० १-७), शरीरेऽरिः प्रहरति० (प्रतिमा० १-१२)। भारतीया भावाः सविशेषं रोचन्ते तस्मै। यथा—पितृभक्तिः पातिव्रत्यं भ्रातृप्रेमादिकम्। 'भर्तृनाथा हि नार्यः' (प्रतिमा० १-२५), कुतः क्रोधो विनीतानाम्० (प्रतिमा० ६-९), अयुक्तं परपुरुषसंकीर्तनं श्रोतुम् (स्वप्न० अंक ३)। भाषायां सरलता रम्यता च लोकप्रियत्वस्य कारणं तस्य। रसभावानुकूलं शैल्यां परिवर्तनमपि प्राप्यते। यथा—मद्भुजाकृष्ट० (प्रतिमा० ५-२२), पक्षाभ्यां परिभूय० (प्रतिमा० ६-३)। विस्तरमनादृत्य समासं साधीयान्मनुते। कमप्यर्थं ''अनुक्त्वैव वनं गताः (प्रतिमा० २-१७)। चित्रयति तथा भावान् यथा मूर्तवत्ते उपतिष्ठन्ति। व्यङ्ग्यप्रयोगस्तस्यासाधारणो मार्मिकश्च। यथा—अनपत्या० (प्रतिमा० २-८)। उपमाप्रयोगेऽपि दक्षः। यथा—सूर्य इव गतो रामः० (प्रतिमा० २-७), विचेष्टमानेव० (प्रतिमा० ६-२)। व्याकरणादिवैदग्ध्यमपि प्रदर्शयति यथावसरम्। यथा—स्वरपद० (प्रतिमा० ५-७), घनः स्पष्टो धीरः० (प्रतिमा० ४-७)। विविधरसवर्णने, छन्दःप्रयोगे, अर्थान्तरन्यासप्रयोगे च प्रभूतं दाक्षिण्यमुपलभ्यते तस्य।

५. कालिदासस्य सर्वस्वमभिज्ञानशाकुन्तलम्

महाकवेः कालिदासस्य जनिकालमनुरुध्य कतिपयानि मतान्युपस्थाप्यन्ते मतिमतां वरिष्ठैः। मतद्वयं च मुख्यतः प्रचरिष्णु। (१) विक्रमसंवत्सरसंस्थापकस्य विक्रमादित्यस्य राज्यकाले खिस्ताब्दात्पूर्वं प्रथमशताब्द्याम्, (२) ईसवीयचतुर्थशताब्द्यां गुप्तकाले। प्रथमं मतं भारतीयैरधिकं स्वीक्रियते, द्वितीयं च पाश्चात्त्यैः। कृतयस्तस्य प्राधान्यतः सप्तैव स्वीक्रियन्ते। (क) नाट्यग्रन्थाः—(१) अभिज्ञानशाकुन्तलम्, (२) विक्रमोर्वशीयम्, (३) मालविकाग्निमित्रम्। (ख) काव्यद्वयम्—(४) रघुवंशम्, (५) कुमारसम्भवम्। (ग) गीतिकाव्यद्वयम्—(६) मेघदूतम्, (७) ऋतुसंहारम्। कृतिष्वेतासु शाकुन्तलमेव कवेः प्रतिभायाः परिपाकेन, रचनाकौशलेन, प्रकृतिचित्रणे पाटवेन, रसपरिपाकेन, नीरसाख्याने सरसताऽऽधानेन, मूलकथापरिवर्तने वैशारद्येन, करुणादिरससंचारेण च सर्वातिशायीति तदेव कालिदासस्य सर्वस्वमभिमन्यते। अतो निगदितं केनापि—'काव्येषु नाटकं रम्यं नाटकेषु शकुन्तला। तथापि च चतुर्थोऽङ्कस्तत्र श्लोकचतुष्टयम्'। एतदेवात्र विविच्यते विव्रियते च। विषयोऽयं महता विस्तरेण वर्णितो विशदीकृतश्च मत्कृतशाकुन्तलभूमिकायाम्। विस्तरस्तत एवावगन्तव्यः। श्लोकाङ्कादिकं मत्संपादितशाकुन्तलसंस्करणानुसारि।

कालिदासस्य **नाट्यकलाकौशले** सन्त्येता विशेषताः। घटनासंयोजने सौष्ठवं, वर्णनानां सार्थकता स्वाभाविकता ध्वन्यात्मकता च, चरित्रचित्रणे वैयक्तिकत्वं, कवित्वं, रसपरिपाकश्चेति। अभिनयार्हतया चैतेषां नाटकानां महत्त्वं नितरामभिवर्धते। घटनासंयोजने सौष्ठवं यथा—द्वितीयेऽङ्के आश्रमं प्रवेष्टुकामे सति दुष्यन्ते ऋषिकुमारद्वयस्य नृपाह्वानार्थं प्रवेशः। पञ्चमे हंसपदिकागीतम्, षष्ठेऽङ्गुलीयकोपलब्धिः, सप्तमे पुत्रदर्शनं शकुन्तलावाप्तिश्च। वर्णनेषु स्वाभाविकता यथा—प्रथमेऽङ्के मृगप्लुतिवर्णनं, द्वितीयेऽवनिपविदूषकसंलापः, चतुर्थे शकुन्तलाविप्रयोगवर्णनं, पञ्चमे शकुन्तलाप्रत्याख्यानं, सप्तमेऽपत्यक्रीडावर्णनं च। वर्णनानां ध्वन्यात्मकता यथा—'दिवसाः परिणामरमणीयाः' (१-३) नाटकस्य सुखावसायित्वं सूचयति। सूत्रधारकथनम्—'अस्मिन् क्षणे विस्मृतं खलु मया' (पृष्ठ १५) नाटके विस्मरणस्य महिमानं द्योतयति। 'यात्येकतोऽस्त०' (४-२) सुखदुःखक्रमस्यानिवार्यत्वम्, हंसपदिकागीतम्—'अभिनवमधु०' (५-१) राज्ञो विस्मरणम्। चरित्रचित्रणे वैयक्तिकता यथा—ऋषित्रये कण्वः साधुप्रकृतिर्नियतः शकुन्तलायां पितृवन्मृदुहृदयः, मारीचो वीतरागः, दुर्वासाश्च रोषप्रकृतिः।

रसनिरूपणेऽपि महती विदग्धताऽवाप्यते। बीभत्सरसं विहाय प्रायः समेऽप्यन्ये रसाः समुपलभ्यन्तेऽत्र। शृङ्गाररसश्च सर्वानतिशेते। (क) संभोगशृङ्गारो यथा—शकुन्तलां समीक्ष्य नृपोक्तिः—अहो मधुरमासां दर्शनम् (पृष्ठ ४५), शुद्धान्तदुर्लभमिदम्० (१-१७)। शकुन्तलालावण्यवर्णनम्—इदं किलाव्याज० (१-१८), सरसिजमनुविद्धं० (१-२०), अधरः किसलयरागः० (१-२१), चलापाङ्गां दृष्टिम्० (१-२४)। शकुन्तलामुपेत्य नृपोक्तिः—इदमनन्यपरायणम्० (३-१६), किं शीतलैः० (३-१८), अपरिक्षत० (३-२१), उपरागान्ते० (७-२२)। (ख) विप्रलम्भशृङ्गारो यथा—द्वितीयेऽङ्के शकुन्तलास्मरणं तच्चेष्टावर्णनं च—कामं प्रिया न० (२-१), स्निग्धं वीक्षितम्० (२-२), चित्रे निवेश्य० (२-९), अनाविद्धं रत्नं०(२-१०), अभिमुखे मयि० (२-११), दर्भाङ्कुरेण० (२-१२)। चन्द्रादीनां तापहेतुत्वं—तव कुसुमशरत्वम्० (३-३)। विरहक्षामगात्रायाः

शकुन्तलाया वर्णनम्—स्तनन्यस्तोशीरं० (३-६), क्षामक्षामकपोल० (३-७)। राज्ञो विरहावस्थावर्णनम्—इदमशिशिरै० (३-१०)। (ग) करुणरसो यथा—शकुन्तलाप्रस्थान-समये आश्रमावस्था—यास्यत्यद्य० (४-६), पातुं न० (४-९), उद्गलितदर्भ० (४-१२), यस्य त्वया० (४-१४), अभिजनवतो० (४-१९), शममेष्यति० (४-२१)। (घ) वीररसो यथा—अध्याक्रान्ता० (२-१४), नैतच्चित्रं० (२-१५), का कथा० (३-१), कुमुदान्येव० (५-२८)।(ङ) अद्भुतरसो यथा–दुष्यन्तेनाहितं० (४-४), क्षौमं केनचिद्० (४-५), शैलानाम्० (७-८), वल्मीकार्ध० (७-११), प्राणानाम्० (७-१२)। (च) हास्यरसो यथा—अत्र पयोधर० (पृ० ५२), किं मोदक० (पृ० ११०), यथा कस्यापि० (पृ० १२४), त्रिशंकुरिव० (पृ० १४२), एष मां कोऽपि० (पृ० ४१०), बिडालगृहीतो० (पृ० ४१३)। (छ)शान्तरसो यथा—स्वर्गादधिक० (पृ० ४४०), प्राणानाम्० (७-१२)।

काव्यसौन्दर्यविवेचनदृशा दृश्यते चेत्समग्रमेव शाकुन्तलं सौन्दर्यपरीतम्। (क) करुणरसव्याप्लुतत्वाच्चतुर्थोऽङ्कोऽतिशायी। तत्र च श्लोकचतुष्टयं मन्मत्या वर्तते–यास्यत्यद्य० (४-६), शुश्रूषस्व० (४-१८), पातुं न० (४-९), अस्मान् साधु० (४-१७)। (ख) अन्तःप्रकृतेर्बाह्यप्रकृत्या समन्वयो दृश्यते। खिन्ना शकुन्तला कुमुदिनी च भर्तृ-वियोगेन। अन्तर्हिते० (४-३), पातुं न प्रथमं० (४-९), उद्गलितदर्भ० (४-१२)। (ग) बाह्यप्रकृत्याऽऽत्मीयत्वम्—अस्ति मे सोदर० (पृ० ४८), लतासनाथ० (पृ० ५६), न नमयितुम्० (२-३), क्षौमं० (४-५), उद्गलित० (४-१२)। (घ) प्रेमचित्रणं लावण्य-वर्णनं च। मतमेतन्महाकवेर्यत् सौन्दर्यं नाहार्यं गुणमपेक्षते। अतस्तेनोच्यते—इदं किला-व्याज० (१-१८), सरसिजमनुविद्धं० (१-२०), अहो सर्वास्ववस्थासु० (पृ० ३५७)। नैसर्गिकत्वादेव निर्दोषत्वं शकुन्तलालावण्यस्य। इदमुपनत० (५-१९)। पुष्पिता लतेव लावण्यमयी शकुन्तला। अधरः किसलय० (१-२१)। तस्य मतमेतद् 'यत्राकृतिस्तत्र गुणा वसन्ति'। सुन्दरीसौन्दर्यं त्रपयैव, नान्यथा। अतो व्यादिश्यते तेन—वाचं न मिश्रयति० (१-३१), अभिमुखे मयि० (२-११)। स्त्रीसौन्दर्यं सच्चारित्र्येण तपसा च। यथा—शुश्रूषस्व० (४-१८), इयेष सा कर्तुमवन्ध्यरूपतां समाधिमास्थाय तपोभिरात्मनः (कुमार० ५-२)। तपःपूतमेव प्रेम प्रसीदति प्रशस्यते च। तपःपूतैव शकुन्तला प्रियमनुविन्दति।

कालिदासस्य शैली—वैदर्भीरीत्याः सर्वाग्रणीः कविरित्यत्र न कापि विप्रति-पत्तिः। (क) तस्य शैल्यां प्रसादमाधुर्यौजसां त्रयाणामपि गुणानां समन्वयः समीक्ष्यते। यथा—भव हृदय० (१-२८), क्व वयं० (२-१८), अयं स ते० (३-११), अर्थो हि कन्या० (४-२२), भानुः सकृद्० (५-४)। (ख) शब्दकोषेऽसाधारणोऽधिकारस्तस्य। यथा—अनवरत० (२-४), अनाघ्रातं० (२-१०), अस्मान् साधु० (४-१७), त्रिस्रोतसं० (७-६)। (ग) वर्णने ध्वन्यात्मकता। यथा—अये लब्धं नेत्रनिर्वाणम् (पृ० १५२), तव न जाने० (३-१३), किं शीतलैः० (३-१८)। (घ) वर्णनकौशलम्। यथा—विरह-खिन्नयोर्दुष्यन्तशकुन्तलयोर्वर्णनम्। चतुर्थेऽङ्के शकुन्तलावियोगखिन्नस्याश्रमस्य वर्णनम्। (ङ) संलापे सर्वत्र संक्षेपो रम्यता चोपलभ्यते। (च) अलंकारप्रयोगः। प्रायश्चत्वारिंशद-लंकारास्तेन प्रयुक्ताः। (छ) उपमा कालिदासस्य। वर्णितमेतदन्यत्र। (ज) चतुर्विंशति-श्छन्दांसि प्रयुक्तानि तेन शाकुन्तले।

९. उपमा कालिदासस्य

कविताकामिनीकान्तः कालिदासः कस्य नावर्जयति चेतः सचेतसः। तस्य काव्यसौन्दर्यं प्रेक्षं-प्रेक्षं प्रशंसन्ति सहृदयाः सुधियस्तस्य कलाकौशलम्। कालिदासोऽतिशेते सर्वानपि महाकवीनौपम्ये। अतः साधूच्यते—'उपमा कालिदासस्य'। एतदेवात्र विविच्यते।

का नामोपमा? कथं चैषोपकर्त्री काव्यस्य? विश्वनाथानुसारं 'साम्यं वाच्यमवैधर्म्यं वाक्यैक्य उपमा द्वयोः' (सा० दर्पण १०-१४)। वस्तुद्वयस्य वैधर्म्यं विहाय साम्यमात्रं चेदुच्यते वाक्यैक्ये तर्हि सोपमा। उपमैषा सौदामिनीव विद्योतते विपुले वाङ्मये। काव्यशरीरे समादधाति महतीं मञ्जुलताम्। कालिदासस्योपमाप्रयोगेऽपूर्वं वैशारद्यम्। उपमासु न केवलं रम्यता, यथार्थता, पूर्णता, विविधता चैवापि तु सर्वत्रैव लिङ्गसाम्यमौचित्यं च। लिङ्गसाम्यस्यौचित्यस्य च समाश्रयणेन काचिदपूर्वा सम्पद्यते चारुतोपमासु। शतशः सन्त्युपमाप्रयोगस्थलानि तस्य काव्यादिषु। रघुवंशे तूपमाप्रयोगः सर्वातिशायी।

शास्त्रीया उपमास्तावत् प्राङ् निर्दिश्यन्ते। **(१) शास्त्रीया उपमाः—(क)** वेदविषयकाः—मनुस्तथैव नृपाणामग्रिमोऽभवद्यथा मन्त्राणामोंकारः। 'आसीन्महीक्षितामाद्यः प्रणवश्छन्दसामिव' (रघुवंश १-११)। सुदक्षिणा नन्दिन्या मार्गं तथैवान्वगच्छद्यथा स्मृतिः श्रुतेरर्थम्। 'श्रुतेरिवार्थं स्मृतिरन्वगच्छत्' (रघु० २-२)। **(ख)** दर्शनविषयकाः—यथा बुद्धेः कारणमव्यक्तं मूलप्रकृतिर्वा तथा सरय्वा नद्याः कारणं मानसं सरः। 'ब्राह्मं सरः कारणमाप्तवाचो बुद्धेरिवाव्यक्तमुदाहरन्ति' (रघु० १३-६०)। दिलीपस्य कृतिविशेषाः प्राक्तनाः संस्कारा इव फलानुमेया आसन्। 'फलानुमेयाः प्रारम्भाः संस्काराः प्राक्तना इव' (र० १-२०)। गम्भीराया नद्याः पयो निर्मलं मानसमिव वर्तते, मेघश्च छायात्मेव। 'चेतसीव प्रसन्ने, छायात्मापि०' (मेघ० १-४३)। यतिर्यथेन्द्रियारातीन् बाधते तथा रघुः पारसीकान् जेतुं प्रतस्थे। 'इन्द्रियाख्यानिव रिपूंस्तत्त्वज्ञानेन संयमी' (रघु० ४-६०)। **(ग)** यज्ञविषयकाः—नृपो दुष्यन्तः शकुन्तला भरतोऽपत्यं च त्रयमेतत् क्रमशः विधिः श्रद्धा वित्तं चेति त्रयाणां समन्वयो वर्तते। 'श्रद्धा वित्तं विधिश्चेति त्रितयं तत् समागतम्' (शा० ७-२९)। शकुन्तलाऽनुरूपं भर्तारं गता यथा धूमावृतलोचनस्य यजमानस्य वह्नावाहुतिः। 'दिष्ट्या धूमाकुलितदृष्टेरपि यजमानस्य पावक एवाहुतिः पतिता'। (शा० अंक ४)। यज्ञस्य दक्षिणेव सुदक्षिणा दिलीपभार्याऽभूत्। 'अध्वरस्येव दक्षिणा' (र० १-३१)। स्वाहया युक्तोग्निरिव वसिष्ठोऽरुन्धत्या समेतोऽभूत्। 'स्वाहयेव हविर्भुजम्' (र० १-५६)। दिलीपानुगता नन्दिनी विधियुक्ता श्रद्धेव बभौ। 'श्रद्धेव साक्षाद् विधिनोपपन्ना' (र० २-१६)। रामादिभ्रातृचतुष्टयस्य विनीतत्वं तथैवावर्धत यथा हविषाऽग्निः 'हविषेव हविर्भुजाम्' (र० १०-७९)। **(घ)** विद्याविषयकाः—विद्याऽभ्यासेन यथा चकास्ति तथा नन्दिनी सेवया प्रसादनीया। 'विद्यामभ्यसनेनेव प्रसादयितुमर्हसि' (र० १-८८)। दुष्यन्तपरिणीता शकुन्तला सुशिष्यप्रदत्ता विद्येवाशोचनीयाऽभूत्। 'सुशिष्यपरिदत्ता विद्येवाशोचनीयाऽस्ति संवृत्ता' (शा० अंक ४)। **(ङ)** व्याकरणविषयकाः—अपवादनियमो यथोत्सर्गं बाधते तथा शत्रुघ्नो लवणासुरं बबाधे। 'अपवाद इवोत्सर्गं व्यावर्तयितुमीश्वरः' (र० १५-७)। अध्ययनार्थकादिङ्धातोः प्राक् अधिरुपसर्गो यथा शोभाकृद् व्यर्थश्च तथा शत्रुघ्नेन समं सेना। 'पश्चादध्ययनार्थस्य धातोरधिरिवाभवत्'

(र० १५-९)। (च) राजनीतिविषयकाः—प्रभावशक्तिर्मन्त्रशक्तिरुत्साहशक्तिश्चेति त्रयं यथाऽर्थमक्षयं सूते तथा सुदक्षिणा पुत्रं रघुमसूत। 'त्रिसाधना शक्तिरिवार्थमक्षयम्' (र० ३-१३)। (छ) ज्योतिषविषयकाः—चन्द्रग्रहणानन्तरं यथा रोहिणी शशिनमुपैति तथा शकुन्तला दुष्यन्तमुपगता। 'उपरागान्ते शशिनः समुपगता रोहिणी योगम्' (शा० ७-२२)।

(२) **मूर्तस्यामूर्तरूपेण**—दिलीपः क्षात्रधर्म इवासीत्। 'क्षात्रो धर्म इवाश्रितः' (र० १-१३)। धवलं क्षीरं यशसोपमिमीते—'शुभ्रं यशो मूर्तमिवातितृष्णः' (र० २-६९)। रथं मनोरथेनोपमिमीते—'स्वेनेव पूर्णेन मनोरथेन' (र० २-७२)। रामादयश्चत्वारश्चतुर्वर्ग इवाशोभन्त। 'धर्मार्थकाममोक्षाणामवतार इवाङ्गभाक् (र० १०-८४)। **(३) प्रकृतिविषयकाः**—स्थानाभावादत्र संकेतमात्रं निर्दिश्यन्त उपमाः, ता यथायथं विवेच्याः। (क) सूर्यविषयकाः—सूर्यमिव तेजोमयं सुतं जनय। 'तनयमचिरात् प्राचीवार्कं प्रसूय च पावनम्' (शा० ४-१९)। रामपरशुरामौ शशिदिवाकराविवाशोभेताम्। 'पार्वणौ शशिदिवाकराविव' (र० ११-८२)। (ख) चन्द्रविषयकाः—शोकविकला यक्षपत्नी विधुकलेवालक्ष्यत। 'प्राचीमूले तनुमिव कलामात्रशेषां हिमांशोः (मे० २-२९)। पार्वती दिवा विधुलेखेवाम्लायत्। 'शशाङ्कलेखामिव पश्यतो दिवा०' (कुमार० ५-४८)। सन्ध्या शशिनमिव नन्दिनी श्वेतरोमाङ्कं दधे। 'सन्ध्येव शशिनं नवम्' (र० १-८३)। अन्याश्चन्द्रविषयका उपमा यथा—'इन्दुः क्षीरनिधाविव' (र० १-१२), 'हिमनिर्मुक्तयोर्योगे चित्राचन्द्रमसोरिव' (र० १-४६)। चन्द्रविषयकाश्चान्याः—रघु० २-२९, २-७३, ३-२२, १४-८०। (ग) वृक्षादिविषयकाः—शकुन्तलायाः कमनीयं कलेवरं लतामिवानुचकार। 'अधरः किसलयरागः कोमलविटपानुकारिणौ बाहू। कुसुममिव लोभनीयं यौवनमङ्गेषु सन्नद्धम्' (शा० १-२१)। वल्कलावृता शकुन्तला शैवलावृतं कमलमिव, लक्ष्मान्वितः सुधांशुरिवाशोभत। 'सरसिजमनुविद्धं शैवलेनापि रम्यम्०' (शा० १-२०)। वृक्षादिविषयकाश्चान्या उपमाः—शाकुन्तले ३-७, ४-४, ५-११; र० १४-५४। (घ) पुष्पविषयकाः—खिन्ना यक्षपत्नी साभ्रे दिवसे स्थलकमलिनीव म्लानाऽभूत्। 'साभ्रेऽह्नीव। स्थलकमलिनीं न प्रबुद्धां न सुप्ताम् (मे० २-३०)। मृगः पुष्पराशिरिवास्ते, न च वध्यः। 'न खलु' 'मृदुनि मृगशरीरे पुष्पराशाविवाग्निः' (शा० १-१०)। पुष्पविषयकाश्चान्या उपमाः—कुमार० ५-४, ५-९, ५-२७; रघु० ४-९; शाकु० १-१९, २-८, २-१०, ७-२४। स्थानाभावादन्या उपमाः संकेतमात्रमुपस्थाप्यन्ते। (ङ) पशुविषयकाः—मेघ० १-१९, २-१३; रघु० १-७१, २-३, २-७, १०-८६; शा० ५-५। (च) नद्यादिविषयकाः—मेघ० १-५४; रघु० १-१६, १-७३, ३-२८, ४-३२, १०-८५। (छ) पर्वतादिविषयकाः—र० १-१४, १-६८, २-२९; मे० २-८। (ज) पृथ्वीविषयकाः—र० २-६६; शा० ६-२४। (झ) द्युविषयकाः—र० २-७५। (ञ) वायुविषयकाः—र० ४-८, १०-८२। (ट) अग्निविषयकाः—र० ११-८१; शा० ५-१०। (ठ) मासदिनादिविषयकाः—र० ११-७, १०-८३, २-२०। (ड) वर्षादिविषयकाः—कु० ४-३९, ५-६१; र० १-३६, ४-६१; शा० ३-९, ३-२४। (ढ) खगादिविषयकाः—र० ४-६३, १४-६८। **(४) विविधविषयकाः**—(क) देवविषयकाः—रघु० २-३७, २-४२। (ख) पुरुषविषयकाः—मेघ० १-१५, १-३२, १-५१, १-६२; रघु० १-३। (ग) स्त्रीविषयकाः—मेघ० १-६६; रघु० २-१०।

७. भारवेरर्थगौरवम्

महाकविर्भारविः षष्ठ्यां शताब्द्यामीसवीयाब्दस्य जनिमापेति ६३४ ईसवीये लिखितेन 'ऐहोल' शिलालेखेन निर्विवादं निर्णीयते। भारविर्नाम कविवरोऽयं गीर्वाणगिरो गगने भा रवेरिव चकास्ति। समधिगतमनेनानुपमं यशः स्वकीयेनार्थगौरवसमन्वितेन किरातार्जुनीयनामधेयेन महाकाव्येन। महाकाव्यमेतस्य गुणत्रयेण माधुर्येण प्रसादेनौजसा च परिपूर्णम्। कविवरोऽयं न केवलमासीद् व्याकरणपारङ्गतोऽपि तु नीतिशास्त्रेऽलङ्कार-शास्त्रेऽपि महद् वैचक्षण्यं समासादयत्। कृतिरियं तस्यार्थभारभरितेति दर्शं-दर्शं विपश्चिद्भिः 'भारवेरर्थगौरवम्' इति सादरमुदीर्यते। महाकाव्यस्यैतस्य टीकाकृत् श्रीमल्लिनाथः काव्यमेतत् नारिकेलफलेनोपमिमीते। अभिधत्ते च—'नारिकेलफलसंमितं वचो भारवेः सपदि तद्विभज्यते। स्वादयन्तु रसगर्भनिर्भरं सारमस्य रसिका यथेप्सितम्'।

किं नामार्थगौरवम्? कथं चैतदुपकरोति महाकाव्यस्य? कथं च गुणेनैतेनानुत्तमं यशो भारवेः? इत्येतदत्र विविच्यते। अर्थगौरवं नाम भावगाम्भीर्यं सद्भावभूषाभूषितत्वं च। भावमूलकत्वाद् महाकाव्यस्य, भावभूषया च काव्यगौरवस्य समभिवृद्धेरर्थगौरवं महदुपकारि महाकाव्यस्य। पदे-पदे समुपलभ्यन्ते महाकाव्येऽस्मिन् अर्थभारभरिता विविधविषयकाः सूक्तयः। अनुमीयते चैतेन भारवेर्वैदुष्यम्। शतशोऽत्र सूक्तिमुक्ताः समुपलभ्यन्ते। तासां दिङ्मात्रमिह प्रस्तूयते।

अर्थगौरवस्य महत्त्वमुदीरयता भारविनैव सम्यक् प्रतिपाद्यते यत्तस्य काव्ये सर्वत्र स्फुटताऽर्थगौरवं भावसांकर्याभावः सामर्थ्यं च प्राप्स्यते। यथोच्यते—स्फुटता न पदैरपाकृता, न च न स्वीकृतमर्थगौरवम्। रचिता पृथगर्थता गिरां न च सामर्थ्यमपोहितं क्वचित्। (किराता० २-२७)। सा चैतादृशी भावगाम्भीर्यभरिता भारती सततकृतपुण्य-कर्मभिरेव प्रवर्तते, नान्यथा। 'प्रवर्तते नाकृतपुण्यकर्मणां प्रसन्नगम्भीरपदा सरस्वती' (कि० १४-३)। किं नाम वाग्मित्वम्, कथं च सभ्येषु ते विशेषत आद्रियन्ते, इति विवेचयता तेन साधु प्रतिपाद्यते यन्मनोगतस्य गभीरस्यार्थस्य परिष्कृतया प्राञ्जलया च वाचा प्रकाशनेन वाग्मित्वं समासाद्यते। 'भवन्ति ते सभ्यतमा विपश्चितां, मनोगतं वाचि निवेशयन्ति ये। नयन्ति तेष्वप्युपपन्ननैपुणा गभीरमर्थं कतिचित्प्रकाशताम्'। (कि० १४-४)। भाषणेऽपि च केचनार्थगौरवमाद्रियन्ते, केचन भाषासौष्ठवमपरे माधुर्यमन्ये भावप्रकाशनशैलीम्, इति महति विरोधे वर्तमाने सर्वमनःप्रसादिनी गीः सुदुर्लभा। अतस्तेनोक्तम्—'सुदुर्लभाः सर्वमनोरमा गिरः' (१४-५)। विदुषां कीदृशः स्वभाव इति विवेचयन्नाह विद्वांसो गुणग्रहणे धृतधियो भवन्ति। 'गुणगृह्या वचने विपश्चितः' (२-५)। विद्वांसो हि परेङ्गितज्ञा भवन्ति। इङ्गितज्ञश्च न विषीदति काले। 'न हीङ्गितज्ञोऽवसरेऽव-सीदति' (४-२०)।

प्रेम्णो गौरवं प्रतिपादयता तेनोच्यते—'वसन्ति हि प्रेम्णि गुणा न वस्तुनि' (८-३७)। स्नेहप्राचुर्यमेव गुणानां निधानं, न वस्तुसौन्दर्यमात्रम्। प्रेमी सदैव प्रियस्या-निष्टवारणाय यतते चिन्तयति च। तदाह—'प्रेम पश्यति भयान्यपदेऽपि' (९-७०)।

मित्रलाभश्च लाभोऽपूर्वः । तदाचष्टे—'मित्रलाभमनु लाभसम्पदः' (१३-५२) । विनयः सुशीलता च किमित्युररीकरणीयेति प्रतिपादयन्नाह विनयेनैव योगिनो मुक्तिं समधिगच्छन्ति । 'योगिनां परिणमन् विमुक्तये, केन नास्तु विनयः सतां प्रियः' (१३-४४), शीलयन्ति यतयः सुशीलताम् (१३-४३) । मनोविज्ञानसम्बन्धि सूक्ष्मनिरीक्षणं कुर्वता तेनोच्यते चेतोभावा एव हितैषिणं रिपुं वा प्रकटयन्ति । 'विमलं कलुषीभवच्च चेतः, कथयत्येव हितैषिणं रिपुं वा' (१३-६) । अविज्ञातमपि प्रियमिष्टं वा प्रेक्ष्य जनस्य हृदयं प्रसीदति । 'अविज्ञातेऽपि बन्धौ हि बलात् प्रह्लादते मनः' (११-८) ।

भौतिकविषयाणां स्वरूपविचारे साधु तेन प्रतिपाद्यते यद् विषयाः परिणामे दुःखदाः । 'आपातरम्या विषयाः पर्यन्तपरितापिनः' (११-१२) । अतएव कामानां हेयत्वं प्रतिपादयति । तेषां स्वरूपं च विवृणोति । 'श्रद्धेया विप्रलब्धारः, प्रिया विप्रियकारिणः । सुदुस्त्यजास्त्यजन्तोऽपि कामाः कष्टा हि शत्रवः' (११-३५) । भोगा भुजङ्गफणसदृशाः, भोगप्रवृत्तस्य च विपदवाप्तिः सुनिश्चिता । 'भोगान् भोगानिवाहेयान्, अध्यास्यापन्न दुर्लभा' (११-२३) । अतो विषयान् विहाय गुणार्जने मनो निधेयम् । 'सुलभा रम्यता लोके दुर्लभं हि गुणार्जनम्' (११-११) । गुणैरेव गौरवं प्राप्यते । 'गुरुतां नयन्ति हि गुणा न संहतिः' (१२-१०) । गुणैरेव प्रियत्वं प्राप्यते, न तु परिचयमात्रेण । 'गुणाः प्रियत्वेऽधिकृता न संस्तवः' (४-२५) । गुणैरेव सर्वं जगद् वशीकर्तुं पार्यते । 'कमिवेशते रमयितुं न गुणाः' (६-२४) ।

स्वाभिमानस्य महत्त्वं प्रतिपादयता साध्वभिधीयते तेन यत्स्वाभिमानरहितस्तृणवदगण्यः । 'जन्मिनो मानहीनस्य तृणस्य च समा गतिः' (११-५९) । नहि तेजस्विनं कृशानुवद् भान्तं कश्चिदवज्ञातुमर्हति । 'ज्वलितं न हिरण्यरेतसं चयमास्कन्दति भस्मनां जनः' (२-२०) । पुरुषः स एव यो मानेन जीवति । 'पुरुषस्तावदेवासौ यावन्मानान्न हीयते' (११-६१) । मनस्विना यदेवेप्स्यते तदेवाधिगम्यते । 'किमिवास्ति यन्न सुकरं मनस्विभिः' (१२-६) । नीतिविषयकान्यनेकानि सुभाषितान्युपलभ्यन्ते । तान्यतिसूक्ष्मतयोल्लिख्यन्ते । तानि च यथायथं विवेक्तव्यानि । 'हितं मनोहारि च दुर्लभं वचः' (१-४) । सद्भिरेव मैत्रीं विरोधं च कुर्वीत, नासद्भिः । 'समुन्नयन् भूतिमनार्यसंगमाद् वरं विरोधोऽपि समं महात्मभिः' (१-८) । न बलीयसा युध्येत । 'अहो दुरन्ता बलवद्विरोधिता' (१-२३) । अवन्ध्यकोप उदारसत्त्वश्च स्यात् । 'अवन्ध्यकोपस्य विहन्तुरापदां, भवन्ति वश्याः स्वयमेव देहिनः' (१-३३) । नाविचार्य कस्मिंश्चिदपि कर्मणि प्रवर्तेत । 'सहसा विदधीत न क्रियाम्' (२-३०) । एवं राजनीतिविषयका बहवोऽत्र सूक्तयः । यथा—
'प्रकर्षतन्त्रा हि रणे जयश्रीः' (३-१७), परमं लाभमरातिभङ्गमाहुः' (१३-१२), 'प्रार्थनाऽधिकबले विपत्फला' (१३-६१), न दूषितः शक्तिमतां स्वयंग्रहः' (१४-२०), 'नयहीनादपरज्यते जनः' (२-४९), 'सदाऽनुकूलेषु हि कुर्वते रतिं नृपेष्वमात्येषु च सर्वसम्पदः' (१-५), 'व्रजन्ति ते मूढधियः पराभवं भवन्ति मायाविषु ये न मायिनः (१-३०) ।

८. दण्डिनः पदलालित्यम्

महाकवेर्दण्डिनो जनिकालविषये सन्ति बहवो विप्रतिपत्तयः। समासतः पक्षद्वयं मुख्यत्वेनाङ्गीक्रियते। केचनेसवीयाब्दस्य षष्ठशताब्द्या अन्तिमे चरणेऽस्य जनिमुरीकुर्वन्त्यन्ये च सप्तमशताब्द्या उत्तरार्धे। राजशेखरेण कविरसौ प्रबन्धत्रयस्य प्रणेतेति प्रतिपाद्यते। विषयेऽस्मिन्नपि प्रचुरो विवादः। काव्यादर्शो दशकुमारचरितं चेति ग्रन्थद्वयं तु सर्वैरेव स्वीक्रियते दण्डिनः कृतित्वेन। अवन्तिसुन्दरीकथेति खण्डश उपलब्धा कृतिस्तृतीयेति मन्यते मनीषिभिः कैश्चित्।

दशकुमारचरितमाश्रित्यैवास्य महती महनीयतेति नात्र विप्रतिपत्तिर्विदुषाम्। गद्यकाव्यस्यैतस्य गौरवं पदलालित्यं च प्रेक्षं प्रेक्षं प्रेक्षावतां प्राप्यन्ते प्रभूतानि प्रचुरप्रशस्तिपूर्णानि पद्यानि। 'कविर्दण्डी कविर्दण्डी कविर्दण्डी न संशयः'। केचन वाल्मीकेर्व्यासस्य चानन्तरं दण्डिनमेव महाकवित्वेनाकलयन्ति। 'जाते जगति वाल्मीकौ कविरित्यभिधाऽभवत्। कवी इति ततो व्यासे कवयस्त्वयि दण्डिनि'। मथुराविजयमहाकाव्यस्य रचयित्री गङ्गादेवी (१३८० ई०) तु दण्डिनो वाचं सरस्वत्या मणिदर्पणमेव मनुते। 'आचार्यदण्डिनो वाचामाचान्तामृतसम्पदाम्। विकासो वेधसः पत्न्या विलासमणिदर्पणम्'।

किं नाम पदलालित्यम्? कथं चैतेन काव्यस्य महत्त्वमभिवर्धते? सुतिङन्तं पदमिति सुबन्तं तिङन्तं वा पदमित्यभिधीयते। ललितस्य भावो लालित्यं माधुर्यमिति। यत्र पदेषु वाक्येषु शब्दसंघटनायां वा माधुर्यं श्रुतिसुखदत्वं वा समुपलभ्यते, तत्र पदलालित्यमिति मन्यते। पदलालित्यं शब्दसौष्ठवं चावर्जयति सचेतसां चेतांसीति गुणोऽयं गरिमाणं तनुते काव्यस्य। दशकुमारचरिते दृश्यते गुणस्यैतस्य गौरवम्। तच्चेह समासतो व्याचिख्यासितम्।

मृद्वीकारसभारभरितेव भारती दण्डिन आचार्यस्य। सुधीभिरास्वादनीयं समीक्षणीयं चैतस्या माधुर्यम्। राजहंसस्येव राज्ञो राजहंसस्य सुषमां समवलोकयन्तु सन्तः। "अनवरतयागदक्षिणारक्षितशिष्टविशिष्टविद्यासंभारभासुरभूसुरनिकरः,...राजहंसो नाम घनदर्पकन्दर्पसौन्दर्यसोदर्यहृद्यनिरवद्यरूपो भूपो बभूव" (पूर्वपीठिका उच्छ्वास १)। राजहंसस्य महिषी वसुमती ललनाकुलललामभूताऽभूत्। 'तस्य वसुमती नाम सुमती लीलावती कुलशेखरमणी रमणी बभूव' (पू० उ० १)। मालवेश्वरस्य प्रस्थानवर्णनं कुर्वताऽभिधीयते तेन—'मालवनाथोऽप्यनेकानेकपयूथसनाथो विग्रहः सविग्रह इव साग्रहोऽभिमुखीभूय भूयो निर्जगाम' (पू० उ० १)। राजहंसश्च मालवराजचमूं स्वसैन्यसहितोऽवारुणत्। 'राजहंसस्तु प्रशस्तवीतदैन्यसैन्यसमेतस्तीव्रगत्या निर्गत्याधिकरुषं द्विषं रुरोध' (पू० उ० १)।

विजयार्थं प्रस्थातुकामानां कुमाराणां यमकालंकारालंकृतं वर्णनमदो दण्डिनो वाग्वैभवमेवाविर्भावयति। 'कुमारा माराभिरामा रामाद्यपौरुषा रुषा भस्मीकृतारयो रयोपहसितसमीरणा रणाभियानेन यानेनाभ्युदयाशंसं राजानमकार्षुः।' (पू० उ० २)। ऐन्द्रजालिककृतेन्द्रजालप्रदर्शनरूपेण फणिनां वर्णनमेतत्—'तदनु विषमं विषमुल्बणं वमन्तः

फणालंकरणा रत्नराजिनीराजितराजमन्दिराभोगा भोगिनो भयं जनयन्तो निश्चेरुः' (पू० उ० ५)।

आस्तरणमधिशयानाया राजकन्याया वर्णनमेतद् दण्डिनः सूक्ष्मेक्षिकयेक्षणं वर्णन-वैदग्ध्यं चाविष्करोति। 'अवगाह्य कन्यान्तःपुरं प्रज्वलत्सु मणिप्रदीपेषु'···'कुसुमलवलुलित-पर्यन्ते पर्यंकतले'···'ईषद्विवृतमधुरगुल्मसंधि, आभुग्नश्रोणिमण्डलम्, अतिश्लिष्टचीनांशु-कान्तरीयम्, अनतिवलिततनुतरोदरम्, अर्धलक्ष्याधरकर्णपाशनिभृतकुण्डलम्, आमी-लितलोचनेन्दीवरम्, अविभ्रान्तभ्रूपताकम्'···'चिरविलसनखेदनिश्चलां शरदम्भोधरोत्सङ्ग-शायिनीमिव सौदामिनीं राजकन्यामपश्यत्।' (उत्तर० उ० २)

राज्ञो धर्मवर्धनस्य दुहितरमुपवर्णयति। 'तस्य दुहिता प्रत्यादेश इव श्रियः, प्राणा इव कुसुमधन्वनः, सौकुमार्यविडम्बितनवमालिका, नवमालिका नाम कन्यका।' (उ० उ० ५)। गिरिवरं च वर्णयन्नाह—'अहो रमणीयोऽयं पर्वतनितम्बभागः, कान्त-तरेयं गन्धपाषाणवत्युपत्यका, शिशिरमिदमिन्दीवरारविन्दमकरन्दबिन्दु चन्द्रकोत्तरं गोत्र-वारि, रम्योऽयमनेकवर्णकुसुममञ्जरीभरस्तरुवनाभोगः।'

उत्तरपीठिकायां समग्रः सप्तमोच्छ्वास ओष्ठ्यवर्णरहितः। एतादृशं निबन्धनम-पूर्वमदृष्टचरं च विशालेऽपि विश्ववाङ्मये। ओष्ठ्यवर्णपरिहारेऽपि न परिहीयतेऽत्र शब्द-सौष्ठवं पदलालित्यं च। यथा—'आर्य, कदर्यस्यास्य कदर्थनान्न कदाचिन्निद्रायाति नेत्रे।' 'सखे, सैषा सज्जनाचरिता सरणिः, यदणीयसि कारणेऽनणीयानादरः संदृश्यते'। 'असत्येन नास्यास्यं संसृज्यते'। 'चिरं चरितार्था दीक्षा'। 'न तस्य शक्यं शक्तेरियत्ताज्ञानम्'। 'दिष्ट्या दृष्टेष्टसिद्धिः। इह जगति हि न निरीहं देहिनं श्रियः संश्रयन्ते। श्रेयांसि च सकलान्यनलसानां हस्ते संनिहितानि।' 'असिद्धिरेषा सिद्धिः, यदसन्निधिरिहार्याणाम्। कष्टा चेयं निःसङ्गता, या निरागसं दासजनं त्याजयति। न च निषेधनीया गरीयसां गिरः।' 'तच्छरीरं छिद्रे निधाय नीरान्निरयासिषम्'। 'दृश्यतां शक्तिरार्षी, यत्तस्य यतेरजेयस्येन्द्रि-याणां संस्कारेण नीरजसा नीरजसांनिध्यशालिनि सहर्षालिनि सरसि सरसिजदलसंनिका-शच्छायस्याधिकतरदर्शनीयस्याकारान्तरस्य सिद्धिरासीत्।' 'बहुश्रुते विश्रुते विकचराजीव-सदृशं दृशं चिक्षेप देवो राजवाहनः'। (उत्तर० उ० ७)

'न मां स्निग्धं पश्यति, न स्मितपूर्वं भाषते, न रहस्यानि विवृणोति, न हस्ते स्पृशति, न व्यसनेष्वनुकम्पते, नोत्सवेष्वनुगृह्णाति···।' मृगयालाभांश्च निर्दिशति। शाकुन्तले द्वितीयांके वर्णितेन मृगयालाभेन साम्यमेतद्भजते। 'यथा मृगया ह्युपकारिकी, न तथान्यत्। मेदोऽपकर्षादङ्गानां स्थैर्यकार्कश्यातिलाघवादीनि, शीतोष्णवातवर्षक्षुत्-पिपासासहत्वम्, सत्वानामवस्थान्तरेषु चित्तचेष्टितज्ञानम्।' (उ० उ० ८)।

एवं संलक्ष्यते दण्डिनः कृतौ शब्दयोजनसौष्ठवमनुप्रासमाधुर्यं यमकयोजनं वर्णन-वैशद्यमोष्ठवर्णपरिहाराञ्चितं रम्यं वर्णनं युक्तिप्रत्युक्तिप्रशस्तं पदे पदे पदलालित्यम्। सर्व-मदस्तस्य कृतौ कमनीयतामादधाति।

९. माघे सन्ति त्रयो गुणाः

महाकवेर्माघस्य जन्मविषयेऽस्ति नैकमत्यम्। केचनेसवीयाब्दस्य सप्तमशताब्द्या उत्तरार्धमस्य जन्मसमयमामनन्ति, अन्ये चाष्टमशताब्द्या मध्यभागम्। शिशुपालवधमेवैतस्य महाकवेर्महाकाव्यं केचन प्रस्फुटाः श्लोकाश्च साम्प्रतं समुपलभ्यन्ते। महाकाव्येनैतेनैवास्य महाकवेर्महती महनीया कीर्तिः। महाकाव्यमेतदनुशीलयद्भिरनेकैः कोविदैः प्रणीताः प्रभूताः प्रशस्तयोऽस्य काव्यस्य। काव्यस्यैतस्य हृद्यां भावावलिं चेतसि कृत्वा केनाप्युच्यते—'मेघे माघे गतं वयः'। मेघदूतस्य शिशुपालवधस्य चाध्ययने यातमायुरिति। काव्येऽस्मिन् विशालं शब्दकोषमालोच्य केनाप्युच्यते—'नवसर्गगते माघे नवशब्दो न विद्यते'। नवसर्गाध्ययनेनैव समग्रशब्दकोषावाप्तिर्भवतीति। अत्र प्रसादगुणं माधुर्यगुणं च समीक्ष्य केनाप्युदीर्यते—'काव्येषु माघः' इति। अनर्घराघवनाटककृतो मुरारेः पाण्डित्यपरिपूर्णं नाटकं प्रेक्ष्य केनाप्यभिधीयते यन्मुरारिर्जिज्ञासितश्चेन्माघे मन आधेयम्। 'मुरारिपदचिन्ता चेत्तदा माघे रतिं कुरु'। भारविं सर्वतोभावेन भावावल्याऽतिशयानं माघं प्रेक्ष्य केनापि निगद्यते—'तावद् भा भारवेर्भाति यावन्माघस्य नोदयः'। कालिदासस्यौपम्यं भारवेरर्थगौरवं दण्डिनश्च पदलालित्यं गुणत्रयमेतत् संभूय स्थितमेकत्र प्रेक्ष्य केनापि व्याह्रियत एतत्—'उपमा कालिदासस्य भारवेरर्थगौरवम्। दण्डिनः पदलालित्यं माघे सन्ति त्रयो गुणाः'।

गुणत्रयमेतदेकैकशोऽत्र विविच्यते। प्रथमं तावदुपमैव विचारचर्चामारोहति। समुपलभ्यते उत्कृष्टानामुपमानां प्राचुर्यमत्र। गौराङ्गो नारदः कृतपीतोपवीतो विद्युत्परीतः शरदि घन इव चकाशे। 'कृतोपवीतं हिमशुभ्रमुच्चकैर्घनं घनान्ते तडितां गणैरिव' (शिशु० १-७)। वर्धमानोऽरातिरामय इव दुःखदो न च जातूपेक्ष्यः। 'उत्तिष्ठमानस्तु परो नोपेक्ष्यः पथ्यमिच्छता। समौ हि शिष्टैराम्नातौ वर्त्स्यन्तावामयः स च' (२-१०)। न शाम्यति दुर्जनः सामवादेन। सामवचनानि तस्य क्रोधमुद्दीपयन्त्येव यथा तप्ते सर्पिषि वारिबिन्दवः। 'प्रतप्तस्येव सहसा सर्पिषस्तोयबिन्दवः' (२-५५)। यथा स्वल्पैरेव वर्णैर्ग्रथितं समग्रं वाङ्मयं तथैव स्वल्पैरेव स्वरैर्ग्रथितं समस्तं संगीतशास्त्रम्। 'वर्णैः कतिपयैरेव ग्रथितस्य स्वरैरिव। अनन्ता वाङ्मयस्याहो गेयस्येव विचित्रता' (२-७२)। यथा सत्कविः शब्दमर्थमुभयमादत्ते तथैव विपश्चिदपि दैवं पुरुषार्थञ्चोभयमाश्रयते। 'नालम्बते दैष्टिकतां न निषीदति पौरुषे। शब्दार्थौ सत्कविरिव द्वयं विद्वानपेक्षते' (२-८६)। यथा स्थायिभावं संचारिभावाः पोषयन्ति, तथैव विजिगीषुं भूभृतमन्ये सहायकाः। 'स्थायिनोऽर्थे प्रवर्तन्ते भावाः संचारिणो यथा। रसस्यैकस्य भूयांसस्तथा नेतुर्महीभृतः' (२-८७)। अल्पवयस्का बाला यथा मातरमन्वेति, तथैव प्रातःकालिकी सन्ध्या रजनिमनुगच्छति। 'अनुपतति विरावैः पत्रिणां व्याहरन्ती, रजनिमचिरजाता पूर्वसन्ध्या सुतेव' (११-४०)। कृष्णं दिदृक्षमाणाया रमण्याः कस्याश्चिद् गवाक्षगतं वदनमुदयाद्रिस्थितसुधांशुमण्डलमिव व्यराजत। 'वदनारविन्दमुदयाद्रिकन्दरा—विवरोदरस्थितमिवेन्दुमण्डलम्' (१३-३५)। अपथ्यभक्षणेन यथा ज्वरोऽभिवर्धते तथा युधिष्ठिरकृतकृष्णसपर्यया शिशुपालस्य मन्युस्ती-

प्रतामापेदे। 'मन्युरभजदवगाढतरः समदोषकाल इव देहिनं ज्वरः' (१५-२)। शलभा यथाऽग्निं प्राप्य विनश्यन्ति तथैव कुधियो महतामप्रियमाचरन्तः क्षयं यान्ति। 'महत-स्तरसा विलङ्घयन् निजदोषेण कुधीर्विनश्यति' (१६-३५)। अन्यानि च प्रमुखान्युपमा-स्थलान्यत्र समासतो निर्दिश्यन्ते, तानि यथायथं व्याख्येयानि। (शिशु० १-५, २-२८, २-२९, २-५९, ३-४, ४-११, ६-४६, ९-७९, १०-३८, १५-५, १६-५३, १८-४, १८-२०, १८-३५, १८-४०, १८-५०, १९-१०, १९-२२, १९-४५)।

महती संख्याऽर्थगौरवान्वितानां श्लोकानाम्। कतिपयेऽत्र प्रस्तूयन्ते। सूर्य एव तमस्काण्डमपहर्तुमीष्टे। 'ऋते रवेः क्षालयितुं क्षमेत कः, क्षपातमस्काण्डमलीमसं नभः' (१-३८)। यद् भावि तद् भवतु, परं नोज्झन्ति स्वमानं मानिनः। 'सदाभिमानैकधना हि मानिनः (१-६७)। स्वभावो दुरतिक्रमो, जन्मान्तरेष्वप्यन्वेति जनम्। 'सती च योषित्प्रकृतिश्च निश्चला पुमांसमभ्येति भवान्तरेष्वपि' (१-७२)। मितभाषित्वं महतां गुणः। 'महीयांसः प्रकृत्या मितभाषिणः' (२-१३)। मानिनो न सहन्तेऽवमानं जातु। 'पादाहतं यदुत्थाय मूर्धानमधिरोहति। स्वस्थादेवापमानेऽपि दोहिनस्तद् वरं रजः' (२-४६)। स्वार्थसिद्धिरेव समेषां समीहितम्। 'सर्वः स्वार्थं समीहते' (२-६५)। सत्प्रबन्धस्य को गुणः? 'अनुज्झितार्थ-सम्बन्धः प्रबन्धो दुरुदाहरः' (२-७३)। रसविद् गुणत्रयमेव काव्ये प्रयुङ्क्ते। 'नैकमोजः प्रसादो वा रसभावविदः कवेः' (२-८३)। सामसहितैव दण्डनीतिः साधीयसी। 'मृदु-व्यवहितं तेजो भोक्तुमर्थान् प्रकल्पते' (२-८५)। महतां साहाय्येन क्षुद्रोऽपि सिद्धिं विन्दते। 'बृहत्सहायः कार्यान्तं क्षोदीयानपि गच्छति' (२-१००)। किं नाम रमणीयकम्? 'क्षणे क्षणे यन्नवतामुपैति तदेव रूपं रमणीयतायाः' (४-१७)। सांख्यसिद्धान्तवर्णनम्—'उदा-सितारं निगृहीतमानसै०' (१-३३)। योगराद्धान्तप्रतिपादनम्—'मैत्र्यादिचित्तपरिकर्म-विदो विधाय०' (४-५५)। अरातिकृततिरस्क्रिया दुःसहा। 'परिभवोऽरिभवो हि सुदुःसहः' (६-४५)। न सन्तोऽसद्भिर्विवदन्ते। 'अनुहुंकुरुते घनध्वनिं नहि गोमायुरुतानि केसरी' (१६-२५)। राजाज्ञा परिभाषेव व्यापिनी। 'परिभाषेव गरीयसी यदाज्ञा' (१६-८०)। कट्वपि भेषजं गदहारि। 'अरुच्यमपि रोगघ्नं निसर्गादेव भेषजम्' (१९-८९)। अन्यानि चार्थगौरवसहितानि प्रमुखानि सूक्तानि संकेततो निर्दिश्यन्ते। (शिशु० १-१४, १-७३, २-२२, २-३४, २-४४, २-८६, ३-३१, ३-४२, ३-७५, ४-१६, ४-३७, ११-६, ११-४२, ११-६४, १२-३२, १३-२८, १५-१, १५-१४)।

पदलालित्यं तु पदे पदे प्राप्यते माघे। केचन श्लोका एवात्रोदाह्रियन्ते। 'नव-पलाशपलाशवनं पुरः स्फुटपरागपरागतपंकजम्। मृदुलतान्तलतान्तमलोकयत् स सुरभिं सुरभिं सुमनोभरैः' (६-२)। 'वदनसौरभलोभपरिभ्रमद्भ्रमरसंभ्रमसंभृतशोभया। चलितया विदधे कलमेखलाकलकलोऽलकलोलदृशान्यया' (६-१४)। 'मधुरया मधुबोधितमाधवी-मधुसमृद्धिसमेधितमेधया। मधुकराङ्गनया मुहुरुन्मदध्वनिभृता निभृताक्षरमुज्जगे' (६-२०)। पदलालित्यवन्ति पद्यान्यन्यानि। (शिशु० १-१६, ३-६०, ३-६३, ४-३, ४-१७, ४-३६, ६-१६, ६-३२, ६-६७, ६-६८, ६-६९, ७-२६, ९-१८, १०-९०, ११-१९, १५-१४, २०-५)।

तदेवं दृश्यते गुणत्रयेऽपि महनीयता माघस्य।

१०. बाणोच्छिष्टं जगत्सर्वम्

निखिलेऽपि संस्कृतवाङ्मये कविकुलगुरुः कालिदासो यथा रचनाचातुर्येण कल्पनावैचित्र्येण च पद्यबन्धे गरिष्ठो वरिष्ठश्च, तथैव गद्यकाव्यनिबन्धने कविवरो बाणोऽतिशेतेऽन्यान् सर्वानप्यभिरूपान्। पद्यरचनायां केषुचिदेव पद्येषूक्तिवैचित्र्येण भावगाम्भीर्येण कृतिकौशलेन वाऽपूर्वा छटा संजायतेऽखिलेऽपि काव्ये। परं नैतावतैव संभाव्यते गद्यकाव्येऽपि तादृश्यनुपमा कान्तिः। गद्यकाव्ये तु भूयान् श्रमोऽपेक्ष्यते। पदे पदे वाग्वैचित्र्यमर्थगाम्भीर्यं भाववैभवं कल्पनाकाम्यत्वं च दुर्निवारम्। अतः साधूच्यते—'गद्यं कवीनां निकषं वदन्ति'। गद्यकाव्यबन्धे दण्डी सुबन्धुश्चेति द्वावेवैतौ बाणेन समं सनामग्राहमुल्लेख्यौ। परं बाणो गरिष्ठो वरिष्ठश्चैतेषां भूयिष्ठया भावाभिव्यक्त्या साधिष्ठया शैल्या म्रदिष्ठया मनोहरतया श्रेष्ठया साधुतया प्रेष्ठया पदपरिष्कृत्या च। अतः सोड्ढलेन 'बाणः कवीनामिह चक्रवर्ती०' इत्युक्तम्। धर्मदासेन तरुणीलावण्यमस्य कृतौ दृश्यते। 'रुचिरस्वरवर्णपदा रसभाववती जगन्मनो हरति। सा किं तरुणी ? नहि नहि वाणी बाणस्य मधुरशीलस्य'। गङ्गादेव्या सरस्वतीवीणाध्वनिरेव कृतिष्वस्य निशम्यते। 'वीणापाणिपरामृष्टवीणानिक्वाणहारिणीम्। भावयन्ति कथं वाऽन्ये भट्टबाणस्य भारतीम्।'

महाकवेर्बाणस्य जनिकालविषये वंशादिविषये च न काचन विप्रतिपत्तिः। हर्षचरितस्यादौ तेन वंशादिविवरणं महता विस्तरेणोपस्थाप्यते। जनकोऽस्य चित्रभानुर्जननी राजदेवी च। सम्राजो हर्षस्य समकालीनत्वात् जनिकालोऽस्येसवीयसप्तमशताब्द्याः पूर्वार्धोऽङ्गीक्रियते। हर्षचरितं कादम्बरी चेति ग्रन्थद्वयमस्य प्रधानतः कृतित्वेनाङ्गीक्रियते। कृतयोऽन्या विवादविषया एव विदुषाम्।

बाणस्य वस्तुविवृतौ वर्णने चापूर्वं वैशारद्यं वीक्ष्य मन्त्रमुग्धत्वमनुभवन्ति मनीषिणः। वर्ण्यस्य वस्तुनोऽणुतमामपि विवृतिं न विजहाति, न किञ्चिदुज्झति परस्मै यत्तेन शक्यं वर्णयितुम्। वर्णनानां व्यापित्वात् सर्वाङ्गीणत्वात् सूक्ष्मतमविवरणसमन्वितत्वाच्च 'बाणोच्छिष्टं जगत्सर्वम्' इति भूयोभूयो व्यादिश्यते। एतदेवात्र समासतः समुपस्थाप्यते।

हर्षचरिते कवेर्वर्णनचातुरी बहुशोऽवलोक्यते। तेषु मुख्यत उल्लेख्याः प्रसङ्गाः सन्ति—मुमूर्षोर्नृपस्य प्रभाकरस्य वर्णनम्, वैधव्यदुःखपरिहाराय सतीत्वमाश्रयन्त्या यशोवत्या वर्णनम्, सिंहनादस्योपदेशः, दिवाकरमित्रस्य राज्यश्रीसान्त्वनम्। कवेर्गरिमा कमनीयां कादम्बरीमेवाश्रित्याऽवतिष्ठते इत्यत्र नास्ति विप्रतिपत्तिर्विदुषाम्। यत्र तत्र साङ्गोपाङ्गं वर्णनं महता श्रमेण बाणेनोपस्थाप्यते, तेऽत्र प्रसङ्गा नामग्राहं दिङ्मात्रं प्रस्तूयन्ते। तद्यथा—शूद्रकवर्णनम्, चाण्डालकन्यावर्णनम्, विन्ध्याटवीवर्णनम्, पम्पासरोवर्णनम्, प्रभातवर्णनम्, शबरसेनापतिवर्णनम्, हारीतवर्णनम्, जाबाल्याश्रमवर्णनम्, जाबालिवर्णनम्, सन्ध्यावर्णनम्, उज्जयिनीवर्णनम्, तारापीडवर्णनम्, इन्द्रायुधवर्णनम्, राजभवनवर्णनम्, अच्छोदसरोवर्णनम्, सिद्धायतनवर्णनम्, महाश्वेतावर्णनम्, कादम्बरीवर्णनं च। स्थानाभावादिह न संभाव्यते एतेषां विस्तरशो विवेचनम्। ते यथायथं विलोक्या विवेच्याश्च।

पाञ्चाली रीतिर्बाणस्य। 'शब्दार्थयोः समो गुम्फः पाञ्चाली रीतिरिष्यते' इति बाणोक्तौ शब्दार्थयोर्मञ्जुलः समन्वयः समीक्ष्यते। विषयानुरूपमेव तस्य शब्दावल्यपि

विलोक्यते । यथा विन्ध्याटवीवर्णने ओजःसमासभूयस्त्वम् । 'उन्मदमातङ्गकपोलस्थलगलित-सलिलसिक्तेनेवानवरतमेलावनेन मदगन्धिनान्धकारिता, प्रेताधिपनगरीव सदासन्निहित-मृत्युभीषणा महिषाधिष्ठिता च, कात्यायनीव प्रचलितखड्गभीषणा रक्तचन्दनालंकृता च' । वसन्तवर्णने च माधुर्यमिश्रितत्वम् । 'कोमलमलयमारुतावतारतरङ्गितानङ्गध्वजांशुकेषु, मधुकरकुलकलङ्ककालीकृतकालेयककुसुमकुड्मलेषु, मधुमासदिवसेषु' ।

तस्य वर्णनानि वनितामिव विभूषणानि विभूषयन्त्यलंकरणैरलंकाराः । उपमा-रूपकोत्प्रेक्षाश्लेषविरोधाभासपरिसंख्यैकावल्यादयोऽलंकाराः पदे पदे प्राप्यन्ते तत्तत्प्रसंगेषु । परिसंख्या यथा शूद्रकवर्णने—'यस्मिंश्च राजनि जितजगति पालयति महीं चित्रकर्मसु वर्णसंकराः, रतेषु केशग्रहाः, काव्येषु दृढबन्धाः, शास्त्रेषु चिन्ता' । विरोधाभासो यथा शूद्रकवर्णने—'आयतलोचनमपि सूक्ष्मदर्शनम्, महादोषमपि सकलगुणाधिष्ठानम्, कुपतिमपि कलत्रवल्लभम्, अत्यन्तशुद्धस्वभावमपि कृष्णचरितम्' । श्लेषमूलोपमा यथा चाण्डालकन्यावर्णने—'नक्षत्रमालामिव चित्रश्रवणाभरणभूषिताम्, मूर्च्छामिव मनोहारिणीम्, दिव्ययोषितमिवाकुलीनाम्, निद्रामिव लोचनग्राहिणीम्, अमूर्तामिव स्पर्शवर्जिताम्' । विन्ध्याटवीवर्णने उपमा यथा—'चन्द्रमूर्तिरिव सततमृक्षसार्थानुगता हरिणाध्यासिता च, जानकीव प्रसूतकुशलवा निशाचरपरिगृहीता च' । विरोधाभासो यथा विन्ध्याटवीवर्णने—'अपरिमितबहुलपत्रसंचयापि सप्तपर्णोपशोभिता, क्रूरसत्त्वापि मुनिजनसेविता, पुष्पवत्यपि पवित्रा' । विरोधाभासो यथा शबरसेनापतिवर्णने—'अभिनवयौवनमपि क्षपितबहुवयसम्, कृष्णमप्यसुदर्शनम्, स्वच्छन्दचारमपि दुर्गैकशरणम्' । उत्प्रेक्षा यथा सन्ध्यावर्णने—'अपरसागराम्भसि पतिते दिनकरे पतनवेगोत्थितमम्भःसीकरनिकरमिव तारागणमम्बरमधारयत्' । श्लेषो यथा राजभवनवर्णने—'उत्कृष्टकविगद्यमिव विविधवर्णश्रेणिप्रतिपाद्यमानाभिनवार्थसंचयम्, नाटकमिव पताकाङ्कशोभितम्, पुराणमिव विभागावस्थापितसकलभुवनकोशम्, व्याकरणमिव प्रथममध्यमोत्तमपुरुषविभक्तिस्थितानेकादेशकारकाख्यातसंप्रदानक्रियाव्ययप्रपंचसुस्थितम्' । श्लेषः सन्ध्यावर्णने यथा—'क्रमेण च रविरस्तमुपागत इत्युदन्तमुपलभ्य···अमृतदीधितिरध्यतिष्ठत्' । एकावली यथा महाश्वेताजन्मवर्णने—'क्रमेण च कृतं मे वपुषि वसन्त इव मधुमासेन, मधुमास इव नवपल्लवेन, नवपल्लव इव कुसुमेन, कुसुम इव मधुकरेण, मधुकर इव मदेन नवयौवनेन पदम्' ।

बाणः श्लिष्टसमस्तदीर्घवाक्यप्रयोगमनु प्रयुङ्क्ते लघुपदन्यासां वाक्यावलीम् । स यथैव दक्षो दीर्घवाक्यरचनायां तथैव पटुर्लघुवाक्यप्रयोगेऽपि । यत्र भावगाम्भीर्यमर्थगौरवं च तत्र सरला लघुपदा वाक्यावली, इतरत्र च श्लिष्टा समस्ता दीर्घा च । यथा शुकनासोपदेशेऽर्थगौरवत्वात् लघुपदप्रयागः—'मिथ्यामाहात्म्यगर्वनिर्भराश्च न प्रणमन्ति देवताभ्यः, न पूजयन्ति द्विजातीन्, न मानयन्ति मान्यान्, नार्चयन्त्यर्चनीयान्, नाभ्युत्तिष्ठन्ति गुरून्' । महाश्वेताविलापे, कपिञ्जलकृताक्रन्दने लघूनि वाक्यानि । उज्जयिनीवर्णने, राजभवनवर्णने, शुकनासोपदेशे, पुण्डरीकाय कपिञ्जलोपदेशे च संलक्ष्यते बाणस्यापूर्वा वर्णनचातुरी । स तथा प्रस्तवीति प्रत्येकं वस्तु यथा चित्रपटे स्वतः सन्दृश्यमाना काचित् कथा घटना वोपतिष्ठति ।

११. कारुण्यं भवभूतिरेव तनुते

श्रीभवभूतिः कान्यकुब्जेश्वरस्य श्रीमतो यशोवर्मण आश्रितो महाकविरित्यत्र सर्वेषां सुधियामैकमत्यम्। महाकविना बाणेन हर्षचरिते महाकविगणनाप्रसङ्गे नास्याभिधानमभ्यधायीति महाकवेर्बाणात् पूर्वं जनिकालमस्य नेति निर्णीयते। एवं भवभूतेर्जनिकालः ७०० ईसवीयस्य सन्निधौ स्वीक्रियते। विदर्भ (बरार)-प्रदेशस्थपद्मपुरनगरवास्तव्योऽयं नाम्ना श्रीकण्ठोऽभवत्। पितामहोऽस्य भट्टगोपालो, जनको नीलकण्ठो, जननी जातुकर्णी, गुरुश्च ज्ञाननिधिर्नाम। नाटकत्रयमस्य समुपलभ्यते—महावीरचरितम्, मालतीमाधवम्, उत्तररामचरितं च। व्याकरणन्यायमीमांसाशास्त्रेषु निष्णातत्वादेव 'पदवाक्यप्रमाणज्ञ' इत्युपाधिसमलंकृतोऽभूत्। वेदेष्वन्येषु च शास्त्रेष्वस्याव्याहता गतिः। वाग्देवी वश्येव तमन्ववर्ततेति तथ्यं स्वयमेवोद्घोष्यते तेन। 'यं ब्रह्माणमियं देवी वाग्वश्येवानुवर्तते' (उत्तर० १-२)।

करुणरसनिस्यन्दे नातिशेतेऽन्यो महाकविर्महाकविममुम्। अतः साधूच्यते—'कारुण्यं भवभूतिरेव तनुते'। करुणरसोद्रेकमालोक्यैव कवेरेतस्य कृतिषु कृतिभिः कृतानि कतिपयानि प्रशंसापद्यानि। आर्यासप्तशत्यां (१-३६) श्रीगोवर्धनाचार्यो भवभूतेर्भारतीं भूधरसुतया गौर्योपमिमीते। तत्कृतकारुण्ये ग्रावाणोऽपि रुदन्त्यन्येषां तु का कथा। 'भवभूतेः संबन्धाद् भूधरभूरेव भारती भाति। एतत्कृतकारुण्ये किमन्यथा रोदिति ग्रावा'। कारुण्ये कालिदासादप्यतिरिच्यते। अत उच्यते—'उत्तरे रामचरिते भवभूतिर्विशिष्यते'।

करुणरसप्रवाहपरीक्षया परीक्ष्यते चेन्नाटकत्रयमस्य तर्हि उत्तररामचरितमेव सर्वातिशायि। यथाऽत्र कारुण्यरसनिस्यन्दो, न तथाऽन्यत्र। किं कारुण्यम्? करुणरसस्य प्रवाह एव कारुण्यमिति। इदमत्रावधेयम्। भवभूतिः करुणरसं रसत्वेनैव नातिष्ठतेऽपि तु रसानां समेषां मूलभूतत्वेन करुणमेवैकं रसं मनुते। रसा अन्येऽस्यैव विवर्तरूपेण परिणामरूपेण वा परिणमन्ते इति करुणरसस्य महत्त्वमातिष्ठते। आह च—'एको रसः करुण एव निमित्तभेदाद्, भिन्नः पृथक् पृथगिवाश्रयते विवर्तान्। आवर्तबुद्बुदतरङ्गमयान् विकारान्, अम्भो यथा सलिलमेव हि तत् समग्रम् (उत्तर० ३-४७)। उत्तररामचरिते चोदाह्रियतेऽनेन यत्कथमन्ये रसाः करुणरसमूलका इति। एतदेवात्र विविच्यते उदाह्रियते च।

उत्तररामचरितस्य प्रथमेऽङ्के आदावेव पितृवियोगविषण्णां जानकीमाश्वासयति दाशरथिः। गृहस्थधर्मस्य विघ्नव्याप्तत्वं व्याचष्टे। 'संकटा ह्याहिताग्नीनां प्रत्यवायैर्गृहस्थता (उ० १-८)। बन्धुजनवियोगस्य सन्तापकारित्वं सीतैवाभिधत्ते। 'सन्तापकारिणो बन्धुजनविप्रयोगा भवन्ति' (अंक १)। रामश्च संसारस्यारुन्तुदत्वं विशदयति। 'एते हि हृदयमर्मच्छिदः संसारभावाः' (अंक १)। चित्रवीथ्यां चित्रितानि वृत्तानि वीक्ष्य समुज्जृम्भते तेषां कारुण्यवृत्तिः। जानक्या अग्निपरीक्षायाश्चित्रणं निरीक्ष्य विषण्णां वैदेहीमाश्वासयति—'क्लिष्टो जनः किल जनैरनुरञ्जनीयः०' (१-१४)। जानकीपरिणयचित्रणं प्रेक्ष्य दिवंगतं तातं दशरथं चिन्तयतो विषीदति चेतो रघूद्वहस्य। 'जीवत्सु तातपादेषु' 'ते हि नो दिवसा गताः' (१-१९)। संभोगशृंगारमपि करुणरसमूलकं व्याचष्टे। यथा—कष्टसहस्रसंकुलं काननं विचरतां तेषां जनस्थानमध्यगे प्रस्रवणे गिरौ यामिनीयापनं वर्णयति—'किमपि किमपि मन्दं मन्दमासत्तियोगाद्' 'अविदितगतयामा रात्रिरेव व्यरंसीत्' (१-२७)। चित्रे

रावणकृतजानकीहरणवृत्तं वीक्ष्य खिद्यते चेतश्चारुचरितस्य राघवस्य । जनस्थाने सति सीताहरणे कथमतप्यत राम इति लक्ष्मणो वर्णयति तस्य कारुण्यपूर्णां स्थितिम् । तस्य विक्लवत्वं विलोक्य ग्रावाणोऽप्यरुदन्, वज्रस्यापि हृदयं व्यदलत् । 'अथेदं रक्षोभिः···अपि ग्रावा रोदित्यपि दलति वज्रस्य हृदयम्' (१-२८) । सीताहरणचित्रदर्शनेन विषण्णस्य विलपतश्च दाशरथेरवस्थां वर्णयति बाष्पप्रसरं च मुक्ताहारेणोपमिमीते । 'अयं तावद् बाष्पस्त्रुटित इव मुक्तामणिसरो०' (१-२९) । प्रियवियोगजन्मा दुःखाग्निः कथं पीडयति मानसमिति व्याहरति—'दुःखाग्निर्मनसि पुनर्विपच्यमानो हृन्मर्मव्रण इव वेदनां तनोति' (१-३०) । माल्यवन्नामके गिरौ स्वीयां मोहावस्थां स्मारं स्मारं सीदति स्वान्तं भूयोऽपि राघवस्य । 'विरम विरमातः परं न क्षमोऽस्मि, प्रत्यावृत्तः स पुनरिव मे जानकीविप्रयोगः' (१-३३) । रामबाहुमुपधानत्वेनाश्रित्य यदैव निःशङ्कं स्वपिति सीता, तावदेव समुपतिष्ठते जनप्रवादजन्यो विषमो विषादहेतुर्विप्रयोगः । 'हा हा धिक्···विषमिव सर्वतः प्रसक्तम्' (१-४०) । वैदेह्या वने प्रवासनं व्याधाय शकुन्तसमर्पणमिव प्रतीयते । 'शैशवात्··· गृहशकुन्तिकामिव' (१-४५) । पिशाचेभ्यो बलिवितरणमिव चैतत्कर्म । विस्रम्भाद्··· बलिमिव दारुणः क्षिपामि' (१-४९) । सीताप्रवासनेनासह्यां व्यथामनुभवति रामभद्रः । 'दुःखसंवेदनायैव रामे चैतन्यमागतम्'···(१-४७) ।

शम्बूकप्रसङ्गेन दण्डकारण्यं पञ्चवटीं च प्राप्य जानकीसहवासं स्मारं स्मारं खिद्यतेतमां मनो मनस्विनो रामस्य । रामोऽभिधत्ते—'चिराद् वेगारम्भी प्रसृत इव तीव्रो विषरसः' (२-२६) । सीताप्रवासनेन पापिनमात्मानं गणयन् पञ्चवटीदर्शनापात्रं मन्यते । 'यस्यां ते दिवसास्तया सह०' (२-२८) । मुरला चित्रयति रामावस्थाम्, कथं पुटपाकवद् व्यथयति रामं सीताविवासनशोकः । 'अनिर्भिन्नो गभीरत्वादन्तर्गूढघनव्यथः । पुटपाक-प्रतीकाशो रामस्य करुणो रसः' (३-१) । तमसा दुःखक्षामां जानकीं करुणस्य मूर्तिमेव गणयति । 'करुणस्य मूर्तिरथवा शरीरिणी, विरहव्यथेव वनमेति जानकी' (३-४) । दीर्घ-शोकः शोषयति शरीरं सीतायाः । 'किसलयमिव मुग्धं०' (३-५) । रामः पञ्चवटीदर्शनेन भूयोऽपि मोहमापद्यते । दुःखाग्निरुत्पीडयति तम् । 'अन्तर्लीनस्य दुःखाग्नेः०' (३-९) । शोकाग्निपीडितो नाभिशायते रामः स्वकार्श्यात् । 'नवकुवलयस्निग्धै०'(३-२२)। वासन्ती सोत्प्रासं सीताया उदन्तं पृच्छति रामम् । 'अयि कठोर यशः किल ते प्रियम्०'(३-२७) । सशोकमुत्तरति रामः क्रव्याद्भिस्तस्या भक्षणम् । 'त्रस्तैकहायनकुरङ्ग···क्रव्याद्भिरङ्गलतिका नियतं विलुप्ता' (३-२८) । शोकक्षोभे विलपनमेव चित्तनिग्रहोपायः प्रस्तूयते कविना । 'पूरोत्पीडे तडागस्य परीवाहः प्रतिक्रिया । शोकक्षोभे च हृदयं प्रलापैरेव धार्यते' (३-२९)। रामः स्वावस्थां वर्णयति—कथमन्तस्तापस्तापयति तनूं, न तु हरति जीवितम् । 'दलति हृदयं शोकोद्वेगात्०' (३-३१) । अन्ये च करुणरसाप्लुताः प्रमुखाः श्लोका दिङ्मात्रमत्र निर्दिश्यन्ते । ते यथायथं विवेच्याः । न किल० (३-३२), यथा तिरश्चीन० (३-३५), वेलोल्लोल० (३-३६), हा हा देवि० (३-३८), उपायानां (३-४४), अपत्ये० (४-३), सन्तान०(४-८), यदस्याः०(४-१४), वत्सायाश्च०(४-२२), नूनं त्वया०(४-२३), विना सीतादेव्या०(६-३०), चिरं ध्यात्वा० (६-३८), सम्बन्ध०(६-४०), अनुभाव० (६-४१), जनकानां० (६-४२), विश्वम्भरा० (७-२), सोढश्चिरं० (७-४), दह्यमानेन० (७-७) ।

१२. नैषधं विद्वदौषधम्

श्रीश्रीहर्षमहाकवेः कृतिर्नैषधचरितं कस्य न कृतिनो मानसमावर्जयति। बृहत्त्रय्यामन्यतमैषा कृतिः। भारवेः किरातार्जुनीयं माघस्य शिशुपालवधं श्रीहर्षस्य नैषधचरितं चेति त्रयमेतद् बृहत्त्रय्यां गण्यते। उत्तरोत्तरमेषामुत्कर्षश्चोररीक्रियते। एतद्भावात्मकमेवैतदुद्गीर्यते—'तावद् भा भारवेर्भाति, यावन्माघस्य नोदयः। उदिते नैषधे काव्ये, क्व माघः क्व च भारविः॥'

महाकवेरेतस्य जनकः श्रीहीरो जननी मामल्लदेवी च (नैषध० १-१४५)। कान्यकुब्जेश्वरस्य जयचन्द्रस्याश्रयमाशिश्रियत् कविरयम्, तदादृतिमविन्दत च। 'ताम्बूलद्वयमासनं च लभते यः कान्यकुब्जेश्वरात्' (नै० २२-१५३)। अतोऽस्य जनिकालो द्वादशशताब्द्या उत्तरार्धोऽङ्गीक्रियते। श्रीहर्षो महाकविर्महायोगी च। उभयत्रापि चरमोत्कर्षं लेभे। 'यः साक्षात्कुरुते समाधिषु परं ब्रह्म प्रमोदार्णवम्। यत्काव्यं मधुवर्षि०' (नै० २२-१५३)। सर्गान्तश्लोकेषु ग्रन्थाष्टकस्यान्यस्य नामग्राहं गृह्यते तेन। तत्र चाद्वैतवेदान्तप्रतिपादकः खण्डनखण्डखाद्यमेवैको ग्रन्थः साम्प्रतमुपलभ्यतेऽन्ये च लुप्तप्राया एव। सायासमेतत् तस्य महाकाव्यं, ग्रन्थयश्चात्र विन्यस्तास्तेन महता श्रमेण। अतः श्रमसाध्य एव महाकाव्यस्यैतस्यार्थावगमोऽपि। 'ग्रन्थग्रन्थिरिह क्वचित् क्वचिदपि न्यासि प्रयत्नान्मया। प्राज्ञंमन्यमना हठेन पठिती माऽस्मिन् खलः खेलतु। श्रद्धाराद्धगुरुश्लथीकृतदृढग्रन्थिः समासादयत्वेतत्काव्यरसोर्मिमज्जनसुखव्यासज्जनं सज्जनः'। (नै० २२-१५२)। रमणीलावण्यं हरति चेतः सचेतसो यून एव, न तु किशोराणाम्। तथैव श्रीहर्षकृतिः सुधीभिरेवास्वादनीया, न तु प्राज्ञंमन्यैः। 'यथा यूनस्तद्वत् परमरमणीयापि रमणी, कुमाराणामन्तःकरणहरणं नैव कुरुते। मदुक्तिश्चेदन्तर्मदयति सुधीभूय सुधियः, किमस्या नाम स्यादरसपुरुषानादरभरैः।' (नै० २२-१५०)।

श्रीहर्षो महाकविर्महादार्शनिको महावैयाकरणश्चेत्यादिविविधविरुद्धगुणगणसमन्वयादतिशेते सर्वानन्यान् महाकवीन् पाण्डित्यप्रदर्शने वाग्वैभवे रुचिररचनायां भावाभिव्यक्तौ साधुशब्दसंकलने विद्यावैशारद्ये वक्रोक्तिव्यवहारे च। अनुपमवैदुष्यवैभवाविर्भावात् पाण्डित्यपुटपरिपाकप्रतीकाशः प्रतीयते प्रबन्धोऽस्य। नैकशास्त्रनिष्णातस्यानुपहता गतिरत्रेति 'नैषधं विद्वदौषधम्' इति साह्लादमुद्घोष्यते यशोऽस्य सुधीभिः। प्रतिपदं पदलालित्यावेक्षणात् 'नैषधे पदलालित्यम्' इत्यप्यभिधीयते। एतदेव समासतोऽत्र प्रस्तूयते। विवृतिश्च विद्वद्भिः स्वयमेवाभ्यूह्या।

पदलालित्यवन्तः केचन श्लोका अत्र दिङ्मात्रमुदाह्रियन्ते। अधारि पद्मेषु तदङ्घ्रिणा घृणा० (नैषध० १-२०), मनोरथेन स्वपतीकृतं नलं० (नै० १-३९), अहो अहोभिर्महिमा हिमागमे० (नै० १-४१), अलं नलं रोद्धुममी किलाभवन्० (नै० १-५४), चलन्नलंकृत्य महारयं हयं० (नै० १-६६), दिने दिने त्वं तनुरेधि रेऽधिकं० (नै० १-९०), मदेकपुत्रा जननी जरातुरा० (नै० १-१३५), मुहूर्तमात्रं भवनिन्दया दया० (नै० १-१३६), नलिनं मलिनं विवृण्वती० (२-२३), धन्यासि वैदर्भि गुणैरुदारैः० (३-११६), सकलया कलया किल दंष्ट्रया० (४-७२), लोकेशकेशवशिवानपि यश्चकार० (११-२५), कुमुदमुदमुदेष्यतीमसोढा० (२१-१४६), शृङ्गारभङ्गारसुधाकरेण० (२२-५७)।

विविधविद्यापारदृश्वा श्रीहर्षः। विविधदर्शनसिद्धान्तानां व्याकरणादिशास्त्र-राद्धान्तानां चोल्लेखात् संजायते नैषधचरिते महत् काठिन्यम्। अतो विद्वदौषधमेतत् काव्यमुच्यते। एतदेवात्रातिसमासतो निरूप्यते विव्रियते च। **(१) श्लेषप्रयोगः**—चेतो नलं कामयते मदीयम्० (३-६७) श्लेषमूलकमर्थत्रयमेतस्य। त्रयोदशसर्गे पञ्चनली-वर्णने (१३. २-३४) सर्वेऽपि श्लोका द्वयर्थकास्त्र्यर्थका वा। 'देवः पतिर्विदुषि नैषध-राजगत्या०' (१३-३४) पञ्चार्थकमेतत्पद्यम्। अन्ये च केचन श्लेषमूलाः श्लोकाः—१-३२, १-७७, १-८३, १-१११, १-११५, स्यादस्या नलदं विना न दलने तापस्य कोऽपि क्षमः (४-११६)। **(२) व्याकरणसिद्धान्तवर्णनम्**—क्रियेत चेत्साधुविभक्ति-चिन्ता० (३-२३) इत्यत्र 'अपदं न प्रयुञ्जीत' इत्यस्य वर्णनम्। किं स्थानिवद्भावमधत्त० (१०-१३६) इत्यत्र स्थानिवदादेशो० (१-१-५६) इति सूत्रस्य। अपवर्गे तृतीयेति भणतः पाणिनेरपि (१७-७०) इत्यत्र 'अपवर्गे तृतीया' (२-३-६) इति सूत्रस्य। 'तातङः स्थानिनौ कौ० (१९-६०) इत्यत्र तुह्योस्तातङ्० (७-१-३५) इति सूत्रस्य। अधीतिबोधाचरणप्रचारणैः० (१-४) इत्यनेन 'चतुर्भिः प्रकारैर्विद्योपयुक्ता भवति० (महाभाष्य, प्रथमाह्निक) इत्यस्य। एकशेषः (३-८२, ७-५९), आदेशः (८-१६, १०-१३६), अपादानम् (१७-११८), घु-संज्ञा (१९-६१), तमप् (२१-१५२), आम्रेडितम् (२१-१५६)। **(३) सांख्यसिद्धान्तवर्णनम्**—सत्कार्यवादः—नास्ति जन्यजनकव्यति-भेदः० (५-९४)। **(४) योग०**—सम्प्रज्ञातसमाधिः—सम्प्रज्ञातवासिततमः समपादि (२१-११८)। **(५) न्याय-वैशेषिक०**—परमाणुवादः—आदाविव द्व्यणुककृत्परमाणु-युग्मम् (३-१२५), मनसोऽणुत्वम्—मनोभिरासीदनणुप्रमाणैः (३-३७), न्यायस्य षोडशपदार्थत्वम्—द्विधोदितैः षोडशभिः पदार्थैः(१०-८२), प्रत्यक्षलक्षणम् (१७-१४५), न्यायाभिमतमोक्षस्य परिहासः—मुक्तये यः शिलात्वाय० (१७-७५), वैशेषिकाभिमत-तमःस्वरूपपरिहासः-औलूकमाहुः खलु दर्शनं तत्० (२२-३५)। **(६) मीमांसा०**—देवानामरूपित्वं मन्त्ररूपित्वं च—विश्वरूप० (५-३९), प्रत्यक्षलक्ष्याम्० (१४-७३)। स्वतःप्रामाण्यम्—स्वत एव सतां परार्थता० (२-६१), मानवस्य कर्माधीनत्वमीश्वरा-धीनत्वं वा—अनादिधाविस्वपरम्परायाः० (६-१०२), श्रुतीनां प्रामाण्यम्—श्रुतिं श्रद्धत्थ विक्षिताः० (१७-६१)। **(७) वेदान्त०**—ब्रह्मसाक्षात्कारः—ब्रह्मेव चेतांसि यतव्रता-नाम् (३-३), मुक्तदशा—सा मुक्तसंसारि० (८-१५), लिंगशरीरम्—न तं मनस्तच्च न कायवायवः (९-९४), अद्वैतवादस्य तात्त्विकत्वम्—अद्वैततत्त्व इव सत्यतरेऽपि लोकः (१३-३६)। **(८) बौद्ध०**—बौद्धाभिमतः शून्यवादो विज्ञानवादः साकारतावादश्च—शून्यात्मतावादमयोदरेव० (१०-८८)। **(९) जैन०**—जैनाभिमतरत्नत्रयम्—न्यवेशि रत्नत्रितये जिनेन० (९-७१)। **(१०) चार्वाकदर्शनम्**—वर्णनमेतस्य सप्तदशे सर्गे (१७-३६-८३) विस्तरशः प्राप्यते। एवमेव वेदानां वेदाङ्गानामन्येषां च विषयाणामत्र प्रतिपदं वर्णनं प्राप्यते। विविधशास्त्रादिप्रतिपादितसिद्धान्तवर्णनादेवास्य महाकाव्यस्य प्रतिपदं क्लिष्टत्वमालक्ष्यते। अतः साधूच्यते—नैषधं विद्वदौषधम्।

१३. भारतीया संस्कृतिः

भारतीयसंस्कृतेर्विभूतिविचारे बहवोऽनुयोगाः समापतन्ति चेतसि। तेषां समासतोऽत्र विवरणमुपस्थाप्यते। का नाम संस्कृतिः? कथमिवैषोपकरोत्यात्मनो मनसो जनस्य देशस्य संसृतेर्वा? हेयोपादेयोपेक्ष्या वैषा? उपादेया चेदियं किं स्यात् स्वरूपमस्याः साम्प्रतिक्यां लोकसंस्थितौ? कास्तावत् प्रातिस्विक्यो भारतीयसंस्कृतेः? किमिव हि साध्यं क्षेममिह लोकस्य संस्कृत्याऽनया? कानि च सन्ति कारणानि विश्वसंस्कृतावाप्ततेरस्याः? इत्यादयः। संस्करणं परिष्करणं चेतस आत्मनो वा संस्कृतिरिति समभिधीयते। सा नाम संस्कृतिर्या व्यपनयति मलं मनसश्चाञ्चल्यं चेतसोऽज्ञानावरणमात्मनश्च। पापापनयपूर्वकमेषा प्रसादयति स्वान्तं, दुर्भावदमनपूर्वकं संस्थापयति स्थैर्यं चेतसि, मनःशुद्धिपुरःसरं पावयत्यात्मानमपहरति च चित्तभ्रमम्। संस्कृतिरेवैषा चेतः प्रसादयति, मनोऽमलीकुरुते, दुर्भावान् दमयते, दुर्गुणान् दारयति, पापान्यपाकुरुते, दुःखद्वन्द्वानि दहति, ज्ञानज्योतिर्ज्वलयति, अविद्यातमोऽपहन्ति, भूतिं भावयति, सुखं साधयति, धृतिं धारयति, गुणानागमयति, सत्यं स्थापयति, शान्तिं समादधाति च। न केवलमेषोपकर्त्री व्यष्टेरेवापि तु समष्टेरपि जीवनभूता। उपकरोति चैषाऽऽत्मनो मनसो लोकस्य राष्ट्रस्य संसृतेश्च। अजस्रमेषोपादेया सर्वैरेव स्वसुखमभीप्सुभिः। स्वोन्नतिमभीप्सता न शक्या केनाप्येषा हातुमुपेक्षितुं वा। उज्झितोपेक्षिता वैषा परिणंस्यते स्वात्मविनाशाय लोकाहिताय च। अङ्गीकृतेऽस्या उपादेयत्वं तदेव स्यादस्याः स्वरूपं यत् साम्प्रतिक्या लोकसंस्थित्या नातितरां संभिद्यते। विविधाचारविचारवादव्याकुले विश्वेऽस्मिन् सैव संस्कृतिरुपादेयतामाप्स्यति या समेषां स्वान्तेषु सद्भावाविर्भावपुरःसरं विश्वहितं विश्वबन्धुत्वं विश्वोपकरणं चादर्शत्वेनोररीकुर्यात्। अतः सिध्यत्यदो यद् विश्वजनीना संस्कृतिरेव साम्प्रतमुपादानमर्हति, सैव च तापत्रयसन्तप्तं जगत् तापापनयनेन सुखनिधानं सम्पादयितुं प्रभवति।

भारतीयसंस्कृतेः काश्चन प्रातिस्विक्यो मुख्या विशेषता वाऽत्र प्रस्तूयन्ते। (१) **धर्मप्राधान्यम्**—मानवेषु धर्मप्राधान्यमेव तान् व्यवच्छेदयति पशुभ्यः। अत उक्तम्—'धर्मो हि तेषामधिको विशेषो, धर्मेण हीनाः पशुभिः समानाः'। नहि धर्मपदेन कश्चन सम्प्रदायविशेषोऽत्र विवक्षितः। जगद्धारकाणि मूलतत्त्वानि यमाख्यया व्याख्यातानि शास्त्रेषु धर्मपदवाच्यानि। तदेवोच्यते—'धारणाद् धर्म इत्याहुर्धर्मो धारयते प्रजाः। यः स्याद् धारणसंयुक्तः स धर्म इति निश्चयः'। यमास्तु व्याख्याता योगदर्शने—'अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः' (योग० २-३०)। एत एव शाश्वतिकाः सार्वभौमा महाव्रतमित्युच्यन्ते—'जातिदेशकालसमयानवच्छिन्नाः सार्वभौमा महाव्रतम्'(योग० २-३१)। यश्चैहिकमामुष्मिकं चोभयं क्षेममावहति च धर्म इति व्यवस्थापितं वैशेषिकदर्शनकृता कणादेन 'यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः'। (२) **आध्यात्मिकी भावना**—निखिलमपि संस्कृतवाङ्मयं व्याप्तं भावनयाऽनया। भावनैषा चेतः प्रसादयति, आत्मानं मोक्षाधिगमं प्रति प्रेरयति। उपनिषत्सु गीतायां चास्या भावनाया वर्णितं विविधं महत्त्वम्। अध्यात्मप्रवृत्त्या प्रवर्तते मनसि सहृदयता सहानुभूतिरौदार्यादिकं च। (३) **पारलौकिकी भावना**—जगदिदं विनश्वरं, कीर्तिरेवैकाऽविनाशिनी। भौतिका विषया इमे आपातरम्याः पर्यन्तपरितापिनश्च। एषामाश्रयणेन पतनं सुलभं, दुःखावाप्तिः सुलभा, सुखं तु नितरां

दुर्लभम् । एतस्मादेव हेतोर्धीरा वीराः सुकृतिनश्च कर्तव्यं प्रमुखं मन्वाना विषयसुखानि विहाय प्राणान् तृणवदगणयन्तः समरादिषु वीरगतिं लेभिरे । **(४) सदाचारपालनम्**— 'आचारः परमो धर्मः' इति सिद्धान्तमाश्रित्य सदाचारः सर्वोत्तमं तप इति स पालनीयः । अत उक्तं महाभारते—'वृत्तं यत्नेन संरक्षेद् वित्तमेति च याति च । अक्षीणो वित्ततः क्षीणो वृत्ततस्तु हतो हतः' । ब्रह्मचर्यादिपालनेनेन्द्रियनिग्रहो मनसो दमश्च साधनीयः । **(५) वर्णव्यवस्था**—ब्राह्मणक्षत्रियवैश्यशूद्राश्चत्वार इमे वर्णाः । यो यादृशं कर्म कुरुते तादृशं वर्णमवाप्नोति । सर्वे वर्णाः स्वं स्वं कर्म विदधीरन् । इदमिहावधेयम्—आर्यसंस्कृतौ वर्णव्यवस्था स्वीक्रियते, न तु जातिप्रथा । जन्मना जातिरिति, कर्मणा वर्ण इति । वर्णो वृणोतेः । जनो यत्कर्म वृणोति स तस्य वर्णः । जातिप्रथा सदोषा हेयोपेक्ष्या च, परं वर्णव्यवस्था निर्दोषोपादेया च । **(६) आश्रमव्यवस्था**—ब्रह्मचर्यगृहस्थवानप्रस्थसंन्यासाश्चत्वार एते आश्रमाः । स्ववयोऽनुरूपमाश्रममाश्रयेत्, तदाश्रमनिर्दिष्टनियमान् पालयेच्च । **(७) कर्मवादः**—मनुष्येण सदाऽनासक्तिभावनया कर्म कार्यमिति । कृतस्य कर्मणः फलावाप्तिः सुनिश्चिता । सत्कर्मणा पुण्यं दुष्कर्मणा पापं चाप्नोति । 'अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभम्' । 'पुण्यो वै पुण्येन कर्मणा भवति पापः पापेनैवेति' (वृहदारण्यकम्) । **(८) पुनर्जन्मवादः**—कर्मानुरूपं सर्वस्यापि जन्तोः पुनर्जन्म भवति । 'जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च' (गीता २–२७) । ज्ञानाग्निदग्धकर्माणः केचन यतयो निःश्रेयसमधिगच्छन्ति । **(९) मोक्षः**—मोक्षावाप्तिः परमः पुरुषार्थः । मोक्षमधिगम्य न च पुनरावर्तन्ते । केषांचित् मतेन नियतकालं निःश्रेयससुखमुपभुज्य तेऽप्यावर्तन्त इति । ज्ञानाग्निना सर्वकर्मप्रदाहे मोक्षावाप्तिर्भवतीति । **(१०) श्रुतीनां प्रामाण्यम्**—वेदाश्चत्वारः स्वतःप्रमाणस्वरूपाः, ग्रन्था अन्ये तु तन्मूलकं प्रामाण्यं लभन्तेऽतस्ते परतःप्रमाणरूपाः । श्रुत्युक्तदिशा कर्मानुष्ठानेन श्रेयोऽवाप्तिस्तदन्यथाऽऽचरणेन दुःखाधिगमश्च । **(११) यज्ञस्य महत्त्वम्**—सर्वैरेव जनैः पञ्च यज्ञा दैनिककर्तव्यत्वेनानुष्ठेयाः । यज्ञानुष्ठानेनात्मप्रसादनं देवप्रसादनं चोभयं क्रियते । **(१२) सत्यपरिपालनम्**—मनसा वाचा कर्मणा सत्यमुरीकुर्यादनुतिष्ठेच्च । सर्वथा सत्यं व्यवहरेन्नासत्यम् । सत्यमेव शाश्वतं विजयं लभतेऽनासत्यम् । तथोक्तम्–सत्यमेव जयते नानृतम् । **(१३) अहिंसापालनम्**—'अहिंसा परमो धर्मः' इत्यहिंसैव श्रेष्ठधर्मत्वेनाङ्गीक्रियते । अहिंसयैव साध्या विश्वशान्तिः। **(१४) त्यागमहत्त्वम्**—अनासक्तेनात्मना जगति व्यवहरेत् । न परस्वमभीप्सेत् । पुरुषार्थोपार्जितमेवोपभुञ्जीत । तथा चोक्तं वेदे—'तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद् धनम्' (यजु० ४०–१) । **(१५) तपोमयं जीवनम्**—तपसैव शुध्यति जीवनं मनश्च प्रसीदति । भोगवासनाभिर्विषीदति स्वान्तम् । **(१६) मातृपितृगुरुभक्तिः**—मातृदेवो भव, पितृदेवो भव, आचार्यदेवो भव, इत्येषां देववत्पूज्यत्वमाख्यायते । शुश्रूषयैवैषां सिध्यति सकलमिह संसृतौ ।

विश्वहितस्य विश्वोन्नतेश्च सर्वा एव मूलभूता भावनाः संस्कृतावस्यामुपलभ्यन्ते । एतासामाश्रयणेन सर्वविधा समुन्नतिः सुलभा राष्ट्रस्य विश्वस्य च । गुणवैशिष्ट्यमेवैतस्याः समीक्ष्य समाद्रियते विश्वसंस्कृतावियम् ।

१४. संस्कृतस्य रक्षार्थं प्रसारार्थं चोपायाः

सुविदितमेतत् समेषामपि शेमुषीमतां यद् भारतीया संस्कृतिर्नाधिगन्तुं पार्यते संस्कृतज्ञानमन्तरा। संस्कृतिमन्तरेण निर्जीवं जीवनं जीविनः। संस्कृतिर्हि स्वान्तस्य संस्कर्त्री, सद्भावानां भावयित्री, गुणगणस्य ग्राहयित्री, धैर्यस्य धारयित्री, दमस्य दात्री, सदाचारस्य संचारयित्री, दुर्गुणगणस्य दमयित्री, अविद्यान्धतमसस्यापनोदयित्री, आत्मावबोधस्यावगमयित्री, सुखस्य साधयित्री, शान्तेः सन्धात्री च काचिदनुत्तमा शक्तिः। सेयं संस्कृतिरजस्रं रक्षणीया पालनीया परिवर्धनीयेति भारतीयसंस्कृतेः समुद्धारायावबोधाय च संस्कृतज्ञानमनिवार्यम्। समग्रमपि पुरातनं भारतीयं वाङ्मयं संस्कृतमाश्रित्यावतिष्ठते इति सुविदितम्। न केवलं भारतीयसंस्कृतिसंरक्षणार्थमेवावश्यकं संस्कृतमपि तु संस्कृतमेतत् विविधसंस्कृतिप्रसारसाधनम्, भारतीयभाषाणामभिवृद्धिहेतुः, राष्ट्रभाषायाः समुन्नतेः साधकम्, आर्यभाषाया गौरवस्य प्राणभूतम्, विश्ववाङ्मयस्य पथप्रदर्शकम्, जीवनदर्शनस्य दर्शकम्, आचारशास्त्रस्य शिक्षकम्, पुरुषार्थस्य प्रयोजकम्, विविधविरुद्धसंस्कृतिसमाहारसाधकम्, प्रान्तीयानां प्रादेशिकानां च विकृतीनां विवादानां संघर्षाणां च प्रशमनम्, राष्ट्रीयभावनायाः सद्वृत्ततायाश्चाभिवृद्धेर्मूलम्, वैदिकवाङ्मयालोकस्य प्रसारहेतुः, आध्यात्मिक्या भौतिक्याश्च समुन्नतेः साधनमिति सुतरामवधेया। संस्कृत्या वाङ्मयेन च विहीनस्य देशस्य जातेश्चाधःपतनमनिवार्यम्। द्वयोरेवैतयोः संरक्षणेन संवर्धनेन च समेधते श्रीः सर्वस्या अपि संसृतेः। इत्येतदेवावधार्य संस्कृतस्य संरक्षणस्य प्रचारस्य प्रसारस्य च भूयस्यावश्यकताऽनुभूयते साम्प्रतम्। तद्रक्षणप्रचारप्रसारोपायाश्च समासतोऽत्र विविच्यन्ते समुपस्थाप्यन्ते च।

(१) **संस्कृतकाठिन्यापनोदनम्**—क्लिष्टा दुरूहा दुर्बोधा चेयं गीर्वाणगीरिति लोकानां विचारः प्रशमं नेयः। सरला सुबोधा प्रसादगुणोपेता चेयं प्रयोज्या व्यवहार्या च। सरला सुबोधैव च भाषा प्रचरति प्रसरति चेत्यवगन्तव्यम्। (२) **संस्कृतव्याकरणस्य सरलीकरणम्**—संस्कृतस्य प्रचारे प्रसारे च संस्कृतव्याकरणस्य काठिन्यं महद्बाधकम्। व्याकरणं सरलं कार्यम्। सूत्राणां कण्ठस्थीकरणे न बलमाधेयम्। व्याकरणनियमा अनुवादद्वारा प्रयोगशैल्या च शिक्षणीयाः। प्रयोगशैल्याऽवगता नियमास्तथा बद्धमूला भवन्ति, यथा नान्येनोपायेन। (३) **नवशब्दानामात्मसात्करणम्**—विविधासु भाषासु प्रयुज्यमाना नवभावावबोधका नव्याः शब्दाः संस्कृतशब्दावल्यां संस्कृतस्वरूपप्रदानद्वारा आत्मसात्करणीयाः। संसृतौ व्यवह्रियमाणाः सर्वा एव प्रमुखा भाषाः शैलीमिमामाश्रयन्ते। प्रकारेणैतेन तासां भाषाणां प्रगतिरुद्गतिर्जागृतिश्च संसूच्यते। समादृताऽऽसीत् शैलीयं प्राक् संस्कृतेऽपि। (४) **नवभावावबोधनम्**—विश्वसाहित्ये

प्रयुज्यमानाः सर्वेऽपि भावाः सहर्षमाश्रयणीयाः प्रयोज्याश्च । नवभावावबोधनार्थं नूतना शब्दावली प्रयोज्या निर्मातव्या वा । विदेशीयनवशब्दग्रहणेऽपि न संकोच-प्रवृत्तिरास्थेया । (५) **संस्कृतभाषाव्यवहारः**—जीविता जागृता च सैव भाषा या लोके व्यवह्रियते प्रयुज्यते च । संस्कृतभाषायाः प्रचाराय प्रसाराय चानिवार्यमेतद् यत् संस्कृतज्ञाः संस्कृतमाश्रित्यैव व्यवहरेयुः । भाषणे लेखने वादे विवादे संलापे पत्रादि-व्यवहारे च संस्कृतमेव प्रयुञ्जीरन् । (६) **नवग्रन्थरचना**—नवीनान् विषयानाश्रित्य संस्कृते नवग्रन्थरचना स्यात् । साम्प्रतिके काले प्रचलिताः सर्वेऽपि विषयाः संस्कृत-माध्यमेन सुलभाः स्युः । एतदर्थं विविधविद्यानिष्णाताः संस्कृतज्ञाः सविशेषमुत्तर-दायित्वं भजन्ते । तेषां चैतत्पावनं कर्म । (७) **नवविषयाध्ययनम्**—संस्कृतज्ञानां कृतेऽनिवार्यमेतद् यत्ते संस्कृताध्ययनेन सहैव भूगोलमैतिह्यं विज्ञानादिविषयान् विदेशीया भाषाश्चाधीयीरन् । विविधविद्याऽध्ययनमन्तरेणाशक्यं धियो विस्फुरणम् । (८) **अन्वेषणकार्यम्**—संस्कृतेऽन्वेषणकार्यस्य महत्यावश्यकता । अन्वेषणकार्यमेव गौरवाधायि । अन्वेषणेनैव वाङ्मयस्य महत्त्वमुत्कर्षश्चावगम्यते । एतदर्थं महान् श्रमोऽ-पेक्ष्यते । (९) **संस्कृतग्रन्थानामनुवादः**—संस्कृतस्य प्रचारार्थं प्रसारार्थं चावश्यकमदो यत् सर्वेषामपि प्रमुखानां संस्कृतग्रन्थानां न केवलं भारतीयासु भाषास्वेव प्रामाणिको-ऽनुवादः स्यादपि तु विश्वस्य सर्वास्वेव प्रधानासु भाषासु तेषामनुवादः स्यात् । कार्यं चैतत् सर्वकारप्रयत्नेन तत्सहयोगेन च संभवति । (१०) **सुलभग्रन्थमालाप्रका-शनम्**—सर्वेषामेव प्रमुखानामुपयोगिनां च संस्कृतग्रन्थानां सानुवादोऽल्पमूल्यकं संस्करणं प्रकाशितं स्यात् । महार्घाणां चाकरग्रन्थानां सारांशरूपं संस्करणं सानुवादं प्रचारार्थं प्रका-शितं स्यात् । (११) **वैज्ञानिकशैलीसमाश्रयणम्**—वैज्ञानिकीं शैलीं समाश्रित्य संस्कृतं प्रारिप्सूनां बालानां संस्कृतप्रेमिणां च कृते सुबोधा हृद्याश्च ग्रन्थाः प्रणेयाः । (१२) **संस्कृतस्यानिवार्यशिक्षणम्**—आर्य(हिन्दी)-भाषया सहैव संस्कृतमपि सर्वेषु विद्यालयेष्वनिवार्यं स्यात् । संस्कृतमूलकमेव हिन्दीभाषाज्ञानं श्रेयोवहमिति समेषां सुधिया-मत्रैकमत्यम् । (१३) **पठनपाठनपद्धतिपरिष्कारः**—संस्कृतस्य प्रचारार्थमावश्यकमेतद् यत् संस्कृतस्य पठनपाठनप्रणाली साम्प्रतिकीं वैज्ञानिकीं पद्धतिमनुसरेत् । तत्र च स्यादा-वश्यकः परिष्कारः । (१४) **विलुप्तग्रन्थोद्धारः**—संस्कृतस्यानेके महार्घा ग्रन्था विलुप्ता विलुप्तप्राया जीर्णाः शीर्णा वा यत्र तत्रोपलभ्यन्ते । तेषामभ्युद्धार आवश्यकः । (१५) **सर्वकारसहयोगः**—सर्वमुपरिष्टादभिहितं सर्वकारसहयोगेनैव सम्भवति । सर्वकारस्य कर्तव्यमेतद् यत् स संस्कृतज्ञानाद्रियेत, संस्कृतवाङ्मयप्रसारे साहाय्यमाचरेत्, राजकीय-वृत्तिषु संस्कृतज्ञानमनिवार्यं कुर्यात्, संस्कृतशिक्षोद्धारे प्रयतेत च ।

१५. कस्यैकान्तं सुखमुपनतं दुःखमेकान्ततो वा । (मेघ० उत्तर० ४९)

निखिलं जगदिदं परिवर्तनशालि । प्रतिक्षणं प्रतिपलं सर्वोऽपि भूतग्रामः स्वात्मनि परिवृत्तिमनुभवति । परिवृत्तिधर्मत्वमेवास्य भुवनस्य विलोकं विलोकं विपश्चिद्भिः 'गच्छतीति जगत्' इति निर्वचनमाश्रित्य जगदिति नामधेयं विहितम् । 'संसरति गच्छति चलति वेति संसारः संसृतिर्वा' इति व्युत्पत्तिनिमित्तकं संसारः संसृतिरिति नामद्वयं प्रवर्तितं कोविदैः। जगत्, संसारः, संसृतिरित्यादयः शब्दाः समुद्घोषयन्ति संसारस्य परिवर्तनशालित्वम् । नेह किंचिद् वस्तु शाश्वतं स्थिरमपरिवर्तनशालि वा । यदा सर्वस्य लोकस्येदृश्यवस्था, तदा न संभवति मानवजीवनस्यापरिवृत्तित्वम्, तत्रापि च सुखस्य दुःखस्य वा समावस्थया समवस्थानम् ।

जगति यर्थतवः परिवर्तन्ते, यथा सप्तसप्तिरुदेति विधुरस्तमेति, निशाकरश्चोदयं याति प्रभाकरश्चास्तमुपगच्छति, यथा रात्रेरनन्तरं दिनं दिवसानन्तरं च विभावरी, तथैव सुखानन्तरं दुःखं दुःखानन्तरं च सुखम्, सम्पदनन्तरं विपद् विपदनन्तरं च सम्पदिति । सर्वमेतत् परिवर्तनस्य क्रममात्रम् । एतदेव तथ्यं समीक्ष्य सन्दिशति शाकुन्तले कविकुलगुरुः कालिदासः । 'यात्येकतोऽस्तशिखरं पतिरोषधीनाम्, आविष्कृतोऽरुणपुरःसर एकतोऽर्कः । तेजोद्वयस्य युगपद् व्यसनोदयाभ्यां, लोको नियम्यत इवात्मदशान्तरेषु' ॥ (शाकु० ४-२)। उत्थानं पतनम्, उत्कर्षोऽपकर्षः, जन्म मृत्युः, सम्पत्तिर्विपत्तिः, सुखं दुःखमिति च परिवृत्तेरवस्थान्तरमेव नान्यत् । यथा शैशवं तदनु यौवनं तदनु वार्धकं तदनु देहावसानं तदनु जन्मान्तरं तदनु पुनः शैशवम्, एवमेव जीवने सुखदुःखे परिवर्तेते, परिवृत्तेरवश्यंभावित्वादनिवार्यत्वाच्च ।

संभवति परिवर्तनेऽस्मिन् केषामप्यापत्तिरनिष्टापत्तिर्वा । परं निपुणं विचार्यते तर्हि प्रतीयते परिवृत्तेः सुतरामावश्यकतोपयोगिता च । भुवनेऽस्मिन् नाभविष्यत् परिवर्तनं चेन्नाभविष्यत् प्रगतिरुन्नतिरभ्युदयश्च लोकानाम् । ऋतूनां परिवृत्तिमन्तरेण नाभविष्यद् वसन्तो ग्रीष्मो वर्षा वा । न चेदभविष्यत् सुवृष्टिर्नाभविष्यत् सुभिक्षम् । नाभविष्यच्चेद् दुःखं नानुभूतमभविष्यत् सुखम् । दुःखस्य सत्तैव सुखमनुभावयति,सुखस्य सत्ता च दुःखम् । सुखदुःखस्य समवस्थानमावश्यकम् । यद्येको यावज्जीवं सुखं सम्पत्तिमेवानुभवेदन्यश्च दुःखं विपत्तिमेव वा, तर्हि न प्रसरिष्यति लोकस्थितिः । कर्मणामावश्यकतोपयोगिता चानुभूयते सर्वैरेव । कर्मविपाकोऽपि नियतोऽतः कर्मानुरूपं कश्चित् स्वकृतसुकृतपरिपाकरूपेण सुखमधिगच्छति, तद्विपर्ययेण च दुःखम् । सुखदुःखं परिवर्तमानमेतत् सुतरां शिक्षयति निखिलं जगत् सुकृत्यस्य सत्परिणामित्वं दुष्कृत्यस्य च दुष्परिणामित्वम् ।

परिवृत्तेरेतस्या महत्त्वमालोक्यैव महाकविभिर्विविधाः सूक्तयो विषयेऽस्मिन् वर्णिताः । यथा च—(क) कस्यैकान्तं सुखमुपनतं दुःखमेकान्ततो वा । नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण । (मेघ० २-४९) । (ख) अतोऽपि नैकान्तसुखोऽस्ति कश्चिन्नै-

कान्तदुःखः पुरुषः पृथिव्याम्। (बुद्धचरितम् ११-४३)। (ग) कालक्रमेण जगतः परिवर्तमाना, चक्रारपंक्तिरिव गच्छति भाग्यपंक्तिः। (स्वप्न० १-४)। (घ) भाग्यक्रमेण हि धनानि भवन्ति यान्ति। (मृच्छ० १-१३)। (ङ) चक्रवत् परिवर्तन्ते दुःखानि च सुखानि च। (हितो० १-१७३)

किं नाम सुखं, किञ्च दुःखमिति। सुखदुःखस्य बहूनि लक्षणानि वर्ण्यन्ते विविधैः शास्त्रकारैः। भगवान् मनुरत्र निर्दिशति यत् सर्वमात्माधीनं सुखम्, आत्मायत्तत्वं वा सुखत्वमिति, परायत्तत्वं च दुःखमिति। तदाह—'सर्वं परवशं दुःखं सर्वमात्मवशं सुखम्। एतद् विद्यात् समासेन लक्षणं सुखदुःखयोः'। केचन चान्ये सुखदुःखयोर्लक्षणं निगदन्ति। सु सुष्ठु सुखकरं वा खेभ्य इन्द्रियेभ्य इति सुखम्, ज्ञानेन्द्रियेभ्यः सुखकरं यत् तत्सुखमिति। एवमेव ज्ञानेन्द्रियेभ्यो दुःखकरं यत् तद् दुःखमिति। मन्मत्या तु लक्षणान्तरमपि शब्दयोरनयोः सम्भवति। सुष्ठु खानि सुखानि, दुष्टानि खानि दुःखानीति। इन्द्रियाणि चेत् संयतानि तर्हि सर्वमपि विषयजातं सुखत्वमापद्यते। दुष्टानि चेदिन्द्रियाणि तर्हि सर्वोऽपि विषयग्रामो दुःखत्वेनापतति। इत्थं सुखदुःखशब्दद्वयमेवेन्द्रियसंयमस्य महत्त्वमुपदिशति।

सुखवद् दुःखस्यापि जीवनेऽनल्पं महत्त्वम्। दुःखनिशीथिनीं धृत्योत्तीर्यैव धीराः श्रीकौमुदीमाकांक्षन्ति। अननुभूय दुःखं न सुखं साधूपभुज्यते। अतः साधूच्यते—सुखं हि दुःखान्यनुभूय शोभते (मृच्छ० १-१०), यदेवोपनतं दुःखात् सुखं तद्रसवत्तरम् (विक्रमो० ३-२१)। समीक्ष्यते चैतत्प्रत्यहं यन्न सुखं सुलभं दुःखानुभूतिमन्तरा प्रत्यवायमन्तरेण च। दुःखमनुभूय प्रत्यूहान् निरस्य च श्रेयः सुलभम्। अत एवाभिधीयते—श्रेयांसि लब्धुम सुखानि विनान्तरायैः (किराता० ५-४९), विघ्नवत्यः प्रार्थितार्थसिद्धयः (शाकु० अंक ३)।

कर्मविपाकस्य बलीयस्त्वात् समापतति चेद् दुःखं तर्हि किं नु विधेयं वराकेण विपद्ग्रस्तेन। दुःखोदधौ निमग्नेन धैर्यमेवावलम्बनीयम्। धैर्यमाश्रित्यैव धीरा विपत्पारावार-मुत्तरन्ति। पारावारे पोतभङ्गेऽपि सांयात्रिको धृतिमवष्टभ्य तितीर्षत्येव। उक्तं च—त्याज्यं न धैर्यं विधुरेऽपि काले, धैर्यात् कदाचिद् गतिमाप्नुयात् सः। जाते समुद्रेऽपि च पोतभङ्गे, सांयात्रिको वाञ्छति तर्तुमेव॥ घोरे दुःखेऽपि नर आत्मशक्तिमाश्रयते चेत्स दुःखप्रहाणिं कर्तुं प्रभवति। नहि किंचिदसाध्यमात्मशक्त्या। आत्मशक्तिर्हि सर्वोदयस्य मूलम्। सा दुःखविभावरीं स्वप्रखरांशुभिः सद्यः संहरति। अत उच्यते—उद्धरेदात्मनात्मानं नात्मानमवसादयेत्। आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः॥ धैर्यधना हि साधवः। ते सम्पदि न हृष्यन्ति, न च विपदि विषीदन्ति। अतः सुखदुःखे समे कृत्वा प्रवर्तेत। सम्पदि विपदि च महतामेकरूपतैव लक्ष्यते। यथा चोच्यते—उदेति सविता ताम्रस्ताम्र एवास्तमेति च। सम्पत्तौ च विपत्तौ च महतामेकरूपता॥ अतः सम्पदि न हृष्येत्, न च विपदि विषीदेत्। विपदि धैर्यमाधाय चेतसि स्वीयं कर्तव्यमतिवाहयेत्।

१६. नालम्बते दैष्टिकतां न निषीदति पौरुषे । शब्दार्थौ सत्कविरिव द्वयं विद्वानपेक्षते ॥ (शिशु० २-८६)

दैवस्योद्योगस्य च गुरुलाघवं बलाबलं च निश्चिन्वतां विपश्चितामस्ति गरीयसी विप्रतिपत्तिर्विषयेऽस्मिन् । केचन दिष्ट्या दैवस्य वा माहात्म्यमुद्घोषयन्ति, ते दैष्टिका इत्यभिधीयन्ते । अन्ये पौरुषस्य महत्त्वमाचक्षाणाः पुरुषार्थमेव सिद्धेः सोपानत्वेनाङ्गीकुर्वन्ति । ईदृशे महति विरोधे वर्तमाने केचन मनीषिणो द्वयोरेव समन्वयं श्रेयस्करमाचक्षते । विचारणीयं तावदेतद् यत्कतमा सरणिरिह साधीयसी । यामवलम्ब्य सकलो लोको भुवनेऽस्मिन् भव्यां भूतिं समासाद्य चिरसंचितपुण्यपरिपाकसम्प्राप्तस्य मानवजीवनस्यास्य चरितार्थतां सम्पादयन् ऐहिकमामुष्मिकं चोभयं क्षेममधिगच्छति ।

विमृश्यते तावद् दिष्ट्या एव बलाबलत्वं प्राक् । का नाम दिष्टिः, कथं च प्रभवत्येषा जीवलोकस्योदयास्तमयस्योत्कर्षापकर्षस्य पातोत्पातस्य वा । यदि विचारदृशा निपुणं परीक्ष्यते तर्हि न भूयान् भेदोऽनयोः । प्राक्कृतस्य कर्मण एव नामान्तरं दिष्टिरिति दैवमिति भाग्यमिति वा । अतः साधूच्यते—'पूर्वजन्मकृतं कर्म तद् दैवमिति कथ्यते' । दिष्टिरेव साधकत्वेन बाधकत्वेन चोपतिष्ठते निखिलेषु क्रियमाणेषु कर्मसु । अतः कर्मणां सिद्धिरसिद्धिर्वा दैवाधीनेति व्यवह्रियते । प्राक्कृतकर्मफलपरिपाको नियतोऽतो नियतिरिति च दैवस्य नामान्तरं भवति । न च नियतिः साम्प्रतिकैः कर्मभिरन्यथा भवितुमर्हतीति नियतेर्नियोगोऽधृष्य इति गण्यते । अत्र दैष्टिका उदाहरन्ति—सूर्याचन्द्रमसौ तेजसां वरिष्ठौ नियत्यधीनत्वादेवास्तं समुपगच्छतः । विद्यां पौरुषं चाननुरुध्य लोको दैवानुरूपमेव फलमश्नुते । सुरासुरकृतसमुद्रमन्थने समेऽपि भागे प्राप्तव्ये हरिर्लक्ष्मीं लेभे, हरस्तु हालाहलमेव । उक्तं च—"दैवं फलति सर्वत्र न विद्या न च पौरुषम् । समुद्रमथनाल्लेभे हरिर्लक्ष्मीं हरो विषम् ॥"

प्रतिकूलतामुपगते हि दैवे न मनागपि सिध्यति साध्यम् । अतएवाह माघः—"प्रतिकूलतामुपगते हि विधौ विफलत्वमेति बहुसाधनता । अवलम्बनाय दिनभर्तुरभून्न पतिष्यतः करसहस्रमपि ।" तादृशं दैवस्य प्राबल्यं यज्जनस्य चेतश्चेतयते तदेव यद् दैवमभिलष्यति । अत आह श्रीहर्षः—"अवश्यभव्येष्वनवग्रहग्रहा यया दिशा धावति वेधसः स्पृहा । तृणेन वात्येव तयाऽनुगम्यते जनस्य चित्तेन भृशावशात्मना ।" विरुद्धे हि विधौ श्रमसहस्रमपि वितथं स्यात् । भाग्येऽनुकूले दोषा अपि गुणत्वमायान्ति । उक्तं च—"गुणोऽपि दोषतां याति वक्रीभूते विधातरि । सानुकूले पुनस्तस्मिन् दोषोऽपि च गुणायते ।" दुःखानि सुखानि च भाग्यानुसारमेव संभवन्ति । उच्यते च—'भाग्यक्रमेण हि धनानि भवन्ति यान्ति' । दैवानुसारमेव मनुष्यस्य बुद्धिवृत्तिरपि सम्पद्यते । विधिश्चाघटितघटनापटुर्घटितस्य विघटने च दक्षः । 'अघटितघटितं घटयति, सुघटितघटितानि दुर्घटीकुरुते । विधिरेव तानि घटयति, यानि पुमान्नैव चिन्तयति ।' सिद्धिरसिद्धिश्च दिष्ट्यनुरूपमेव परिणमतः ।

अवितथमेतद्यद् दैवं फलति, सिद्धिश्च दैवाधीना। परन्त्ववगन्तव्यमेतद् यत् पूर्वकृतकर्मपरिपाक एव दैवमिति, नान्यत्। यदि सुनिश्चितमेतदवधारितं तर्हि भाग्यमनुकूलयितुं भवतितरामावश्यकता सुविचारितस्य कर्मणः कठिनस्य श्रमस्य च। अतएवावितथमाह श्रीकृष्णो गीतायाम्—'नियतं कुरु कर्म त्वं, कर्म ज्यायो ह्यकर्मणः। शरीरयात्रापि च ते न प्रसिध्येदकर्मणः'। कर्म च कर्मफलासक्तिं विहायैव कार्यम्। तदेव साफल्यं लम्भयति। 'कर्मण्येवाधिकारस्ते, मा फलेषु कदाचन। मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि।' सत्फलं तपसा श्रमेण सुचरितेन च लभ्यम्। तदेव च परिणमति काले। 'भाग्यानि पूर्वतपसा किल संचितानि, काले फलन्ति पुरुषस्य यथैव वृक्षाः।' भाग्याद् गुरुतरं कर्म, तदेव फलति, तदेव चोपास्यम्। 'नमस्तत्कर्मभ्यो विधिरपि न येभ्यः प्रभवति।'

जगति समेषामपि सत्त्वानां नैसर्गिकीयमिवाञ्छा यत् स्याद् दुःखात्ययः सुखाधिगमश्च। का नु वरीयसी सृतिरिह स्वीकार्या साध्यमेतत् साधयितुम्। शान्तेन स्वान्तेन चिन्त्यते चेत्तर्हि पुरुषार्थमन्तरा न साधनान्तरं दृष्टिपथमुपयाति। धीरा वा, वीरा वा, मनीषिणो वा, वाग्वैभवसम्पन्ना वाग्मिनो वा, कविताकामिनीकान्ताः कविवरा वा, सर्वेऽपि पौरुषमाश्रित्यैवाभीष्टां सिद्धिमधिजग्मुः। अकर्मण्यताऽऽलस्यं पौरुषहीनत्वं दैष्टिकता वाऽत्र प्रत्यवायरूपेणावतिष्ठते। यद्यस्ति हार्दिकी सुखलिप्सा, अभीष्टमात्महितं, चिकीर्षितं परहितं, कांक्षितं कुलहितं, वाञ्छितं विश्वहितं, समीहितं समाजसुखं वा तर्हि आलस्यं नाम रिपुरपनेयश्चेतसोऽपहरणीयाऽकर्मण्यताऽपहस्तयितव्यं चापौरुषत्वम्। उद्यम उद्योगोऽध्यवसायो वा मानवस्यानुपमो बन्धुः। यमवष्टभ्य यदभिलषितं तदधिगम्यते। तथा चोच्यते—'आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः। नास्त्युद्यमसमो बन्धुः कृत्वा यं नावसीदति'। योगवासिष्ठेऽप्यभिधीयते—'पौरुषाद् दृश्यते सिद्धिः पौरुषाद् धीमतां क्रमः'। यावज्जीवं जीवः कर्मनिरतोऽध्यवसायपरश्च स्यात्, कर्मफलासक्तिं च परिहरेन्मनसेत्यादिशति वेदः। पथाऽनेनैवाभीप्सितमखिलं सिध्यति सताम्। 'कुर्वन्नेवेह कर्माणि जिजीविषेच्छतँ समाः। एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे' (यजु० ४०-२)। या काऽपि सिद्धिरभीष्टा, साऽविकला शक्यते लब्धुमुद्यमेनैवेति चेच्चेतसि क्रियते तर्हि नालभ्यं किंचिदस्ति जगति। अतः साधूक्तम्—'उद्यमेन हि सिध्यन्ति कार्याणि न मनोरथैः'। 'उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः'। अध्यवसायिन एव साहाय्यमाचरति विभुरपि। यथा चोक्तम्—'उद्यमः साहसं धैर्यं बुद्धिः शक्तिः पराक्रमः। षडेते यत्र वर्तन्ते तत्र देवः सहायकृत्।'

पक्षद्वयस्य बलाबलत्वविवेचनेन सिध्यत्यदो यत् सुविचार्य कृतमवदातं कर्म साधयति साध्यमिह जगति, तदेव च संस्काररूपेणावशिष्टं दैवमिति भवति, प्रवर्तयति च भाविकर्मजातम्। अत उभयस्याश्रयणं न्याय्यम्।

१७. सहसा विदधीत न क्रियाम् (किराता० २-३०)

महाकवेर्भारवेर्महाकाव्ये किरातार्जुनीये सन्ति शतशः सूक्तिमुक्ताः। तत्रापि द्वित्राः सन्ति सूक्तयो याश्चकासति तरणिश्रियमिव। तास्वप्यन्यतमैषा सूक्तिः। सूक्तं तेन महाकविना यन्न जनः कोऽपि सहसा किमपि विधेयं विदधीत, यतो ह्यविवेकः परमापदां पदमस्ति। ये च विमृश्यकारिणो भवन्ति त एव श्रियः श्रयन्ते। यथोक्तं तेन—"सहसा विदधीत न क्रियामविवेकः परमापदां पदम्। वृणुते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः।"

को नाम विवेकः ? कश्चाविवेकः ? क उपयोगो विवेकस्य ? किमिह साध्यं विवेकेन ? यदि नोपादीयतेऽयं कथमिव विपदां निदानत्वेन परिणमते ? विवेचनमेव विवेक इति। सदसतोः पुण्यापुण्ययोः कर्तव्याकर्तव्ययोर्हेयोपादेययोश्च येन विधिवत् विवेचनं क्रियते स विवेक इत्यभिधीयते। इतरश्चाविवेक इत्याख्यायते। विवेकस्य महत्युपयोगिता जीवनेऽस्मिन्। विवेक एव सदसतोः पापपुण्ययोः कर्माकर्मणोश्च फलाफलं गुरुलाघवं च चिन्तयति। स एव किं ग्राह्यं किं हेयं किञ्चोपेक्ष्यमिति सन्दिशति। विवेक एवेह जगति ज्ञानमिति, बुद्धिरिति, धीरिति च व्यवह्रियते। विवेकमन्तरेण न भूयान् भेदो मनुष्येषु पशुषु च। अस्ति मानवे विवेकशक्तिः। यया सोऽर्थमनर्थं च बहुधा विभाव्यार्थसाधकमुपादत्तेऽनर्थसाधकं चोज्झति। जीवने हि सर्वस्येष्टं सुखम्। सर्वो हि यतते सुखावाप्तये। नहि दुर्जनोऽपि खलोऽपि मूढोऽपि हीनेन्द्रियोऽपि दुःखमिष्टत्वेन गणयति। सोऽपि सुखमेव कामयते, यतते च तल्लाभाय। अङ्गीकृतायामीदृश्यामवस्थायां को नु मार्गो यः सुखसाधकत्वेन प्रवर्तेत। विचारचक्षुषा चिन्त्यते चेद् विवेकस्य महत्त्वं स्फुटं प्रतीयते। सर्वमपि साध्यं साध्यते विवेकेनैव। विवेकपूर्वा कृतिरेव लम्भयति श्रियम्। विवेक एव सुखस्य मूलम्, शान्तेर्निधानम्, धृत्या निदानम्, श्रिय आश्रयः, गुणानामागारम्, विभवस्य भूमिः, उन्नतेः साधनम्, सत्कर्मणामाकरः, विनयस्य कारणम्, शीलस्य सन्धायकश्च। विवेक उपादत्तश्चेद् न जीवनेऽवसादावसरः। अनुपादत्तश्चेदयं प्रतिपलं प्रतिपदं चोपतिष्ठन्ते विपदो दुःखानि प्रत्यूहाश्च।

ये हि विपश्चितो विचारशीलाश्च ते प्रतिपदं सम्यगवधार्य वस्तुस्थितिं शान्तेन स्वान्तेन कर्तव्यस्याकर्तव्यस्य च गुरुलाघवं विमृश्य यद् हितसाधकं सुखकारकं तदेवोपाददते। नहि भयाद् वा ह्रिया वा सहसा वा किञ्चित्तेऽनुतिष्ठन्ति। यत्कर्म सुविचार्य क्रियते तत् सत्फलमादधाति। अत उच्यते—सुचिन्त्य चोक्तं सुविचार्य यत्कृतं, सुदीर्घकालेऽपि न याति विक्रियाम् (हितोपदेशः १-२२)। ये चाविचार्य कर्मणि प्रवर्तन्ते, तेषां प्रवृत्तिरज्ञानमूला। अज्ञानं हि सर्वासामापदामास्पदम्। अज्ञानावृतत्वात् तेषां कर्मणां दुःखावाप्तिरेव सुलभा। तादृशा जना दिङ्मूढा इव सुखं दुःखमिति मन्यन्ते, दुःखं च सुखम्, पापं सुखसाधनमिति, पुण्यं च दुःखसाधनमिति। एवं ते व्यसनशतशरव्यतामुपगच्छन्ति, प्रत्यहमवनतिं चोपगच्छन्ति। अत उक्तं भर्तृहरिणा—'विवेकभ्रष्टानां भवति विनिपातः शतमुखः' (नीति० १०)।

विपश्चितो हि विचार्य सर्वमपि क्रियाकलापं कर्मणि प्रवर्तन्ते। सुधियामवनिभृतां चैष परमो गुणो यद्विमृश्य ते कर्मसु प्रवृत्तिमादधते। भूभृतां मन्त्रशक्तिर्विचारमूलैव। किं

कार्यं कश्च तस्योपाय इति भृशं विविच्य ते कर्तव्यं कर्म निश्चिन्वन्ति। यद्यविचार्यैव निश्चीयते किञ्चित् तर्हि तत्फलं दुःखावहमेव भविता। एवं विद्वांसोऽपि यत् किञ्चिदपि स्यात् कर्तव्यं तत्र परिणतिं प्रधानतोऽवधारयन्ति। नहि ते सहसा कर्तव्यमकर्तव्यं वा विनिश्चित्य कर्मसु प्रवर्तन्ते। सहसा विहितं विधेयं दुःखं लम्भयति, चेतसि च शल्यतुल्यमाघातं विधत्ते। अतः साधूक्तं केनापि—'गुणवदगुणवद्वा कुर्वता कार्यमादौ, परिणतिरवधार्या यत्नतः पण्डितेन। अतिरभसकृतानां कर्मणामाविपत्तेर्भवति हृदयदाही शल्यतुल्यो विपाकः'।

एष एवाभिप्रायश्चरकसंहितायामप्युपलभ्यते—'परीक्ष्यकारिणो हि कुशला भवन्ति'। 'नापरीक्षितमभिनिविशेत' 'सम्यक्प्रयोगनिमित्ता हि सर्वकर्मणां सिद्धिरिष्टा। व्यापच्चासम्यक्प्रयोगनिमित्ता'। भगवता चरकेनापि कर्तव्यस्य कर्मणः परीक्षणमनिवार्यत्वेन गण्यते। यदि सम्यग् विचार्य कर्तव्यं निर्धार्यते तर्हि तस्य साफल्यमपि प्रागेवानुमातुं पार्यते। अविचार्य कृते कर्मणि न केवलमसाफल्यमेव, विपद् शरीरक्लेशः साधनात्ययः प्रत्यवायावाप्तिश्च। महाभारतेऽपि व्यासेन सुविचार्य कर्मप्रवृत्तिरुपदिष्टा। विमृश्यकारी सुखमेधते, श्रियमश्नुते, प्रत्यूहानपहन्ति, विपद् विदारयति, साध्यं साधयति। उक्तं च महाभारते—'चिरकारक भद्रं ते, भद्रं ते चिरकारक'।

अनालोच्य शुभाशुभं जनो यत् कर्मणि प्रवर्तते, तस्य मूलमज्ञानमेव। अज्ञानावृतचेतसो हि मिथ्यामाहात्म्यगर्वनिर्भराः प्राज्ञमन्याः कर्तव्याकर्तव्यविवेचनमप्यात्मप्रज्ञापरिभवत्वेनाकलयन्ति, न शुश्रूषन्ते साधूनामुपदिष्टम्, क्रियाविलम्बमन्तरायान्तरणमवगच्छन्ति, क्षिप्रकारित्वं श्रियः साधनं गणयन्ति। एवंविधयाऽऽत्मविडम्बनया विप्रलब्धास्तेऽतिरभसकारित्वाद् न केवलं विपत्पारावार एव निमज्जन्ति, अपितु सर्वलोकस्योपहास्यतामवाप्य दुःखदुःखेन कालमतिवाहयन्ति। केचन हतबुद्धित्वादज्ञानतमःप्रसरेण पीड्यमाना यथैवोपदिश्यते परैस्तथैवाचर्यते तैः। न ते स्वविवेकोपयोगेन साध्वसाधु वा निर्णेतुमध्यवस्यन्ति। परिणतिस्तु तस्य विपदुपताप एव। अतो निगदितं कालिदासेन—'सन्तः परीक्ष्यान्यतरद् भजन्ते। मूढः परप्रत्ययनेयबुद्धिः।'

विवेकमूलः सुविचारश्चेदाश्रीयते आश्रयत्वेन, नह्यसाध्यमिह किञ्चिज्जगति। प्रत्यहं समीक्ष्यते सर्वस्यां संसृतौ देशैरनेकैः स्वराष्ट्रोद्धाराय प्रवर्त्यमाना विविधा योजनाः। भारतेऽपि पञ्चवर्षीया योजनाः प्रयुक्तचराः प्रयुज्यमानाः प्रयोक्ष्यमाणाश्चावेक्ष्यन्ते। विवेकमूलत्वादेवैतासां साफल्यमिष्यते संभाव्यते च। विपश्चितोऽपि विवेकजीवित्वात् जीवनस्य कार्यक्रमं विमृश्यावधारयन्ति। अध्यवसायावसिक्तेन मनसा मुहुर्मुहुर्यतमानास्ते स्वाभीप्सितमाश्रयन्ते।

भारतीयैतिह्यमीक्ष्यते चेत्तत्राप्यविचार्यकारित्वादेव विविधा विपदो वीक्ष्यन्ते। दाशरथी रामः सुवर्णमृगं प्रेक्ष्याविचार्यकारित्वादेव तमन्वधावत्। तत्कृत्यं च तस्य जानकीहरणत्वेन परिणेमे। गुरुलाघवमविमृश्यैव रावणोऽपि सीताहरणे प्रवृत्तो निधनमवाप्तश्च सबान्धवः। अविवेकमाश्रित्यैव दुर्योधनोऽपि सूच्यग्रमात्रभूप्रदानेऽपि कार्पण्यं भेजे। तद्विपाकत्वेन महाभारतसमरे सपरिवारः सपरिजनः स्वेष्टजनसहितः सकलामवनिं विहाय दिवमशिश्रियत्। अतो विचार्यैव कृतिरनुष्ठेया, अतिरभसत्वं च विपन्मूलकत्वेन परिहरणीयम्।

१८. ज्वलितं न हिरण्यरेतसं चयमास्कन्दति भस्मनां जनः।

(किराता० २-२०)

सूक्तिमुक्तेयमुपलभ्यते महाकवेर्भारवेः कृतौ किरातार्जुनीये। कविरिहोपदिशति तेजस्वितायां मानितायाश्च महत्त्वम्। प्रज्वलितमग्निमाक्रमितुं नोत्सहते धृष्टोऽपि कश्चित्, परं भस्मनां पुञ्जं लघुरपि जनः प्रभवत्याक्रमितुम्। कोऽत्र भेदः? प्रदीप्तोऽग्निर्दाहगुणसमवेतस्तेजसा समन्वितश्च प्रभवति दग्धुं निखिलं जगदिदम्। तत्तेजस्तनोति साध्वसमतुलं स्वान्तेऽपि सन्त्रासंकस्य। न धृष्णोति धृष्टोऽपि धाष्ट्र्यमाधातुं मनसि कृशानुधर्षणस्य। भस्मानि तु निस्तेजांसि। नानुभवन्ति तानि मानावमानम्। अतस्तेषां धर्षणं शक्यम्। एवमेव मानिनोऽपि सहर्षमसूनुज्झन्ति, न तु स्वतेजस्त्यजन्ति। अतो निगद्यते भारविणा—'ज्वलितं न हिरण्यरेतसं चयमास्कन्दति भस्मनां जनः। अभिभूतिभयादसूनतः सुखमुज्झन्ति न धाम मानिनः' (किराता० २-२०)।

किं नाम जीवनम्? किं नाम पुरुषत्वम्? के गुणास्ते ये जीवनं साफल्यं लम्भयन्ति, पुरुषे पौरुषञ्चादधति? तदेव जीवनं येन स्थास्नु यशश्चीयते, सुखमुपभुज्यते, शान्तिः स्थिरीक्रियते। तदेव पुरुषत्वं यत्र तेजः स्वाभिमानिता पौरुषं च प्राधान्येनाश्रयं लभते। तेजस्विता मानिता गुणार्जनं श्रीसंग्रहश्चेति गुणाः सर्वेषामेव जीवनानि सफलयन्ति, पुरुषे पौरुषमाविष्कुर्वन्ति च। भारविर्लक्षयति पुरुषत्वं यन्मानित्वमेव प्रधानं पुरुषस्य लक्षणम्, मानविहीनो न नरः। 'पुरुषस्तावदेवासौ यावन्मानान्न हीयते' (कि० ११-६१)। विजहाति चेन्मानं स तृणवदगण्यो निरर्थकं च तस्य जन्म। 'जन्मिनो मानहीनस्य तृणस्य च समा गतिः' (कि० ११-५९)।

मानश्चेदभीप्सितः, कस्तदवाप्त्युपायः? भारविस्तदवाप्तिसाधनमभिदधाति तेज इति। 'स्थिता तेजसि मानिता' (कि० १५-२१)। तेजस्वितागुणमेवावष्टभ्य मानिता प्रवर्तते प्रवर्धते च। यत्र तेजस्विता तत्रैव यशः श्रीर्गुणगणाश्च। तेजस्विनो हि विराजन्ते तरणिवदाभया। ते दुष्करमपि सुकरं दुर्गममपि सुगमं दुर्लभमपि सुलभं दुःसहमपि सुसहं सम्पादयन्ति। न तेषां वयो विचार्यते। बाल एव रामः खरदूषणवधं विधातुमशकत्। अत आह कालिदासः—'तेजसां हि न वयः समीक्ष्यते' (रघु० ११-१)। यश्च तेजसा परिहीयते परिक्षीयते तत्र मानिता। मानपरिक्षये च सर्वे गुणा अपि तत्र क्षयमेवाश्रयन्ते। निर्वाणे तु दीपके ज्योतिरपि तदाश्रयमुज्झति। तदाह—'तेजोविहीनं विजहाति दर्पः, शान्तार्चिषं दीपमिव प्रकाशः' (कि० १७-१६)। निस्तेजाः सर्वत्रैवावगण्यते परिभूयते धिक्क्रियते धृष्यते च। तस्य निस्तेजस्त्वमजस्रमवमानमावहति। अतो निगदितं भासेन—'मृदुः परिभूयते' (प्रतिमा० १-१८)। उक्तं च मृच्छकटिके शूद्रकेण—'निस्तेजाः परिभूयते' (१-१४)। तेजसा सममेव समेधते स्वावलम्बनस्य साधीयसी साधना। तेजस्विनो न पराश्रयमपेक्षन्ते, न च परसाहाय्यमेव समीहन्ते। ते स्वतेजसा जगद् व्याप्नुवन्ति। तदुच्यते—'लघयन् खलु तेजसा जगन्न महानिच्छति भूतिमन्यतः' (किराता० २-१८)।

महाकविना माघेनापि तेजस्वितायाः मानितायाश्च महत्त्वं बहुधा वर्णितम्। मानिनोऽवमन्तॄन् समूलमुन्मूल्यैव शान्तिं श्रयन्ते, यथा सप्तसप्तिः समस्तं नैशं तिमिरमपा-

कृत्यैवोदेति । 'समूलघातमघ्नन्तः परान्नोद्यन्ति मानिनः । प्रध्वंसितान्धतमसस्तत्रोदाहरणं रविः ।' (शिशु० २-३३) । परावमानं यः सहते, न स पुंशब्दभाक् । तादृशस्य नराधमस्याजनिरेव श्रेयसी । स केवलं मातृक्लेशकारी । 'मा जीवन् यः परावज्ञादुःखदग्धोऽपि जीवति ।' (शि० २-४५) । पादाहतं रजोऽप्युत्थाय मूर्धानमारोहति । योऽपमानेऽपि गतव्यथः स रजसोऽपि हीनः । 'पादाहतं यदुत्थाय मूर्धानमधिरोहति । स्वस्थादेवापमानेऽपि देहिनस्तद् वरं रजः ।' (शि० २-४६) । तिग्मता प्रतापाय म्रदिमा परिभवाय चेति स्फुटं समीक्ष्यते । राहुद्रु तं ग्रसते चन्द्रं, भानुं च चिरेण । 'तुल्येऽपराधे' 'तन्म्रदिम्नः स्फुटं फलम्' (शि० २-४९) ।

महाकविना कालिदासेनापि तेजस्विताया महिमोररीक्रियतेऽभिधीयते च । ऋषयः शान्तिसमन्विता अपि तेजोमयाः । सति चाभिभवे सूर्यकान्तमणिवद् उद्गिरन्ति तेजः । न ते सहन्तेऽभिभवं जातु । 'शमप्रधानेषु तपोधनेषु गूढं हि दाहात्मकमस्ति तेजः० ।' (शाकु० २-७) । सत्यभिभवे प्रज्वलति जातवेदाः, सति च परिभवे तेजस्विनोऽपि स्वमुग्रं रूपं धारयन्ति । 'ज्वलति चलितेन्धनोऽग्निर्विप्रकृतः पन्नगः फणां कुरुते । प्रायः स्वं महिमानं क्षोभात् प्रतिपद्यते हि जनः ।' (शा० ६-३१) ।

सन्तः सदैव श्रेयस्करमाचक्षते यश एव । विनश्वरे जगति यश एवैकं स्थास्नु । यशसे एव जीवन्ति म्रियन्ते च साधवः । यश एव परमं धनं मन्वते मानिनः । उच्यते च—'यशोधनानां हि यशो गरीयः' 'कीर्तिर्यस्य स जीवति' । श्रीरनुयाति तादृशान् मानिनो यशस्विनश्च । मानिनो गत्वरैरसुभिः स्थायि यशश्चिचीषन्ति । तथोक्तं भारविणा—'अभिमानधनस्य गत्वरैरसुभिः स्थास्नु यशश्चिचीषतः । अचिरांशुविलासचञ्चला ननु लक्ष्मीः फलमानुषङ्गिकम् ।' (कि० २-१९) । अवधेयमिह चैतत् । ये हि मानिनो मानमेव प्रधानतो गणयन्ति, न ते जात्वभिलषन्ति श्रियम् । श्रियमवमत्य मानमाद्रियन्ते । मानस्य सम्पदश्चैकत्रावस्थानं सुदुर्लभम् । तदुच्यते भारविणा—'न मानिता चास्ति भवन्ति च श्रियः' (कि० १४-१३) ।

तेजोऽवाप्तये सम्पद्यतेतरामावश्यकता गुणार्जनस्य । नान्तरेण गुणसंग्रहं मानिता तेजस्विता वा संभवति । गुणार्जनं मूलं मानितायास्तेजस्वितायाश्च । गुणैरेवावाप्यते यशो महिमा च । गुणैरेव गौरवावाप्तिरादरास्पदत्वं च । उक्तं च भारविणा—'गुरुतां नयन्ति हि गुणा न संहतिः' (कि० १२-१०) । गुणार्जनस्य महत्त्वमन्यत्रापि श्रूयते । 'गुणेषु क्रियतां यत्नः किमाटोपैः प्रयोजनम्' । भवभूतिरपि गुणानामेव पूज्यत्वमाचष्टे, न तु वय आदीनाम् । 'गुणाः पूजास्थानं गुणिषु न च लिङ्गं न च वयः' (उत्तर० ४-११) । गुणैरेव स्थायिनो कीर्तिः सुलभा, शरीरं तु गत्वरम् । यशःसिद्ध्यै एव सिध्यन्ति साधूनां सच्चरितानि । तदुच्यते—'शरीरस्य गुणानां च दूरमत्यन्तमन्तरम् । शरीरं क्षणविध्वंसि कल्पान्तस्थायिनो गुणाः' । (हितोपदेशः १-४९) ।

तेजस्विन एव नामाभिनन्दन्ति रिपवोऽपि । स एव सत्यं पुंशब्दाभिधेयः । 'नाम यस्याभिनन्दन्ति द्विषोऽपि स पुमान् पुमान्' (किराता० ११-७३) । क्षणमपि तेजःसहितं जीवितं श्रेयो न च चिरं सावमानम् । तेजस्वितैव तत्त्वं जीवितस्य । अतः साधूच्यते—'मुहूर्तं ज्वलितं श्रेयो न च धूमायितं चिरम्' ।

१९. आशा बलवती राजन् शल्यो जेष्यति पाण्डवान् । (वेणी० ५-२३)

सत्, चित् और आनन्द—ब्रह्म के इन तीन स्वरूपों में से काव्य और भक्ति-मार्ग 'आनन्द' स्वरूप को लेकर चले। विचार करने पर लोक में इस आनन्द की अभिव्यक्ति की दो अवस्थाएँ पाई जाएँगी—साधनावस्था और सिद्धावस्था। आनन्द की साधनावस्था प्रयत्न-पक्ष को लेकर चलती है और सिद्धावस्था उपभोग-पक्ष को लेकर। साधनावस्था को लेकर चलने वाले काव्य हैं—रामायण, महाभारत, रघुवंश, शिशुपालवध, किरातार्जुनीय आदि। सिद्धावस्था को लेकर चलने वाले काव्य हैं—आर्यासप्तशती, अमरुशतक, गीतगोविन्द आदि। लोक में फैली दुःख की छाया को हटाने में ब्रह्म की आनन्दकला जो शक्तिमय रूप धारण करती है, उसकी भीषणता में भी अद्भुत मनोहरता, कटुता में भी अपूर्व मधुरता, प्रचण्डता में भी गहरी आर्द्रता साथ लगी रहती है। विरुद्धों का यही सामंजस्य कर्मक्षेत्र का सौन्दर्य है। भीषणता और सरसता, कोमलता और कठोरता, कटुता और मधुरता, प्रचण्डता और मृदुता का सामंजस्य ही लोकधर्म का सौन्दर्य है। धर्म और मंगल की यह ज्योति अधर्म और अमंगल की घटा को फाड़ती हुई फूटती है। काव्य में सारे भाव, सारे रूप और सारे व्यापार आनन्द-कला के विकास में ही योग देते हैं।

संकेत—(३५) समकक्षत्वेन मन्यामहे। आक्षिप्य। भूमिमेतामारूढस्य मनुजस्य, आत्मावबोधोऽपि न जायते। विलाययति। (३६) आश्रित्य प्रवृत्तौ। अनुशीलनेन, अवस्थाद्वयमुपलप्स्यते। अवलम्ब्य प्रवर्तते। प्रवृत्तानि। प्रसृताम्, अपहर्तुम्, गभीरा। संगच्छते (सम्+गम् आत्मनेपदी)। ज्योतिरिदम्, विदारयत् प्रस्फुटति। साहाय्यमादधति।

(३७) साधारणीकरण और व्यक्ति-वैचित्र्यवाद (चिन्तामणि)

जब तक किसी भाव का कोई विषय इस रूप में नहीं लाया जाता कि वह सामान्यतः सबके उसी भाव का आलम्बन हो सके, तब तक उसमें रसोद्बोधन की पूर्ण शक्ति नहीं आती। इसी रूप में लाया जाना हमारे यहाँ 'साधारणीकरण' कहलाता है। सच्चा कवि वही है, जिसे लोक-हृदय की पहचान हो, जो अनेक विशेषताओं और विचित्रताओं के बीच मनुष्य जाति के सामान्य हृदय को देख सके। इसी लोक-हृदय में हृदय के लीन होने की दशा का नाम रस-दशा है। भाव और विभाव दोनों पक्षों के सामंजस्य के बिना पूरी और सच्ची रसानुभूति हो नहीं सकती। काव्य का विषय सदा 'विशेष' होता है, 'सामान्य' नहीं; वह 'व्यक्ति' सामने लाता है,'जाति' नहीं। काव्य का काम है कल्पना में बिम्ब या मूर्त भावना उपस्थित करना, बुद्धि के सामने कोई विचार लाना नहीं। 'बिम्ब' जब होगा तब विशेष या व्यक्ति का ही होगा, सामान्य या जाति का नहीं।

(३८) रसात्मक-बोध के विविध स्वरूप (चिन्तामणि)

संसार-सागर की रूप-तरंगों से ही मनुष्य की कल्पना का निर्माण और इसी की रूप-गति से उसके भीतर विविध भावों या मनोविकारों का विधान हुआ है। सौन्दर्य, माधुर्य, विचित्रता, भीषणता, क्रूरता आदि की भावनाएँ बाहरी रूपों और व्यापारों से ही निष्पन्न हुई हैं। हमारे प्रेम, भय, आश्चर्य, क्रोध, करुणा आदि भावों की प्रतिष्ठा करने वाले मूल आलम्बन बाहर ही के हैं। रूप-विधान तीन प्रकार के हैं—(१) प्रत्यक्ष रूप-विधान, (२) स्मृत रूप-विधान, (३) कल्पित रूप-विधान। (१) प्रत्यक्ष रूप-विधान भावुकता की प्रतिष्ठा करने वाले मूल आधार या उपादान हैं। इन प्रत्यक्ष रूपों की मार्मिक अनुभूति जिनमें जितनी ही अधिक होती है, वे उतने ही रसानुभूति के उपयुक्त होते हैं।(२)स्मृति दो प्रकार की होती है—(क) विशुद्ध स्मृति—वह स्मृति जो हमारी मनोवृत्ति को शुद्ध मुक्त भावभूमि में ले जाती है। जैसे—प्रिय-स्मरण, बाल्यकाल या यौवनकाल के अतीत जीवन का स्मरण। (ख) प्रत्यभिज्ञान—यह प्रत्यक्ष-मिश्रित स्मरण है। प्रत्यभिज्ञान में थोड़ा-सा अंश प्रत्यक्ष होता है और बहुत-सा अंश उसी के सम्बन्ध में स्मरण द्वारा उपस्थित होता है। जैसे—'यह वही है' के द्वारा व्यक्ति को देखकर यह वही झगड़ालू व्यक्ति है, जो उस दिन झगड़ा कर रहा था, यह स्मरण करना। (३) कल्पना—काव्य-वस्तु का सारा रूप-विधान इसी क्रिया से होता है। वचनों द्वारा भाव-व्यञ्जना के क्षेत्र में कल्पना को पूरी स्वछन्दता रहती है।

संकेतः—(३७) नैतद्रूपं प्राप्यते, भवेत्, न भवति। एतद्रूपतां प्रापणमेव। ०हृदयं परिचिनोति। लयस्य। वास्तविकी। उपस्थापयति। उपस्थापनम्, आहरणम्। (३८) बाह्यरूपेभ्यः, निष्पन्नाः। प्रतिष्ठापकानि। बाह्यान्येव। नयति। स्तोकांशः, भूयानंशः। कलहप्रियः। विवदमानोऽभवत्। कल्पना पूर्णस्वातन्त्र्यमनुभवति।

(३९) विराग या अनुराग (चित्रलेखा)

विराग मनुष्य के लिए असम्भव है, क्योंकि विराग नकारात्मक है। विराग का आधार शून्य है—कुछ नहीं है। ऐसी अवस्था में जब कोई कहता है कि वह विरागी है, गलत कहता है, क्योंकि उस समय वह यह कहना चाहता है कि उसका संसार के प्रति विराग है। पर साथ ही किसी के प्रति उसका अनुराग अवश्य है, और उसके अनुराग का केन्द्र है ब्रह्म। जीवन का कार्यक्रम है रचनात्मक, विनाशात्मक नहीं। मनुष्य का कर्तव्य है अनुराग, विराग नहीं। 'ब्रह्म से अनुराग' के अर्थ होते हैं—ब्रह्म से पृथक् वस्तु की उपेक्षा, अथवा उसके प्रति विराग। पर वास्तव में देखा जाए तो विरागी कहलानेवाला व्यक्ति वास्तव में विरागी नहीं, अपितु ईश्वरानुरागी होता है। क्या संसार से विराग और ब्रह्म से अनुराग—ये दोनों एक चीज हैं ?

(४०) पाप और पुण्य (चित्रलेखा)

संसार में पाप कुछ भी नहीं है, वह केवल मनुष्य के दृष्टिकोण की विषमता का दूसरा नाम है। प्रत्येक व्यक्ति एक विशेष प्रकार की मनःप्रवृत्ति लेकर उत्पन्न होता है। प्रत्येक व्यक्ति इस संसार के रंगमंच पर एक अभिनय करने आता है। अपनी मनः-प्रवृत्ति से प्रेरित होकर अपने पाठ को वह दुहराता है—यही मनुष्य का जीवन है। जो कुछ मनुष्य करता है, वह उसके स्वभाव के अनुकूल होता है, और स्वभाव प्राकृतिक है। मनुष्य अपना स्वामी नहीं है, वह परिस्थितियों का दास है, विवश है। वह कर्ता नहीं है, वह केवल साधन है। फिर पुण्य और पाप कैसा ?

मनुष्य में ममत्व प्रधान है। प्रत्येक मनुष्य सुख चाहता है। परन्तु व्यक्तियों के सुख के केन्द्र भिन्न होते हैं। कुछ सुख को धन में देखते हैं, कुछ सुख को मदिरा में देखते हैं, कुछ सुख को सत्कर्म में देखते हैं और कुछ दुष्कर्म में, कुछ सुख को त्याग में देखते हैं और कुछ संग्रह में, पर सुख प्रत्येक व्यक्ति चाहता है। कोई भी व्यक्ति संसार में अपने इच्छानुसार ऐसा काम नहीं करेगा, जिससे दुःख मिले। यही मनुष्य की मनः-प्रवृत्ति है और उसके दृष्टिकोण की विषमता है। संसार में इसीलिए पाप की एक परिभाषा नहीं हो सकी और न हो सकती है। हम न पाप करते हैं और न पुण्य करते हैं, हम वही करते हैं जो हमें करना पड़ता है।

संकेत—(३९) असद्रूपः सः, विरक्त इति, मृषाऽभिधानं तत्, परमार्थतः, विरक्त इति, ईश्वरानुरक्तः, किमुभयमेतत् पर्यायत्वेन गणनीयम्। (४०) अवनिरङ्गे, आवर्तयति, स्वस्य प्रभुः, साधनमात्रं सः, न भूता न भविष्यति, यद् विवशत्वेन विधेयं भवति।

(१०) सुभाषित-सुक्तावली

सूचना—(१) सुभाषित विषयानुसार अकारादि-क्रम से दिए गए हैं। (२) सुभाषितों के आगे ग्रन्थ-नाम संक्षेप में दिया गया है, जिस ग्रन्थ से वह सुभाषित संकलित किया गया है। (३) जिन सुभाषितों का विवरण अज्ञात या सन्दिग्ध है, उनके आगे ग्रन्थ-नाम नहीं दिया गया है। (४) सुभाषित वर्गों और उपवर्गों में विषय के आधार पर विभाजित किए गए हैं। (५) संक्षेप के लिए निम्नलिखित संकेत ग्रन्थों के लिए दिए गए हैं।

संकेत-सूची

अ० = अनर्घराघव
उ० = उत्तररामचरित
ऋग् = ऋग्वेद
क० = कथासरित्सागर
का० = कादम्बरी
का०नी० = कामन्दकीयनीति
काव्या० = काव्यादर्श
कि० = किरातार्जुनीय
कु० = कुमारसम्भव
कुव०=कुवलयानन्द
गी० = भगवद्गीता
गु० = गुणरत्न
घ० = घटखर्परकाव्य
च० = चरकसंहिता
चा० = चाणक्यनीति
चौ० = चौरपंचाशिका
द० = दशकुमारचरित
दृ० = दृष्टान्तशतक
नै० = नैषधीयचरित
प०=पञ्चतन्त्र
प्र० = प्रसन्नराघव
भ०=भर्तृहरिशतकत्रय
भा० = भागवतपुराण
म० = मनुस्मृति
महा० = महाभारत
मा० = मालतीमाधव
मृ० = मृच्छकटिक
मे० = मेघदूत
यजु० = यजुर्वेद
यो० = योगवासिष्ठ
र० = रघुवंश
रा० = रामायण(वाल्मीकीय)
वि० = विक्रमोर्वशीय
शा० = अभिज्ञानशाकुन्तल (शाकुन्तल)
शा०प० = शार्ङ्गधरपद्धति
शि० = शिशुपालवध
ह० = हर्षचरित
हि० = हितोपदेश

(१) भारत-प्रशंसा

(क) भारत-प्रशंसा

१. दुर्लभं भारते जन्म मानुष्यं तत्र दुर्लभम्।

(ख) भूमि-प्रशंसा

१. बहुरत्ना वसुन्धरा। २. बह्वाश्चर्या हि मेदिनी (क०)।

(ग) जन्मभूमि-प्रशंसा

१. जननी जन्मभूमिश्च स्वर्गादपि गरीयसी। २. प्राणिनां हि निकृष्टाऽपि जन्मभूमिः परा प्रिया (क०)।

(२) अध्यात्म

(क) अध्यात्म

१. अमृतायते हि सुतपः सुकर्मणाम् (कि०)। २. इति त्याज्ये भवे भव्यो मुक्तावुत्तिष्ठते जनः (कि०)। ३. उदिते परमानन्दे नाहं न त्वं न वै जगत्। ४. एकाग्रो हि बहिर्वृत्तिनिवृत्तस्तत्त्वमीक्षते। ५. किमिवास्ति यन्न तपसामदुष्करम् (कि०)। ६. छाया न मूर्छति मलोपहतप्रसादे, शुद्धे तु दर्पणतले सुलभावकाशा (शा०)। ७. जपतो नास्ति पातकम्। ८. ज्ञानमार्गे ह्यहंकारः परिघो दुरतिक्रमः (क०)। ९. तपःसीमा मुक्तिः। १०. तपोधीनानि श्रेयांसि ह्युपायोऽन्यो न विद्यते (क०)। ११. तपोधीना हि संपदः (क०)। १२. दृष्टतत्त्वश्च न पुनः कर्मजालेन बध्यते (क०)। १३. धन्यास्ते भुवि ये निवृत्तमनसो धिग्दुःखितान् कामिनः। १४. न मुक्तेः परमा गतिः (यो०)। १५. न वैराग्यात् परं भाग्यम्। १६. न शान्तेः परमं सुखम्। १७. नहि महतां सुकरः समाधिभङ्गः (कि०)। १८. निरुत्सुकानामभियोगभाजां समुत्सुकेवाङ्कमुपैति सिद्धिः (कि०)। १९. निवृत्तपापसंपर्काः सन्तो यान्ति हि निर्वृतिम् (क०)। २०. निवृत्तरागस्य गृहं तपोवनम् (हि०)। २१. निस्पृहस्य तृणं जगत्। २२. बोधे बोधे सच्चिदानन्दभासः। २३. मन एव मनुष्याणां कारणं बन्धमोक्षयोः (गी०)। २४. लब्धदिव्यरसास्वादः को हि रज्येद् रसान्तरे (क०)। २५. वाञ्छारत्नं परमपदवी। २६. विरक्तस्य तृणं जगत्। २७. विरक्तस्य तृणं भार्या। २८. शीलयन्ति यतयः सुशीलताम् (कि०)। २९. साक्षात्कृतधर्माण ऋषयो बभूवुः (निरुक्त)। ३०. साक्षात्कृतधर्माणो महर्षयः (उ०)। ३१. साधने हि नियमोऽन्यजनानां योगिनां तु तपसाऽखिलसिद्धिः (नै०)। ३२. सुखमास्ते निःस्पृहः पुरुषः। ३३. स्वाधीनकुशलाः सिद्धिमन्तः (शा०)।

(ख) कर्मफल

१. अयि खलु विषमः पुराकृतानां, भवति हि जन्तुषु कर्मणां विपाकः। २. आत्मकृतानां हि दोषाणां नियतमनुभवितव्यं फलमात्मनैव (का०)। ३. कर्म कः स्वकृतमत्र न भुङ्क्ते (नै०)। ४. कर्मदोषाद् दरिद्रता। ५. कर्मानुगो गच्छति जीव एकः (भा०)। ६. कर्मायत्तं फलं पुंसाम्। ७. गहना कर्मणो गतिः (गी०)। ८. चित्रा गतिः कर्मणाम्। ९. जन्मान्तरकृतं हि कर्म फलमुपनयति पुरुषस्येह जन्मनि (का०)। १०. प्राचीनकर्म बलवन्मुनयो वदन्ति (महा०)। ११. भद्रकृत् प्राप्नुयाद् भद्रमभद्रं चाप्यभद्रकृत् (क०)। १२. भद्रमभद्रं वा कृतमात्मनि कल्प्यते (क०)। १३. स्वकर्मसूत्रग्रथितो हि लोकः।

(ग) दर्शन

१. अविज्ञातेऽपि बन्धौ हि बलात् प्रह्लादते मनः (कि०)। २. भस्मीभूतस्य जीवस्य पुनरागमनं कुतः (नै०)। ३. भस्मीभूतस्य देहस्य पुनरागमनं कुतः। ४. मनोरथानामगतिर्न विद्यते (कु०)। ५. मनो हि जन्मान्तरसंगतिज्ञम् (र०)। ६. यस्यामेव वेलायां चित्तवृत्तिः, सैव वेला सर्वकार्येषु (का०)। ७. वक्ति जन्मान्तरप्रीतिं मनः स्निह्यदकारणम् (क०)। ८. विचित्ररूपाः खलु चित्तवृत्तयः (कि०)। ९. विचित्राः खलु वासनाः। १०. विमलं कलुषीभवच्च चेतः कथयत्येव हितैषिणं रिपुं वा (कि०)। ११. सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः (शा०)। १२. सदा स्याद्योऽत्र यच्चित्तस्तन्मयत्वमुपैति सः (क०)। १३. सर्वश्चित्तप्रमाणेन सदसद् वाऽभिवाञ्छति (क०)। १४. सिद्धिं वा यदि वाऽसिद्धिं चित्तोत्साहो निवेदयेत् (प०)।

(घ) देव-कृपा

१. अमोघो देवतानां च प्रसादः किं न साधयेत् (क०)। २. देवा हि नान्यद् वितरन्ति किन्तु प्रसद्य ते साधुधियं ददन्ते (नै०)। ३. दोषोऽपि गुणतां याति, प्रभोर्भवति चेत्कृपा। ४. न देवा यष्टिमादाय रक्षन्ति पशुपालवत्। यं तु रक्षितुमिच्छन्ति बुद्ध्या संयोजयन्ति तम् (महा०)। ५. प्रसन्ने हि किमप्राप्यमस्तीह परमेश्वरे (क०)। ६. विषमप्यमृतं क्वचिद् भवेदमृतं वा विषमीश्वरेच्छया (र०)। ७. सानुकूले जगन्नाथे विप्रियः सुप्रियो भवेत्।

(ङ) दैव-स्वरूप (दैवप्रशंसा, दैवनिन्दा, भाग्य, भाग्यहीन)

१. अनतिक्रमणीया हि नियतिः (का०)। २. अपि धन्वन्तरिर्वैद्यः किं करोति गतायुषि। ३. अभद्रं भद्रं वा विधिलिखितमुन्मूलयति कः। ४. असंभाव्या अपि नृणां भवन्तीह समागमाः (क०)। ५. असाध्यं साधयत्यर्थं हेलयाऽभिमुखो विधिः (क०)। ६. अहह कष्टमपण्डितता विधेः (भ०)। ७. अहो दैवाभिशप्तानां प्राप्तोऽप्यर्थः पलायते (क०)। ८. अहो नवनवाश्चर्यनिर्माणे रसिको विधिः (क०)। ९. अहो विधेरचिन्त्यैव गतिरद्भुतकर्मणाम् (क०)। १०. अहो विधौ विपर्यस्ते न विपर्यस्यतीह किम् (क०)। ११. ईदृशी भवितव्यता (कि०)। १२. कल्पवृक्षोऽप्यभव्यानां प्रायो याति पलाशताम् (क०)। १३. कस्यात्यन्तं सुखमुपनतं, दुःखमेकान्ततो वा। नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण (मे०)। १४. किं हि न भवेदीश्वरेच्छया (क०)। १५. को जानाति जनो जनार्दनमनोवृत्तिः कदा कीदृशी। १६. को नाम पाकाभिमुखस्य जन्तुर्द्वाराणि दैवस्य पिधातुमीष्टे (उ०)। १७. को हि स्वशिरसश्छायां विधेश्चोल्लंघयेद् गतिम् (क०)। १८. क्रुद्धे विधौ भजति मित्रममित्रभावम्। १९. देवो दुर्बलघातकः। २०. दैवमेव हि साहाय्यं कुरुते सत्त्वशालिनाम् (क०)। २१. दैवी विचित्रा गतिः। २२. दैवे दुर्जनतां

गते तृणमपि प्रायेण वज्रायते। २३. दैवे निरुन्धति निबन्धनतां वहन्ति, हन्त प्रयास-परुषाणि न पौरुषाणि (नै०)। २४. दैवेनैव हि साध्यन्ते सदर्थाः शुभकर्मणाम् (क०)। २५. न च दैवात् परं बलम्। २६. ननु दैवमेव शरणं धिग्धिग्वृथा पौरुषम्। २७. न भविष्यति हन्त साधनं किमिवान्यत् प्रहरिष्यतो विधेः (र०)। २८. न ह्यलमतिनिपुणोऽपि पुरुषो नियतिलिखितां लेखामतिक्रमितुम् (द०)। २९. नाभाव्यं भवतीह कर्मवशतो भाव्यस्य नाशः कुतः। ३०. नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण (मे०)। ३१. नैवाकृतिः फलति नैव कुलं न शीलम् (भ०)। ३२. नैवान्यथा भवति यल्लिखितं विधात्रा। ३३. प्रतिकूलतामुपगते हि विधौ विफलत्वमेति बहुसाधनता (शि०)। ३४. प्रायः समापन्नविपत्तिकाले धियोऽपि पुंसां मलिनीभवन्ति (हि०)। ३५. प्रायो गच्छति यत्र भाग्यरहितस्तत्रैव यान्त्यापदः (भ०)। ३६. फलं भाग्यानुसारतः (महा०)। ३७. बलवति सति दैवे बन्धुभिः किं विधेयम्। ३८. बलीयसी केवलमीश्वरेच्छा (महा०)। ३९. भवितव्यता बलवती (शा०)। ४०. भवितव्यं भवत्येव कर्मणामीदृशी गतिः (महा०)। ४१. भवितव्यस्य नासाध्यं दृश्यते बत दृश्यताम् (क०)। ४२. भवितव्यानां द्वाराणि भवन्ति सर्वत्र (शा०)। ४३. यत्पूर्वं विधिना ललाटलिखितं तन्मार्जितुं कः क्षमः (हि०)। ४४. यदभावि न तद्भावि, भावि चेन्न तदन्यथा (हि०)। ४५. लिखितमपि ललाटे प्रोज्झितुं कः समर्थः। ४६. वक्रे विधौ वद कथं व्यवसायसिद्धिः। ४७. वामे विधौ नहि फलन्त्यभिवाञ्छितानि। ४८. विधिरहो बलवानिति मे मतिः (भा०)। ४९. विधिरुच्छृङ्खलो नृणाम्। ५०. विधिर्हि घटयत्यर्थानचिन्त्यानपि संमुखः (क०)। ५१. विधिलिखितं बुद्धिरनुसरति। ५२. विधेर्विचित्राणि विचेष्टितानि। ५३. विधेर्विलासानब्धेश्च तरङ्गान् को हि तर्कयेत् (क०)। ५४. शक्या हि केन निश्चेतुं दुर्ज्ञाना नियतेर्गतिः (क०)। ५५. शिरसि लिखितं लङ्घयति कः। ५६. साध्यासाध्यविचारं हि नेक्षते भवितव्यता (क०)।

(च) धर्म-चर्चा

१. अचिन्त्यो बत दैवेनाप्यापातः सुखदुःखयोः (क०)। २. अधर्मविषवृक्षस्य पच्यते स्वादु किं फलम् (क०)। ३. अनपायि निबर्हणं द्विषां, न तितिक्षासममस्ति साधनम् (कि०)। ४. अप्यप्रसिद्धं यशसे हि पुंसामनन्यसाधारणमेव कर्म (कु०)। ५. को धर्मः कृपया विना। ६. क्षमया किं न सिध्यति। ७. क्षान्तितुल्यं तपो नास्ति। ८. चक्रवत् परिवर्तन्ते दुःखानि च सुखानि च (यो०)। ९. त्रैलोक्ये दीपको धर्मः। १०. धर्मः कीर्तिर्द्वयं स्थिरम् (महा०)। ११. धर्मः सत्येन वर्धते। १२. धर्मः स नो यत्र न सत्यमस्ति। १३. धर्मसंरक्षणार्थैव प्रवृत्तिर्भुवि शार्ङ्गिणः (र०)। १४. धर्मस्य तत्त्वं निहितं गुहायाम् (महा०)। १५. धर्मस्य त्वरिता गतिः (पं०)। १६. धर्मेण

चरतां सत्ये नास्त्यनभ्युदयः क्वचित् (क०)। १७. धर्मेण हीनाः पशुभिः समानाः (हि०)। १८. धर्मो मित्रं मृतस्य च। १९. धर्मो हि सान्निध्यं कुरुते सताम् (क०)। २०. न च धर्मो दयापरः। २१. न दयासदृशं ज्ञानम्। २२. न धर्मवृद्धेषु वयः समीक्ष्यते (कु०)। २३. न धर्मसदृशं मित्रम्। २४. न धर्मात् परमं मित्रम्। २५. नाधर्मश्चिरमृद्धये (क०)। २६. नानृतात् पातकं परम्। २७. नास्ति सत्यसमो धर्मः (महा०)। २८. निसर्ग-विरोधिनी चेयं पयःपावकयोरिव धर्मक्रोधयोरेकत्र वृत्तिः (ह०)। २९. पथः श्रुतेर्दर्शयितार ईश्वरा मलीमसामाददते न पद्धतिम् (र०)। ३०. प्रमाणं परमं श्रुतिः (महा०)। ३१. भवन्त्येव हि भद्राणि धर्मादेव यदादरात् (क०)। ३२. महेश्वरमनाराध्य न सन्तीप्सित-सिद्धयः (क०)। ३३. यतः सत्यं ततो धर्मः। ३४. यतो धर्मस्ततो जयः। ३५. योगिनां परिणमन् विमुक्तये, केन नाऽस्तु विनयः सतां प्रियः (कि०)। ३६. वचोभूषा सत्यम्। ३७. वित्तेन रक्ष्यते धर्मो, विद्या योगेन रक्ष्यते (चा०)। ३८. व्यक्तिमायाति महतां माहात्म्यमनुकम्पया (कि०)। ३९. श्रवणपुटरत्नं हरिकथा। ४०. श्रीमङ्गलात् प्रभवति (महा०)। ४१. श्रेयसि केन तृप्यते (शि०)। ४२. सत्यं सम्यक् कृतोऽल्पोऽपि, धर्मो भूरिफलो भवेत् (क०)। ४३. सत्यं कण्ठस्य भूषणम्। ४४. सत्यं न तद् यच्छलमभ्युपैति। ४५. सत्यमेव जयते नानृतम्। ४६. सत्येन धार्यते पृथ्वी। ४७. स धार्मिको यः परमर्म न स्पृशेत्। ४८. सर्वं सत्ये प्रतिष्ठितम् (चा०)। ४९. स्वधर्मे निधनं श्रेयः, परधर्मो भयावहः (गी०)।

(३) अर्थ (धन)

(क) धन-निन्दा

१. अकाण्डपातोपनता न कं लक्ष्मीर्विमोहयेत् (क०)। २. अकालमेघवद् वित्त-मकस्मादेति याति च (क०)। ३. आये दुःखं व्यये दुःखं धिगर्थाः कष्टसंश्रयाः (प०)। ४. ऋद्धिश्चित्तविकारिणी। ५. कोऽर्थान् प्राप्य न गर्वितः (प०)। ६. जलबुद्बुदसमाना विराजमाना संपत् तडिल्लतेव सहसैवोदेति, नश्यति च (द०)। ७. धनोष्मणा म्लायत्यलं लतेव मनस्विता (ह०)। ८. मूर्च्छन्त्यमी विकाराः प्रायेणैश्वर्यमत्तेषु (शा०)। ९. यत्रास्ति लक्ष्मीर्विनयो न तत्र। १०. शरदभ्रचलाश्चलेन्द्रियैरसुरक्षा हि बहुच्छलाः श्रियः (कि०)। ११. सम्पत्कणिकामपि प्राप्य तुलेव लघुप्रकृतिरुन्नतिमायाति (ह०)। १२. साधुवृत्तानपि क्षुद्रा विक्षिपन्त्येव सम्पदः (कि०)।

(ख) धन-प्रशंसा

१. अर्थो हि लोके पुरुषस्य बन्धुः। २. अर्थेन बलवान् सर्वः (प०)। ३. को न तृप्यति वित्तेन। ४. चाण्डालोऽपि नरः पूज्यो यस्यास्ति विपुलं धनम्। ५. द्रव्येण सर्वे वशाः। ६. धनं सर्वप्रयोजनम्। ७. निर्गलिताम्बुगर्भं, शरद्घनं नार्दति चातकोऽपि (र०)।

८. पात्रत्वाद् धनमाप्नोति । ९. पुनर्धनाढ्यः पुनरेव भोगी । १०. पूज्यं वाक्यं समृद्धस्य । ११. भोगो भूषयते धनम् । १२. मातर्लक्ष्मि तव प्रसादवशतो दोषा अपि स्युर्गुणाः । १३. लक्ष्मीर्यस्य गृहे स एव भजति प्रायो जगद्वन्द्यताम् । १४. लभेत वा प्रार्थयिता न वा श्रियं, श्रिया दुरापः कथमीप्सितो भवेत् (शा०) । १५. सा लक्ष्मीरुपकुरुते यया परेषाम् (कि०) ।

(ग) निर्धनता (निर्धन)

१. अवज्ञासोदर्यं दारिद्र्यम् (द०) । २. उत्पद्यन्ते विलीयन्ते दरिद्राणां मनोरथाः । ३. कष्टं निर्धनिकस्य जीवितमहो दारैरपि त्यज्यते । ४. क्लेशे कस्यास्ति सौहृदम् (प०) । ५. क्षीणा नरा निष्करुणा भवन्ति (प०) । ६. दरिद्रता धीरतया विराजते । ७. दारिद्र्यदोषेण करोति पापम् । ८. दारिद्र्यदोषो गुणराशिनाशी (घ०) । ९. दारिद्र्यं परमाञ्जनम् (भा०) । १०. न दरिद्रस्तथा दुःखी लब्धक्षीणधनो यथा । ११. निधनता सर्वापदामास्पदम् (मृ०) । १२. निर्धनस्य कुतः सुखम् । १३. पुनर्दरिद्री पुनरेव पापी । १४. पुष्पं पर्युषितं त्यजन्ति मधुपाः । १५. बुभुक्षितः किं न करोति पापम् (प०) । १६. बुभुक्षितं न प्रतिभाति किञ्चित् । १७. बुभुक्षितैर्व्याकरणं न भुज्यते । १८. रिक्तः सर्वो भवति हि लघुः पूर्णता गौरवाय (मे०) । १९. विषं गोष्ठी दरिद्रस्य । २०. वृक्षं क्षीणफलं त्यजन्ति विहगाः । २१. सर्वं शून्यं दरिद्रस्य (प०) । २२. सर्वशून्या दरिद्रता ।

(४) काम (भोगनिन्दा)

१. अपथे पदमर्पयन्ति हि श्रुतवन्तोऽपि रजोनिमीलिताः (र०) । २. अहो अतीव भोगाशा कं नाम न विडम्बयेत् (क०) । ३. आकृष्टः कामलोभाभ्यामपायः को न पश्यति (क०) । ४. आपातरम्या विषयाः पर्यन्तपरितापिनः (कि०) । ५. कामक्रोधौ हि विप्राणां मोक्षद्वारार्गलावुभौ (क०) । ६. कामातुराणां न भयं न लज्जा (भ०) । ७. कामार्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु (मे०) । ८. कुतः सत्यं च कामिनाम् । ९. कोऽवकाशो विवेकस्य हृदि कामान्धचेतसः (क०) । १०. को हि मार्गममार्गं वा व्यसनान्धो निरीक्षते (क०) । ११. तेषामिन्द्रियनिग्रहो यदि भवेद् विन्ध्यस्तरेत् सागरम् । १२. दुर्जया हि विषया विदुषापि (नै०) । १३. न कामसदृशो रिपुः (यो०) । १४. नास्ति कामसमो व्याधिः । १५. भोगान् भोगानिवाहेयान् अध्यास्यापन्न दुर्लभा (कि०) । १६. वनेऽपि दोषाः प्रभवन्ति रागिणाम् (प०) । १७. विषयाकृष्यमाणा हि तिष्ठन्ति सुपथे कथम् (क०) । १८. विषयिणः कस्यापदोऽस्तं गताः । १९. अक्षेया विप्रलब्धारः... कामाः कृशा हि शत्रवः (कि० ११-३५) । २०. संगात् संजायते कामः (गी०) ।

(५) जगत्-स्वरूप

(क) जगत्-स्वरूप

१. असारेऽस्मिन् भवे तावद् भावाः पर्यन्तनीरसाः (क०)। २. न जाने संसारः किममृतमयः किं विषमयः। ३. परिवर्तिनि संसारे मृतः को वा न जायते। ४. मधुरविधुरमिश्राः सृष्टयो हा विधातुः (प्र०)।

(ख) नश्वरता

१. अतिद्रुतवाहिनी चानित्यतानदी (ह०)। २. अस्थिरं जीवितं लोके (हि०)। ३. अस्थिराः पुत्रदाराश्च (हि०)। ४. अस्थिरे धनयौवने (हि०)। ५. क्षणविध्वंसिनः कायाः का चिन्ता मरणे रणे। ६. जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च (गी०)। ७. धिगिमां देहभृतामसारताम् (र०)। ८. न वस्तु दैवस्वरसाद् विनश्वरं सुरेश्वरोऽपि प्रतिकर्तुमीश्वरः (नै०)। ९. मरणं प्रकृतिः शरीरिणां विकृतिर्जीवितमुच्यते बुधैः (र०)। १०. सर्वे क्षयान्ता निचयाः पतनान्ताः समुच्छ्रयाः (महा०)।

(ग) लोक-स्वभाव

१. अतिकष्टास्वप्यवस्थासु जीवितनिरपेक्षा न भवन्ति खलु जगति सर्वप्राणिनां प्रवृत्तयः (का०)। २. अहो धिग्वैषम्यं लोकव्यवहारस्य (मृ०)। ३. आत्मवर्गहितमिच्छति सर्वः (कि०)। ४. गतयो भिन्नपथा हि देहिनाम्। ५. गतानुगतिको लोको न लोकः पारमार्थिकः। ६. जनस्य रूढप्रणयस्य चेतसः किमप्यमर्षोऽनुनये भृशायते (कि०)। ७. जनानने कः करमर्पयिष्यति (नै०)। ८. ध्रुवमभिमते को वा पूर्णे मुदा न हि माद्यति (कु०)। ९. नवा वाणी मुखे मुखे। १०. न सन्त्येव ते येषां सतामपि सतां न विद्यन्ते मित्रोदासीनशत्रवः (ह०)। ११. नहि सर्वविदः सर्वे। १२. नहि सर्वेऽपि कुर्वन्ति सभ्या युक्तिविवेचनम्। १३. पञ्च त्वाऽनुगमिष्यन्ति यत्र यत्र गमिष्यसि। उपकार्योपकर्तारो मित्रोदासीनशत्रवः (महा०)। १४. पिण्डे पिण्डे मतिर्भिन्ना तुण्डे तुण्डे सरस्वती। १५. पीत्वा मोहमयीं प्रमादमदिरामुन्मत्तभूतं जगत्। १६. प्रवादमोहितः प्रायो न विचारक्षमो जन (क०)। १७. भिन्नरुचिर्हि लोकः। १८. सर्वः स्वार्थं समीहते (शि०)।

(घ) स्वभावो दुरतिक्रमः

१. आकण्ठजलमग्नोऽपि श्वा लिहत्येव जिह्वया। २. उत्सवप्रियाः खलु मनुष्याः (शा०)। ३. उष्णत्वमग्न्यातपसम्प्रयोगाच्छैत्यं हि यत्सा प्रकृतिर्जलस्य (र०)। ४. या यस्य प्रकृतिः स्वभावजनिता केनापि न त्यज्यते। ५. सतां हि साधुशीलत्वात् स्वभावो न निवर्तते। ६. सुतप्तमपि पानीयं शमयत्येव पावकम् (प०)। ७. स्नापितोऽपि बहुशो नदीजलैर्गर्दभः किमु हयो भवेत् क्वचित्। ८. स्वभावो दुरतिक्रमः (प०)। ९. स्वभावो यादृशो यस्य न जहाति कदाचन (चा०)।

(६) चातुर्वर्ण्य

(क) ब्राह्मण

१. असन्तुष्टा द्विजा नष्टाः (प०)। २. तुष्यन्ति भोजनैर्विप्राः। ३. ब्राह्मणा मधुरप्रियाः। ४. शमो दमस्तपः शौचं क्षान्तिरार्जवमेव च। ज्ञानविज्ञानमास्तिक्यं ब्रह्मकर्म स्वभावजम् (गी०)। ५. सिद्धं ह्येतद् वाचि वीर्यं द्विजानां, बाह्वोर्वीर्यं यत्तु तत् क्षत्रियाणाम् (उ०)।

(ख) क्षत्रिय

१. अधर्मयुद्धेन जयं को हीच्छेत् क्षत्रियो भवन् (क०)। २. कुराजान्तानि राष्ट्राणि (प०)। ३. क्षतात् किल त्रायत इत्युदग्रः क्षत्रस्य शब्दो भुवनेषु रूढः (र०)। ४. तत्कार्मुकं कर्मसु यस्य शक्तिः। ५. राजा प्रकृतिरंजनात्। ६. शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनम्। दानमीश्वरभावश्च क्षात्रं कर्म स्वभावजम् (गी०)। ७. स क्षत्रियस्त्राणसहः सतां यः। ८. संग्रामो हि शूराणामुत्सवो हि महानयम् (क०)। ९. सिद्धं ह्येतद् वाचि वीर्यं द्विजानां, बाह्वोर्वीर्यं यत्तु तत् क्षत्रियाणाम् (उ०)।

(ग) वैश्य

१. कृषिगोरक्ष्यवाणिज्यं वैश्यकर्म स्वभावजम् (गी०)।

(घ) शूद्र

१. परिचर्यात्मकं कर्म शूद्रस्यापि स्वभावजम् (गी०)।

(७) जीवन

(क) बाल्य

१. कस्य नोच्छृंखलं बाल्यं गुरुशासनवर्जितम् (क०)। २. लालयेत् पञ्च वर्षाणि दश वर्षाणि ताडयेत्। प्राप्ते तु षोडशे वर्षे पुत्रं मित्रवदाचरेत्। ३. स्वामिवत् पञ्च वर्षाणि दश वर्षाणि दासवत्। प्राप्ते तु षोडशे वर्षे पुत्रं मित्रवदाचरेत्।

(ख) यौवन

१. कस्य नेष्टं हि यौवनम् (क०)। २. किंचित्कालोपभोग्यानि यौवनानि धनानि च। ३. सर्वथा दुर्लभं यौवनमस्खलितम् (का०)। ४. सर्वथा न कंचिन्न खलीकरोति जीविततृष्णा। ५. स्पृशन्त्यास्तारुण्यं किमिव नहि रम्यं मृगदृशः। ६. हरति मनो मधुरा हि यौवनश्रीः (कि०)।

(ग) वार्धक्य

१. अङ्गं गलितं पलितं मुण्डं, दशनविहीनं जातं तुण्डम्। वृद्धो याति गृहीत्वा दण्डं, तदपि न मुञ्चत्याशा पिण्डम्। २. जरा रूपं हरति। ३. न सा सभा यत्र न सन्ति वृद्धाः (हि०)। ४. वृद्धस्य तरुणी विषम्। ५. वृद्धा जना निष्करुणा भवन्ति। ६. वृद्धा न ते ये न वदन्ति धर्मम् (हि०)। ७. वृद्धा नारी पतिव्रता।

(घ) काल (अवसर)

१. कालयुक्त्या ह्यरिर्मित्रं जायते न च सर्वदा (क०)। २. काले खलु समारब्धाः फलं बध्नन्ति नीतयः (र०)। ३. काले दत्तं वरं ह्यल्पमकाले बहुनापि किम् (क०)। ४. कालेन फलते तीर्थं सद्यः साधुसमागमः (भा०)। ५. कुर्वन्त्यकालेऽभिव्यक्तिं न कार्यापेक्षिणो बुधाः (क०)। ६. समय एव करोति बलाबलम् (शि०)। ७. समये हि सर्वमुपकारि कृतम् (शि०)।

(ङ) काल (मृत्यु)

१. कः कालस्य न गोचरान्तरगतः (भ०)। २. कालस्य कुटिला गतिः। ३. कालो ह्ययं निरवधिर्विपुला च पृथ्वी (मा०)। ४. मृत्योः सर्वत्र तुल्यता। ५. मृत्योर्बिभेषि किं बाले, न स भीतं विमुञ्चति। ६. लङ्घ्यते न खलु कालनियोगः (कि०)। ७. सर्वः कालवशेन नश्यति। ८. सर्वं यस्य वशादगात् स्मृतिपथं कालाय तस्मै नमः।

(८) आरोग्य

१. अजीर्णे भोजनं विषम् (हि०)। २. अहितो देहजो व्याधिः। ३. आत्मानमेव मन्येत कर्तारं सुखदुःखयोः (च०)। ४. दृष्टश्रुताभ्यां सन्देहमवापोह्याचरेत् क्रियाः (सुश्रुत०)। ५. धर्मार्थकाममोक्षाणामारोग्यं मूलमुत्तमम् (च०)। ६. न च व्याधिसमो रिपुः। ७. न नक्तं दधि भुञ्जीत। ८. पित्तेन दूने रसने सितापि तिक्तायते (नै०)। ९. प्रतिकारविधानमायुषः सति शेषे हि फलाय कल्पते (र०)। १०. मर्दनं गुणवर्धनम्। ११. यथौषधं स्वादु हितं च दुर्लभम्। १२. रसमूला हि व्याधयः। १३. विकारं खलु परमार्थतोऽज्ञात्वाऽनारम्भः प्रतीकारस्य (शा०)। १४. व्याधितस्यौषधं मित्रम्। १५. शरीरं व्याधिमन्दिरम्। १६. शरीरमाद्यं खलु धर्मसाधनम् (कु०)। १७. शरीरे चैव शास्त्रे च दृष्टार्थः स्याद् विशारदः (सुश्रुत०)। १८. सम्यक् प्रयोगं सर्वेषां सिद्धिराख्याति कर्मणाम् (च०)। १९. सर्वथा च कञ्चन न स्पृशन्ति शरीरधर्माणमुपतापाः (का०)। २०. सुखार्थाः सर्वभूतानां मताः सर्वाः प्रवृत्तयः (च०)। २१. स्वेद्यमामज्वरं प्राज्ञः कोऽम्भसा परिषिञ्चति (शि०)। २२. हितभुक् मितभुक् शाकभुक्। २३. हितमारण्यमौषधम्।

(९) राजधर्मादि

(क) राजधर्म (राजकर्म)

१. अरिषु हि विजयार्थिनः क्षितीशा विदधति सोपधि सन्धिदूषणानि (कि०)। २. अल्पीयसोऽप्यामयतुल्यवृत्तेर्महापकाराय रिपोर्विवृद्धिः (कि०)। ३. अविश्रमोऽयं लोकतन्त्राधिकारः (शा०)। ४. आपन्नस्य विषयवासिन आर्तिहरेण राज्ञा भवितव्यम् (शा०)। ५. आश्वस्तो वेत्ति कुसृतिं प्रभुः को हि स्वमन्त्रिणाम् (क०)। ६. ईश्वराणां

हि विनोदरसिकं मनः (कि०)। ७. ऋद्धं हि राज्यं पदमैन्द्रमाहुः (र०) ८. को नाम राज्ञां प्रियः (प०)। ९. क्षितिपतिः को नाम नीतिं विना। १०. गणयन्ति न राज्यार्थेऽपत्यस्नेहं महीभुजः (क०)। ११. चाराज्जानन्ति राजानः। १२. नयवर्त्मगाः प्रभवतां हि धियः (कि०) १३. नये च शौर्ये च वसन्ति सम्पदः। १४. नयेन चालंक्रियते नरेन्द्रता। १५. नरपतिहितकर्ता द्वेष्यतां याति लोके, जनपदहितकर्ता द्विष्यते पार्थिवेन्द्रैः (प०)। १६. महीश्वरव्याहृतयः कदाचित् पुष्णन्ति लोके विपरीतमर्थम् (कु०)। १७. नृपतिजनपदानां दुर्लभः कार्यकर्ता (प०)। १८. नृपस्य वर्णाश्रमपालनं यत्स एव धर्मः (र०)। १९. परमं लाभमरातिभङ्गमाहुः (कि०)। २०. पिशुनजनं खलु बिभ्रति क्षितीन्द्राः। २१. पृथिवीभूषणं राजा। २२. प्रजानामपि दीनानां राजैव सदयः पिता। २३. प्रभुचित्तमेव हि जनोऽनुवर्तते (शि०)। २४. प्रभुप्रसादो हि मुदे न कस्य (कु०)। २५. प्रभूणां हि विभूत्यन्धा धावत्यविषये मतिः (क०)। २६ प्रयोजनापेक्षितया प्रभूणां प्रायश्चलं गौरवमाश्रितेषु (कु०)। २७. प्रायेण भूमिपतयः प्रमदा लताश्च, यः पार्श्वतो भवति तं परिवेष्टयन्ति (प०)। २८. भजन्ति वैतसीं वृत्तिं राजानः कालवेदिनः (क०)। २९. मनीषिणः सन्ति न ते हितैषिणः (प०)। ३०. महीपतीनां विनयो हि भूषणम्। ३१. राजा राष्ट्रकृतं पापम्। ३२. राजा सहायवान् शूरः सोत्साहो जयति द्विषः (क०)। ३३. वसुमत्या हि नृपाः कलत्रिणः (र०)। ३४. वाराङ्गनेव नृपनीतिरनेकरूपा (प०)। ३५. व्रजन्ति शत्रूनवधूय निःस्पृहाः, शमेन सिद्धिं मुनयो न भूभृतः (कि०)। ३६. शुचिः क्षेमकरो राजा। ३७. सर्वः प्रार्थितमर्थमधिगम्य सुखी संपद्यते जन्तुः। राज्ञां तु चरितार्थता दुःखोत्तरैव (शा०)। ३८. स्वदेशे पूज्यते राजा (चा०)। ३९. हतं सैन्यमनायकम् (चा०)।

(ख) सद्भृत्य

१. अनियुक्तोऽपि च ब्रूयाद्यदीच्छेत् स्वामिनो हितम् (क०)। २. कथं हि लङ्घ्यते भृत्यैर्ग्रहिकस्य प्रभोर्वचः (क०)। ३. कालप्रयुक्ता खलु कर्मविद्भिर्विज्ञापना भर्तृषु सिद्धिमेति (कु०) ४. न किंचिन्न कारयत्यसाधारणी स्वामिभक्तिः (ह०) ५. नास्त्यहो स्वामिभक्तानां पुत्रे वात्मनि वा स्पृहा (क०)। ६. प्राणैरपि हि भृत्यानां स्वामिसंरक्षणं व्रतम् (क०)। ७. भृत्या अपि त एव ये संपत्तेर्विपत्तौ सविशेषं सेवन्ते (का०)। ८. संभावना ह्यधिकृतस्य तनोति तेजः (कि०)। ९. सेवाधर्मः परमगहनो योगिनामप्यगम्यः (भ०)। १०. स्वामिन्यसाध्यव्यसने सुखं सन्मन्त्रिणां कुतः (क०)। ११. स्वाम्यायत्ताः सदा प्राणा भृत्यानामर्जिता धनैः (प०)।

(१०) आचार

(क) कर्तव्य-बोधन

१. अर्थमनर्थं भावय नित्यं, नास्ति ततः सुखलेशः सत्यम्। २. आज्ञा गुरूणां ह्यविचारणीया (र०)। ३. आपदर्थे धनं रक्षेद् दारान् रक्षेद् धनैरपि (प०)। ४. उद्धरेदात्मनात्मानं नात्मानमवसादयेत् (गी०)। ५. उद्धरेद् दीनमात्मानं समर्थो धर्ममाचरेत्। ६. कर्तव्यं हि सतां वचः (क०)। ७. कर्तव्यो महदाश्रयः (प०)। ८. कस्यचित् किमपि नो हरणीयं, मर्मवाक्यमपि नोच्चरणीयम्। ९. गन्तव्यं राजपथे। १०. न स्वेच्छं व्यवहर्तव्यमात्मनो भूतिमिच्छता (क०)। ११. न्याय्यां वृत्तिं समाचरेत्। १२. परमार्थमविज्ञाय न भेतव्यं क्वचिन्नृभिः (क०)। १३. भवेन्न यस्य यत्कर्म, स तत् कुर्वन् विनश्यति (क०)। १४. मनःपूतं समाचरेत् (का० नी०)। १५. मौनं विधेयं सततं सुधीभिः। १६. मौनं सर्वार्थसाधकम्। १७. मौनं स्वीकृतिलक्षणम्। १८. यद्यपि शुद्धं लोकविरुद्धं नाचरणीयं नाचरणीयम्। १९. वचने का दरिद्रता। २०. वस्त्रपूतं पिबेज्जलम् (का० नी०)। २१. विश्वासं स्त्रीषु वर्जयेत्। २२. शत्रोरपि गुणा वाच्या दोषा वाच्या गुरोरपि। २३. सत्यपूतां वदेद् वाणीम्। २४. सर्वथा व्यवहर्तव्यं कुतो ह्यवचनीयता (उ०)। २५. सहसा विदधीत न क्रियामविवेकः परमापदां पदम् (कि०)। २६. सहसा हि कृतं पापं कथं मा भूद् विपत्तये (क०)। २७ सुलभो हि द्विषां भङ्गो, दुर्लभा सत्स्ववाच्यता (कि०)।

(ख) १. कुसंगति-निन्दा

१. असतां सङ्गदोषेण साधवो यान्ति विक्रियाम्। २. असाधुयोगा हि जयान्तरायाः प्रमाथिनीनां विपदां पदानि (कि०)। ३. कामं व्यसनवृक्षस्य मूलं दुर्जनसंगतिः (क०)। ४. दशाननोऽहरत् सीतां बन्धं प्राप्तो महोदधिः। ५. नीचाश्रयो हि महतामपमानहेतुः। ६. पवनः परागवाही रथ्यासु वहन् रजस्वलो भवति। ७. मधुरापि हि मूर्च्छयते विषविटपिसमाश्रिता वल्ली। ८. मूर्खैर्हि संगं कस्यास्ति शर्मणे (क०)। ९. हीयते हि मतिस्तात हीनैः सह समागमात्। समैश्च समतामेति विशिष्टैश्च विशिष्टताम् (हि०)।

(ख) २. सत्संगति-प्रशंसा

१. अनुसृत्य सतां वर्त्म यत् स्वल्पमपि तद् बहु। २. कस्य नाभ्युदये हेतुर्भवेत् साधुसमागमः (क०)। ३. कस्य सत्सङ्गो न भवेच्छुभः (क०)। ४. कामं न श्रेयसे कस्य संगमः पुण्यकर्मभिः (क०)। ५. किं वाऽभविष्यदरुणस्तमसां विभेत्ता, तं चेत्सहस्रकिरणो धुरि नाकरिष्यत् (शा०)। ६. गुणमहतां महते गुणाय योगः (कि०)। ७. चन्द्रचन्दनयोर्मध्ये शीतला साधुसंगतिः। ८. ध्रुवं फलाय महते महतां सह संगमः (क०)। ९. पद्मपत्रस्थितं वारि धत्ते मुक्ताफलश्रियम्। १०. पुण्यैरेव हि लभ्यते सुकृतिभिः सत्संगतिर्दुर्लभा। ११. प्रायः सज्जनसंगतौ हि लभते दैवानुरूपं फलम्। १२. प्रायेणाधममध्यमोत्तमगुणः संसर्गतो जायते (भ०)। १३. बृहत्सहायः कार्यान्तं क्षोदीयानपि गच्छति (शि०)। १४. विश्वासयत्याशु सतां हि योगः (कि०)। १५. संसर्गजा दोषगुणा भवन्ति।

१६. सङ्गः सतां किमु न मङ्गलमातनोति (भा०)। १७. सतां सद्भिः सङ्गः कथमपि हि पुण्येन भवति (उ०)। १८. सतां हि सङ्गः सकलं प्रसूयते (भा०)। १९. सत्संगतिः कथय किं न करोति पुंसाम् (भ०)। २०. सद्भिरेव सहासीत सद्भिः कुर्वीत संगतिम्। सद्भिर्विवादं मैत्रीं च नासद्भिः किंचिदाचरेत्। २१. समुन्नयन् भूतिमनार्यसंगमाद्, वरं विरोधोऽपि समं महात्मभिः (कि०)।

(ग) १. कृतघ्नता-निन्दा

१. अङ्कमारुह्य सुप्तं हि हत्वा किं नाम पौरुषम्। २. कृतघ्ना धनलोभान्धा नोपकारेक्षणक्षमाः (क०)। ३. कृतघ्नानां शिवं कुतः (क०)।

(ग) २. कृतज्ञता-प्रशंसा

१. कृतज्ञे सत्परीवारे प्रभौ सेवाऽफला कुतः (क०)। २. न क्षुद्रोऽपि प्रथम-सुकृतापेक्षया संश्रयाय, प्राप्ते मित्रे भवति विमुखः (मे०)। ३. न तथा कृतवेदिनां करिष्यन् प्रियतामेति यथा कृतावदानः (कि०)।

(घ) १. गुण-प्रशंसा

१. अम्बुगर्भो हि जीमूतश्चातकैरभिनन्द्यते(र०)। २. अलब्धशाणोत्कषणा नृपाणां, न जातु मौलौ मणयो वसन्ति (विक्रमांक०)। ३. एको हि दोषो गुणसंनिपाते निमज्जतीन्दोः किरणेष्विवाङ्कः (कु०)। ४. कमिवेशते रमयितुं न गुणाः (कि०)। ५. गुणाः पूजास्थानं गुणिषु न च लिङ्गं न च वयः (उ०)। ६. गुणाः प्रियत्वेऽधिकृता न संस्तवः (कि०)। ७. गुणिनि गुणज्ञो रमते, नागुणशीलस्य गुणिनि परितोषः। ८. गुणी गुणं वेत्ति न वेत्ति निर्गुणः। ९. गुणेषु क्रियतां यत्नः किमाटोपैः प्रयोजनम्। १०. गुणेषु यत्नः पुरुषेण कार्यो, न किंचिदप्राप्यतमं गुणानाम्। ११. गुरुतां नयन्ति हि गुणा न संहतिः (कि०)। १२. नाम यस्याभिनन्दन्ति द्विषोऽपि स पुमान् पुमान् (कि०)। १३. पदं हि सर्वत्र गुणैर्निधीयते (र०)। १४. परिजनताऽपि गुणाय सद्गुणानाम् (कि०)। १५. प्राकाश्यं स्वगुणोदयेन गुणिनो गच्छन्ति किं जन्मना। १६. प्रायः प्रत्ययमाधत्ते स्वगुणेषूत्तमादरः (कु०)। १७. लक्ष्मीरनुसरति नयगुणसमृद्धिम्। १८. वृणुते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः (कि०)। १९. सुलभा रम्यता लोके दुर्लभं हि गुणार्जनम् (कि०)। २०. सुलभो हि द्विषां भङ्गो दुर्लभा सत्स्ववाच्यता (कि०)। २१. स्थिरा शैली गुणवताम् (कुवलया०)। २२. हंसो यथा क्षीरमिवाम्बुमध्यात्। २३. हंसो हि क्षीरमादत्ते तन्मिश्रा वर्जयत्यपः (शा०)।

(घ) २. दुर्गुण-निन्दा

१. अतिरोषणश्चक्षुष्मानप्यन्ध एव जनः (ह०)। २. अशीलं कस्य नाम स्यान्न खलीकारकारणम् (क०)। ३. अशीलं कस्य भूतये (क०)। ४. अशीलस्य हतं कुलम्। ५. आपदेत्युभयलोकदूषणी वर्तमानमपथे हि दुर्मतिम् (कि०)। ६. गुणैर्विहीना बहु जल्पयन्ति। ७. पुरुषा अपि बाणा अपि गुणच्युताः कस्य न भयाय। ८. मद्यपस्य कुतः सत्यम्। ९. मद्यपाः किं न जल्पन्ति।

(ङ) तेजस्विता

१. अरुन्तुदत्वं महतां ह्यगोचरः (कि०)। २. अवन्ध्यकोपस्य विहन्तुरापदां, भवन्ति वश्याः स्वयमेव देहिनः (कि०)। ३. अविभिद्य निशाकृतं तमः, प्रभया नांशुमताऽप्युदीयते (कि०)। ४. अशनेरमृतस्य चोभयोर्वशिनश्चाम्बुधराश्च योनयः (कु०)। ५. इन्धनौघधगप्यग्निस्त्विषा नात्येति पूषणम् (शि०)। ६. उदिते तु सहस्रांशौ न खद्योतो न चन्द्रमाः। ७. उपहितपरमप्रभावधाम्नां, न हि जयिनां तपसामलङ्घ्यमस्ति (कि०)। ८. ऋते कृशानोर्नहि मन्त्रपूतमर्हन्ति तेजांस्यपराणि हव्यम् (कु०)। ९. ऋते रवेः क्षालयितुं क्षमेत कः, क्षपातमस्काण्डमलीमसं नभः (शि०)। १०. कथंचिन्नहि दिव्यानां, वीर्यं भजति मोघताम् (क०)। ११. किमिवावसादकरमात्मवताम् (कि०)। १२. किमिवास्ति यन्न सुकरं मनस्विभिः (कि०)। १३. को विहन्तुमलमास्थितोदये, वासरश्रियमशीतदीधितौ (शि०)। १४. जगति बहुमताः कस्य नाभ्यर्चनीयाः। १५. ज्वलयति महतां मनांस्यमर्षे, न हि लभतेऽवसरं सुखाभिलाषः (कि०)। १६. ज्वलितं न हिरण्यरेतसं, चयमास्कन्दति भस्मनां जनः (कि०)। १७. तमस्तपति घर्मांशौ कथमाविर्भविष्यति (शा०)। १८. तीव्रसत्त्वस्य न चिराद् भवन्त्येव हि सिद्धयः (क०)। १९. तेजसां हि न वयः समीक्ष्यते (र०)। २०. तेजोविहीनं विजहाति दर्पः, शान्तार्चिषं दीपमिव प्रकाशः (कि०)। २१. न खलु वयस्तेजसो हेतुः (भ०)। २२. न दूषितः शक्तिमतां स्वयंग्रहः (कि०)। २३. न परेषु महौजसश्छलादपकुर्वन्ति मलिम्लुचा इव (शि०)। २४. न मानिता चास्ति भवन्ति च श्रियः (कि०)। २५. नातिपीडयितुं भग्नानिच्छन्ति हि महौजसः (कि०)। २६. निवसन्नन्तर्दारुणि लङ्घ्यो वह्निर्न तु ज्वलितः। २७. परैरनिन्द्यं चरितं मनस्विनां पयोऽनुसारोचितमेव शोभते (क०)। २८. प्रकृतिः खलु सा महीयसः, सहते नान्यसमुन्नतिं यया (कि०)। २९. मनस्वी कार्यार्थी गणयति न दुःखं न च सुखम् (भ०)। ३०. महतां हि धैर्यमविभाव्यवैभवम् (कि०)। ३१. महानुभावः प्रतिहन्ति पौरुषम् (कि०)। ३२. मा जीवन् यः परावज्ञादुःखदग्धोऽपि जीवति (शि०)। ३३. वशिनां न निहन्ति धैर्यमनुभावगुणः (कि०)। ३४. विलम्बितुं न खलु सदा मनस्विनो, विधित्सवः कलहमवेक्ष्य विद्विषः (शि०)। ३५. श्रेयान् हि मानिनो मृत्युर्नेदगात्मप्रकाशनम् (क०)। ३६. संकल्पैकप्रधाना हि दिव्यानामखिलाः क्रियाः (क०)। ३७. सदाभिमानैकधना हि मानिनः (शि०)। ३८. सम्पत्सु हि सुसत्त्वानामेकहेतुः स्वपौरुषम् (क०)। ३९. संभवत्यभिजातानामभिमानो ह्यकृत्रिमः (क०)। ४०. सहते विपत्सहस्रं मानी नैवापमानलेशमपि (सहा०)। ४१. सहापकृष्टैर्महतां न संगतं, भवन्ति गोमायुसखा न दन्तिनः (कि०)। ४२. सामानाधिकरण्यं हि तेजस्तिमिरयोः कुतः (शि०)। ४३. सूर्ये तपत्यावरणाय दृष्टेः कल्पेत लोकस्य कथं तमिस्रा (र०)। ४४. स्थिता तेजसि मानिता (कि०)। ४५. स्ववीर्यगुप्ता हि मनोः प्रसूतिः (र०)। ४६. हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकाऽपि वा (र०)।

(च) मित्रता

१. आकरः स्वपरभूरिकथानां प्रायशो हि सुहृदोः सहवासः (नै०)। २. आपत्काले तु सम्प्राप्ते यन्मित्रं मित्रमेव तत् (प०)। ३. आरम्भगुर्वी क्षयिणी क्रमेण, लघ्वी पुरा वृद्धिमती च पश्चात्। दिनस्य पूर्वार्धपरार्धभिन्ना, छायेव मैत्री खलसज्जनानाम् (प०)। ४. एकं मित्रं भूपतिर्वा यतिर्वा (भ०)। ५. किमु चोदिताः प्रियहितार्थकृतः कृतिनो भवन्ति सुहृदः सुहृदाम् (शि०)। ६. कुवाक्यान्तं च सौहृदम् (प०)। ७. कुशे कस्यास्ति सौहृदम्। ८. तत्तस्य किमपि द्रव्यं यो हि यस्य प्रियो जनः (उ०)। ९. नहि विचलति मैत्री दूरतोऽपि स्थितानाम्। १०. नालं सुखाय सुहृदो नालं दुःखाय शत्रवः (महा०)। ११. परोऽपि हितवान् वन्धुः (प०)। १२. भावस्थिराणि जननान्तरसौहृदानि (शा०)। १३. मनोभूषा मैत्री। १४. मन्दायन्ते न खलु सुहृदामभ्युपेतार्थकृत्याः (मे०)। १५. मित्रलाभमनु लाभसम्पदः (कि०)। १६. मित्रार्थगणितप्राणा दुर्लभा हि महोदयाः (क०)। १७. यतः सतां हि संगतं, मनीषिभिः साप्तपदीनमुच्यते (कु०)। १८. विदेशे बन्धुलाभो हि, मरावमृतनिर्झरः (क०)। १९. विप्रलम्भोऽपि लाभाय, सति प्रियसमागमे (कि०)। २०. समानशीलव्यसनेषु सख्यम् (हि०)। २१. समीरणो नोदयिता भवेति, व्यादिश्यते केन हुताशनस्य (कु०)। २२. स सुहृद् व्यसने यः स्यात् (प०)। २३. स्वं जीवितमपि सन्तो न गणयन्ति मित्रार्थे (प०)। २४. स्वयमेव हि वातोऽग्नेः, सारथ्यं प्रतिपद्यते (र०)। २५. हितप्रयोजनं मित्रम्।

(छ) वीरता (धीरता), (वीर, धीर)

१. अनुत्सेकः खलु विक्रमालंकारः (वि०)। २. अमर्षणः शोणितकांक्षया किं, पदा स्पृशन्तं दशति द्विजिह्वः (र०)। ३. अयमश्वः पताकेयमथवा वीरघोषणम् (उ०)। ४. अल्पसत्त्वेषु धीराणामवज्ञैव हि शोभते (क०)। ५. अश्नुते स हि कल्याणं, व्यसने यो न मुह्यति (क०)। ६. असिद्धार्था निवर्तन्ते, न हि धीराः कृतोद्यमाः (क०)। ७. आपत्काले च कष्टेऽपि, नोत्साहस्त्यज्यते बुधैः (क०)। ८. आपत्सु धीरान् पुरुषान् स्वयमायान्ति सम्पदः (क०)। ९. आपदि स्फुरति प्रज्ञा, यस्य धीरः स एव हि (क०)। १०. आपद्यपि त्याज्यं न सत्त्वं सम्पदेषिभिः (क०)। ११. आरब्धा ह्यसमाप्तैव, किं धीरैस्त्यज्यते क्रिया (क०)। १२. आरब्धे हि सुदुष्करेऽपि महतां मध्ये विरामः कुतः (क०)। १३. उत्साहैकधने हि वीरहृदये नाप्नोति खेदोऽन्तरम्(क०)। १४. उन्नतो न सहते तिरस्क्रियाम्। १५. एकोऽप्याश्रयहीनोऽपि लक्ष्मीं प्राप्नोति सत्त्ववान् (क०)। १६. जीवन् हि धीरोऽभिमतं, किं नाम न यदाप्नुयात् (क०)। १७. ज्वलयति महतां मनांस्यमर्षे, न हि लभतेऽवसरं सुखाभिलाषः (कि०)। १८. न जात्ववसरे प्राप्ते, सत्त्ववानवसीदति (क०)। १९. ननु प्रवातेऽपि निष्कम्पा गिरयः (शा०)। २०. न शूरा विसहन्ते हि, स्त्रीनिमित्तं पराभवम्(क०)। २१. न स शक्नोति किं यस्य, प्रज्ञा नापदि हीयते(क०)।

२२. नहि सत्त्वावसादेन, स्वल्पाप्यापद् विलङ्घ्यते (क०)। २३. निसर्गः स हि धीराणां, यदापद्यधिकं दृढम् (क०)। २४. न्याय्यात् पथः प्रविचलन्ति पदं न धीराः (भ०)। २५. परवृद्धिमत्सरि मनो हि मानिनाम् (शि०)। २६. पराभवोऽप्युत्सव एव मानिनाम्। २७. प्रकृतिरियं सत्त्ववताम्। २८. प्रतिपन्नसुहृत्कार्यनिर्वाहं धीरसत्त्वता (क०)। २९. प्राणव्ययाय शूराणां, जायते हि रणोत्सवः (क०)। ३०. प्राणेभ्योऽपि हि धीराणां, प्रिया शत्रुप्रतिक्रिया (नै०)। ३१. भुजे वीर्यं निवसति न वाचि (ह०)। ३२. भीता इव हि धीराणां, यान्ति दूरे विपत्तयः (क०)। ३३. महीयांसः प्रकृत्या मितभाषिणः (शि०)। ३४. विकारहेतौ सति विक्रियन्ते, येषां न चेतांसि त एव धीराः (कु०)। ३५. विनाप्यर्थैर्धीरः स्पृशति बहुमानोन्नतिपदम् (हि०)। ३६. शतेषु जायते शूरः। ३७. शूरं कृतज्ञं दृढसौहृदं च, लक्ष्मीः स्वयं याति निवासहेतोः (प०)। ३८. शूरस्य मरणं तृणम्। ३९. शूरा हि प्रणतिप्रियाः (क०)। ४०. स धीरो यो न संमोहमापत्कालेऽपि गच्छति (क०)।

(ज) शिष्टाचार (सदाचार)

१. आचारः प्रथमो धर्मः (म०)। २. आत्मेश्वराणां नहि जातु विघ्नाः, समाधिभेदप्रभवो भवन्ति (कु०)। ३. उपभुक्ते हि तारुण्ये, प्रशमः सद्भिरिष्यते (क०)। ४. महाजनो येन गतः स पन्थाः (प०)। ५. विनयाद्याति पात्रताम्। ६. विनयो हि सतां व्रतम्। ७. शीलं परं भूषणम्। ८. शीलं भूषयते कुलम्। ९. शीलं हि विदुषां धनम् (क०)। १०. शीलं हि सर्वस्य नरस्य भूषणम्। ११. शुभाचारस्य कः कुर्यादशुभं हि सचेतनः (क०)। १२. सकलं शीलेन कुर्याद् वशम्। १३. सकलगुणभूषा च विनयः।

(झ) १. सज्जनप्रशंसा

१. अक्षोभ्यतैव महतां महत्त्वस्य हि लक्षणम् (क०)। २. अगम्यं मन्यते सुगम्। ३. अङ्गीकृतं सुकृतिनः परिपालयन्ति। ४. अनुगृह्णन्ति हि प्रायो देवता अपि तादृशम् (क०)। ५. अनुत्सेकः खलु विक्रमालंकारः (वि०)। ६. अनुहुंकुरुते घनध्वनिं न हि गोमायुरुतानि केसरी (शि०)। ७. अयशोभीरवः किं न, कुर्वते बत साधवः (क०)। ८. अयातपूर्वा परिवादगोचरं, सतां हि वाणी गुणमेव भाषते (कि०)। ९. अरुन्तुदत्वं महतां ह्यगोचरः (कि०)। १०. अहह महतां निःसीमानश्चरित्रविभूतयः (भ०)। ११. आदानं हि विसर्गाय, सतां वारिमुचामिव (र०)। १२. आपन्नार्तिप्रशमनफलाः सम्पदो ह्युत्तमानाम् (मे०)। १३. आवेष्टितो महासर्पैश्चन्दनः किं विषायते। १४. उत्तरोत्तरशुभो हि विभूनां, कोऽपि मञ्जुलतमः क्रमवादः (नै०)। १५. उत्सहन्ते न हि द्रष्टुमुत्तमाः स्वजनापदम् (क०)। १६. उदारचरितानां तु वसुधैव कुटुम्बकम् (हि०)। १७. उदारस्य तृणं वित्तम्। १८. कण्ठे सुधा वसति वै खलु सज्जनानाम्।

१९. कथमपि भुवनेऽस्मिंस्तादृशाः संभवन्ति (मृ०)। २०. कदापि सत्पुरुषाः शोकवास्तव्या न भवन्ति (शा०)। २१. करुणार्द्रा हि सर्वस्य, सन्तोऽकारण-बान्धवाः (क०)। २२. कैषां न स्यादभिमतफला प्रार्थना ह्युत्तमेषु (मे०)। २३. क्रियासिद्धिः सत्त्वे भवति महतां नोपकरणे (भ०)। २४. क्षुद्रेऽपि नूनं शरणं प्रपन्ने, ममत्वमुच्चैः शिरसां सतीव (कु०)। २५. खलसङ्गेऽपि नैष्ठुर्यं, कल्याणप्रकृतेः कुतः। २६. ग्रहीतुमार्यान् परिचर्यया मुहुर्महानुभावा हि नितान्तमर्थिनः (शि०)। २७. घना-म्बुना राजपथे हि पिच्छिले, क्वचिद् बुधैरप्यपथेन गम्यते (नै०)। २८. घनाम्बुभिर्बहु-लितनिम्नगाजलैर्जलं नहि व्रजति विकारमम्बुधेः (शि०)। २९. चित्ते वाचि क्रियायां च, साधूनामेकरूपता। ३०. जितशान्तेषु धीराणां स्नेह एवोचितोऽरिषु (क०)। ३१. ते भूमण्डलमण्डनैकतिलकाः सन्तः कियन्तो जनाः। ३२. त्यजन्त्युत्तमसत्त्वा हि, प्राणानपि न सत्पथम् (क०)। ३३. दावानलप्लोषविपत्तिमन्योऽरण्यस्य हर्तुं जलदात् प्रभुः किम् (कु०)। ३४. दुर्लक्ष्यचिह्ना महतां हि वृत्तिः (कि०)। ३५. देवद्विजसपर्या हि, कामधेनुर्मता सताम् (क०)। ३६. देहपातमपीच्छन्ति, सन्तो नाविनयं पुनः (क०)। ३७. धनिनामितरः सतां पुनर्गुणवत्संनिधिरेव संनिधिः (शि०)। ३८. न चलति खलु वाक्यं सज्जनानां कदाचित्। ३९. न प्राणान्ते प्रकृतिविकृतिर्जायते चोत्तमानाम्। ४०. न भवति पुनरुक्तं भाषितं सज्जनानाम्। ४१. न भवति महतां हि क्वापि मोघः प्रसादः। ४२. नहि कृतमुपकारं साधवो विस्मरन्ति। ४३. निजहृदि विकसन्तः सन्ति सन्तः कियन्तः। ४४. निर्वाहः प्रतिपन्नवस्तुषु सतामेतद् हि गोत्रव्रतम्। ४५. न्यायाधारा हि साधवः (कि०)। ४६. परदुःखेनापि दुःखिता विरलाः। ४७. परिजनताऽपि गुणाय सज्जनानाम् (कि०)। ४८. पुण्यवन्तो हि सन्तानं पश्यन्त्युच्चैः कृतान्वयम् (क०)। ४९. प्रकृतिसिद्धमिदं हि महात्मनाम् (भ०)। ५०. प्रणामान्तः सतां कोपः। ५१. प्रणिपात-प्रतीकारः संरम्भो हि महात्मनाम् (र०)। ५२. प्रतिपन्नार्थनिर्वाहं सहजं हि सतां व्रतम् (क०)। ५३. प्रत्युक्तं हि प्रणयिषु सतामीप्सितार्थक्रियैव (मे०)। ५४. प्रवर्तते नाकृतपुण्य-कर्मणां, प्रसन्नगम्भीरपदा सरस्वती (कि०)। ५५. प्रसन्नानां वाचः फलमपरिमेयं प्रसुवते। ५६. प्रसादचिह्नानि पुरःफलानि (र०)। ५७. प्रह्वेष्वनिर्बन्धरुषो हि सन्तः (र०)। ५८. प्रायेण साधुवृत्तानामस्थायिन्यो विपत्तयः। ५९. प्रायेणाकारणमित्राण्यतिकरुणार्द्राणि च सदा खलु भवन्ति सतां चेतांसि (का०)। ६०. प्रारभ्य चोत्तमजना न परित्यजन्ति (भ०)। ६१. बताश्रितानुरोधेन किं न कुर्वन्ति साधवः (क०)। ६२. ब्रुवते हि फलेन साधवो, न तु कण्ठेन निजोपयोगिताम् (नै०)। ६३. भक्त्या हि तुष्यन्ति महानुभावाः। ६४. भज-न्त्यात्मंभरित्वं हि, दुर्लभेऽपि न साधवः (क०)। ६५. भवति महत्सु न निष्फलः प्रयासः (शि०)। ६६. भवो हि लोकाभ्युदयाय तादृशाम्। ६७. मनस्येकं वचस्येकं कर्मण्येकं

महात्मनाम् (हि०) । ६८. महतां हि धैर्यमविभाव्यवैभवम् (कि०) । ६९. महतां हि सर्वमथवा जनातिगम् (शि०) । ७०. महतामनुकम्पा हि विरुद्धेषु प्रतिक्रिया (क०) । ७१. महतीमपि श्रियमवाप्य विस्मयः, सुजनो न विस्मरति जातु किंचन (शि०) । ७२. महते रुजन्नपि गुणाय महान् (कि०) । ७३. महान् महत्येव करोति विक्रमम् (प०) । ७४. मोघा हि नाम जायेत महत्सूपकृतिः कुतः (क०) । ७५. यथा चित्तं तथा वाचो, यथा वाचस्तथा क्रियाः । ७६. रहस्यं साधूनामनुपधि विशुद्धं विजयते (उ०) । ७७. रिपुष्वपि हि भीतेषु सानुकम्पा महाशयाः (क०) । ७८. वज्रादपि कठोराणि, मृदूनि कुसुमादपि । लोकोत्तराणां चेतांसि, को हि विज्ञातुमर्हति (उ०) । ७९. विक्रियायै न कल्पन्ते सम्बन्धाः सदनुष्ठिताः (कु०) । ८०. विप्रियमप्याकर्ण्य ब्रूते प्रियमेव सर्वदा सुजनः । ८१. विवेकधाराशतधौतमन्तः, सतां न कामः कलुषीकरोति (नै०) । ८२. व्रताभिरक्षा हि सतामलंक्रिया (कि०) । ८३. संपत्सु महतां चित्तं भवत्युत्पलकोमलम् (भ०) । ८४. संपत्सु हि सुसत्त्वानामेकहेतुः स्वपौरुषम् (क०) । ८५. सतां महत्संमुखधावि पौरुषम् (नै०) । ८६. सतां हि चेतः शुचितात्मसाक्षिका (नै०) । ८७. सतां हि प्रियंवदता कुलविद्या (ह०) । ८८. सतां हि साधुशीलत्वात् स्वभावो न निवर्तते । ८९. सत्यनियतवचसं वचसा सुजनं जनाश्चलयितुं क ईशते (शि०) । ९०. सद्भावार्द्रः फलति न चिरेणोपकारो महत्सु (मे०) । ९१. सद्भिस्तु लीलया प्रोक्तं शिलालिखितमक्षरम् । ९२. सद्य एव सुकृतां हि पच्यते, कल्पवृक्षफलधर्मि कांक्षितम् (र०) । ९३. सन्तः परार्थे कुर्वाणा नावेक्षन्ते प्रतिक्रियाम् (महा०) । ९४. सन्तः परीक्ष्यान्यतरद् भजन्ते (मालविका०) । ९५. सुदुर्ग्रहान्तःकरणा हि साधवः (कि०) । ९६. स्वामापदं प्रोज्झ्य विपत्तिमग्नं, शोचन्ति सन्तो ह्युपकारिपक्षम् (कि०) । ९७. ह्रदे गभीरे हृदि चावगाढे, शंसन्ति कार्यावतरं हि सन्तः (नै०) ।

(झ) २. दुर्जन-निन्दा

१. अकृत्यं मन्यते कृत्यम् (प०)। २. अत्युच्चैर्भवति लघीयसां हि धाष्टर्यम् (शि०) । ३. अनुकूलेऽपि कलत्रे, नीचः परदारलम्पटो भवति । ४. अन्यस्माल्लब्धपदो नीचः प्रायेण दुःसहो भवति । ५. अपि मुदमुपयान्तो वाग्विलासैः स्वकीयैः, परभणितिषु तृप्तिं यान्ति सन्तः कियन्तः । ६. अभक्ष्यं मन्यते भक्ष्यम् । ७. अलोकसामान्यमचिन्त्यहेतुकं, द्विषन्ति मन्दाश्चरितं महात्मनाम् (कु०) । ८. अव्यवस्थितचित्तस्य प्रसादोऽपि भयंकरः (भ०) । ९. अव्यापारेषु व्यापारं, यो नरः कर्तुमिच्छति (प०) । १०. अश्रेयसे न वा कस्य, विश्वासो दुर्जने जने (क०) । ११. असद्वृत्तेरहोवृत्तं दुर्विभावं विधेरिव (कि०) । १२. असन्मैत्री हि दोषाय, कूलच्छायेव सेविता (कि०) । १३. अहो विश्वास्य वञ्च्यन्ते, धूर्तैश्छद्मभिरीश्वराः (क०) । १४. अहो सहन्ते बत नो परोदयम् । १५. उष्णो दहति चाङ्गारः, शीतः कृष्णायते करम् (प०) । १६. कवले पतिता सद्यो वमयति

ननु मक्षिकाऽन्नभोक्तारम् । १७. कथापि खलु पापानामलमश्रेयसे यतः (शि०) । १८. किं मर्दितोऽपि कस्तूर्या, लशुनो याति सौरभम् । १९. किमिव ह्यस्ति दुरात्मनामलङ्घ्यम् (कि०) । २०. कोऽन्यो हुतवहाद् दग्धुं प्रभवति (शा०) । २१. को वा दुर्जनवागुरासु पतितः क्षेमेण यातः पुमान् (प०) । २२. क्वाश्रयोऽस्ति दुरात्मनाम् । २३. क्षारं पिबति पयोधेर्वर्षत्यम्भोधरो मधुरमम्भः । २४. गुणार्जनोच्छ्रायविरुद्धबुद्धयः, प्रकृत्यमित्रा हि सतामसाधवः (कि०) । २५. तरुणीकच इव नीचः, कौटिल्यं नैव विजहाति । २६. दुःखान्धा हि पतन्त्येव, विपच्छ्वभ्रेषु कातराः (क०) । २७. दुग्धधौतोऽपि किं याति, वायसः कलहंसताम् । २८. दुर्जनः परिहर्तव्यो, विद्ययाऽलंकृतोऽपि सन् (भ०) । २९. दुर्जनस्य कुतः क्षमा । ३०. दुर्जनस्यार्जितं वित्तं, भुज्यते राजतस्करैः । ३१. दूरतः पर्वता रम्याः । ३२. दोषग्राही गुणत्यागी पल्लोलीव हि दुर्जनः (प०) । ३३. न परिचयो मलिनात्मनां प्रधानम् (शि०) । ३४. नासद्भिः किंचिदाचरेत् । ३५. निसर्गतोऽन्तर्मलिना ह्यसाधवः । ३६. नीचो वदति न कुरुते, वदति न साधुः करोत्येव । ३७. परवृद्धिषु बद्धमत्सराणां, किमिव ह्यस्ति दुरात्मनामलङ्घ्यम् (कि०) । ३८. प्रकृतिसिद्धमिदं हि दुरात्मनाम् । ३९. प्रकृत्यमित्रा हि सतामसाधवः (कि०) । ४०. प्रासादशिखरस्थोऽपि, काकः किं गरुडायते (प०) । ४१. बन्धुः को नाम दुष्टानाम् । ४२. भूयोऽपि सिक्तः पयसा घृतेन, न निम्बवृक्षो मधुरत्वमेति । ४३. भ्रष्टस्य का वा गतिः । ४४. मणिना भूषितः सर्पः, किमसौ न भयंकरः (भ०) । ४५. मन्ये दुर्जनचित्तवृत्तिहरणे धाताऽपि भग्नोद्यमः । ४६. मात्सर्यरागोपहतात्मनां हि, स्खलन्ति साधुष्वपि मानसानि (कि०) । ४७. ये तु घ्नन्ति निरर्थकं परहितं ते के न जानीमहे (भ०) । ४८. विचित्रमायाः कितवा ईदृशा एव सर्वदा (क०) । ४९. विप्रदन्ता ह्यविनीतसम्पदः (कि०) । ५०. विश्वासः कुटिलेषु कः (क०) । ५१. शाम्येत् प्रत्यपकारेण नोपकारेण दुर्जनः (कु०) । ५२. सरित्पूरप्रपूर्णोऽपि, क्षारो न मधुरायते (यो०) । ५३. सर्पः क्रूरः खलः क्रूरः, सर्पात् क्रूरतरः खलः (चा०) । ५४. साहसं नैरपेक्ष्यं च, कितवानां निसर्गजम् (क०) । ५५. स्पृशन्ति न नृशंसानां, हृदयं बन्धुबुद्धयः (नै०) । ५६. स्पृशन्नपि गजो हन्ति (प०) । ५७. हिंसा बलमसाधूनाम् (महा०) । ५८. होतारमपि जुह्वन्तं, स्पृष्टो दहति पावकः (प०) ।

(ञ) १. सत्कर्म-प्रशंसा

१. अचिन्त्यं हि फलं सूते सद्यः सुकृतपादपः (क०) । २. उप्तं सुकृतबीजं हि, सुक्षेत्रेषु महत्फलम् (क०) । ३. कुरूपता शीलतया विराजते । ४. क्रिया हि वस्तूपहिता प्रसीदति (र०) । ५. गृहानुपैतुं प्रणयादभीप्सवो, भवन्ति नापुण्यकृतां मनीषिणः (शि०) । ६. धर्मपरायणानां सदा समीपसंचारिण्यः कल्याणसंपदो भवन्ति (का०) ७. नहि कल्याणकृत् कश्चिद्, दुर्गतिं तात गच्छति । ८. रक्षन्ति पुण्यानि पुरा कृतानि । ९. वृत्तं यत्नेन संरक्षेद्, वित्तमेति च याति च (महा०) । १०. वृत्तं हि महितं सताम् । ११. शुभकृन्नहि सीदति (क०) । १२.स्वल्पमप्यस्य धर्मस्य, त्रायते महतो भयात् (गी०) ।

(ञ) २. दुष्कर्म-निन्दा

१. अनार्यः परदारव्यवहारः (शा०)। २. अनार्यजुष्टेन पथा, प्रवृत्तानां शिवं कुतः (क०)। ३. अनिर्वर्णनीयं परकलत्रम् (शा०)। ४. अपन्थानं तु गच्छन्तं, सोदरोऽपि विमुञ्चति। ५. कष्टो ह्यविनयक्रमः (क०)। ६. पापप्रभावात् नरकं प्रयाति। ७. पापे कर्मण्यवज्ञातहितवाक्ये कुतः सुखम् (क०)। ८. पूर्वावधीरितं श्रेयो, दुःखं हि परिवर्तते (शा०)। ९. प्रतिबध्नाति हि श्रेयः, पूज्यपूजाव्यतिक्रमः (र०)। १०. भवति हृदयदाही शल्यतुल्यो विपाकः (भ०)। ११. वरं क्लैव्यं पुंसां, न च परकलत्राभिगमनम् (भ०)। १२. वरं प्राणत्यागो न च पिशुनवाक्येष्वभिरुचिः। १३. वरं भिक्षाशित्वं न मानपरिखण्डनम्। १४. वरं मौनं कार्यं न च वचनमुक्तं यदनृतम्।

(ट) स्वावलम्बन

१. आत्मानमात्मनाऽनवसाद्यैवोद्धरन्ति सन्तः (द०)। २. उद्धरेदात्मनात्मानं, नात्मानमवसादयेत् (गी०)। ३. गुणसंहतेः समतिरिक्तमहो, निजमेव सत्त्वमुपकारि सताम् (कि०)। ४. नास्ति चात्मसमं बलम्। ५. लघयन् खलु तेजसा जगन्न महानिच्छति भूतिमन्यतः (कि०)। ६. विनिपातनिवर्तनक्षमं, मतमालम्बनमात्मपौरुषम् (कि०)।

(११) विद्या

(क) ज्ञान

१. कर्मणो ज्ञानमतिरिच्यते। २. न ज्ञानात् परमं चक्षुः। ३. न विवेकं विना ज्ञानम्। ४. नास्ति ज्ञानात् परं सुखम्। ५. प्रज्ञा नाम बलं ह्येवं, निष्प्रज्ञस्य बलेन किम् (क०)। ६. प्रज्ञाबलं च सर्वेषु, मुख्यं कार्येषु साधनम् (क०)। ७. बुद्धिः कर्मानुसारिणी (चा०)। ८. बुद्धिर्नाम च सर्वत्र, मुख्यं मित्रं न पौरुषम् (क०)। ९. बुद्धेः फलमनाग्रहः। १०. मतिरेव बलाद् गरीयसी (हि०)। ११. स तु निरवधिरेकः सज्जनानां विवेकः। १२. सुकृतः परिशुद्ध आगमः, कुरुते दीप इवार्थदर्शनम् (कि०)। १३. स्वस्थे चित्ते बुद्धयः संभवन्ति।

(ख) वाक्-प्रशंसा

१. अर्थभारवती वाणी, भजते कामपि श्रियम्। २. कः परः प्रियवादिनाम्। ३. क्षीयन्ते खलु भूषणानि सततं वाग्भूषणं भूषणम् (भ०)। ४. मुखरताऽवसरे हि विराजते (कि०)। ५. सदोभूषा सूक्तिः। ६. सुदुर्लभाः सर्वमनोरमा गिरः (कि०)। ७. हितं मनोहारि च दुर्लभं वचः (कि०)।

(ग) वाग्मिता

१. अल्पाक्षररमणीयं यः कथयति निश्चितं स खलु वाग्मी। २. भवन्ति ते सभ्यतमा विपश्चितां, मनोगतं वाचि निवेशयन्ति ये। नयन्ति तेष्वप्युपपन्ननैपुणा, गभीरमर्थं कतिचित् प्रकाशताम् (कि०)। ३. मितं च सारं च वचो हि वाग्मिता (नै०)। ४. मुखरताऽवसरे हि विराजते (कि०)। ५. वक्ता दशसहस्रेषु। ६. वक्ता श्रोता च यत्रास्ति, रमन्ते तत्र सम्पदः।

(घ) विद्या

१. अजरामरवत् प्राज्ञो विद्यामर्थं च चिन्तयेत्। २. आलस्योपहता विद्या (हि०)। ३. ऋते ज्ञानान्न मुक्तिः। ४. कणशः क्षणशश्चैव विद्यामर्थं च साधयेत्। ५. कामिनश्च कुतो विद्या। ६. का विद्या कवितां विना। ७. किं किं न साधयति कल्पलतेव विद्या। ८. किं जीवितेन पुरुषस्य निरक्षरेण (भ०)। ९. कुतो विद्यार्थिनः सुखम्। १०. जलबिन्दुनिपातेन क्रमशः पूर्यते घटः। ११. ज्ञानमेव शक्तिः। १२. ज्ञानस्यावरणं क्षमा। १३. तस्य विस्तारिता बुद्धिस्तैलबिन्दुरिवाम्भसि। १४. तस्य संकुचिता बुद्धिर्घृतबिन्दुरिवाम्भसि। १५. दुरधीता विषं विद्या (हि०)। १६. धिग्जीवितं शास्त्रकलोज्झितस्य। १७. न च विद्यासमो बन्धुः। १८. पठतो नास्ति मूर्खत्वम्। १९. पूर्वपुण्यतया विद्या। २०. माता शत्रुः पिता वैरी, येन बालो न पाठितः (हि०)। २१. या लोकद्वयसाधनी तनुभृतां सा चातुरी चातुरी। २२. विद्यातुराणां न सुखं न निद्रा। २३. विद्या ददाति विनयम् (हि०)। २४. विद्याधनं सर्वधनप्रधानम्। २५. विद्या नाम नरस्य रूपमधिकम्। २६. विद्या परं दैवतम्। २७. विद्या मित्रं प्रवासे च। २८. विद्या योगेन रक्ष्यते। २९. विद्या रूपं कुरूपिणाम्। ३०. विद्याविहीनः पशुः। ३१. विद्यासमं नास्ति शरीरभूषणम्। ३२. विद्या सर्वस्य भूषणम्। ३३. विद्या स्तब्धस्य निष्फला। ३४. वेदाज्जानन्ति पण्डिताः। ३५. शास्त्रं हि निश्चितधियां क्व न सिद्धिमेति (शि०)। ३६. शास्त्राद् रूढिर्बलीयसी। ३७. शोभन्ते विद्यया विप्राः। ३८. श्रोत्रस्य भूषणं शास्त्रम्। ३९. सुखार्थिनः कुतो विद्या, विद्यार्थिनः कुतः सुखम्।

(ङ) १. विद्वत्प्रशंसा

१. अगाधजलसंचारी न गर्वं याति रोहितः (प०)। २. अलब्धशाणोत्कषणा नृपाणां, न जातु मौलौ मणयो वसन्ति (विक्रमांक०)। ३. किमज्ञेयं हि धीमताम् (क०)। ४. झटिति पराशयवेदिनो हि विज्ञाः (नै०)। ५. न खलु धीमतां कश्चिदविषयो नाम (शा०)। ६. ननु वक्तृविशेषनिःस्पृहा, गुणगृह्या वचने विपश्चितः (कि०)। ७. ननु विमृश्य कृती कुरुतेऽखिलम्। ८. नहीङ्गितज्ञोऽवसरेऽवसीदति (कि०)। ९. परेङ्गितज्ञानफला हि बुद्धयः। १०. प्रतिभातश्च पश्यन्ति सर्वं प्रज्ञावतां धियः (क०)। ११. प्रस्तुतार्थविरुद्धं हि, कोऽभिदध्यादबालिशः (क०)। १२. बलवदपि शिक्षितानामात्मन्यप्रत्ययं चेतः (शा०)। १३. यत्र विद्वज्जनो नास्ति, श्लाघ्यस्तत्राल्पधीरपि। १४. युक्तं न वा युक्तमिदं विचिन्त्य, वदेद् विपश्चिन्महतोऽनुरोधात्। १५. युक्तियुक्तं प्रगृह्णीयाद् बालादपि विचक्षणः। १६. वर्तमानेन कालेन वर्तयन्ति विचक्षणाः। १७. विद्वान् कुलीनो न करोति गर्वम्। १८. विद्वान् सर्वगुणेषु पूजिततनुर्मूर्खस्य नान्या गतिः। १९. विद्वान् सर्वत्र पूज्यते (चा०)। २०. संकटे हि परीक्ष्यन्ते प्राज्ञाः शूराश्च संगरे (क०)। २१. सभारत्नं विद्वान्। २२. सहस्रेषु च पण्डितः। २३. सारं गृह्णन्ति पण्डिताः। २४. स्वस्थे को वा न पण्डितः (प०)।

(ङ) २. मूर्ख-निन्दा

१. अगुणस्य हतं रूपम् । २. अजागलस्तनस्येव तस्य जन्म निरर्थकम् (प०) । ३. अज्ञता कस्य नामेह, नोपहासाय जायते (क०) । ४. अज्ञानामृतचेतसामतिरुषां कोऽर्थस्तिरश्चां गुणैः । ५. अनार्यसंगमाद् ; वरं विरोधोऽपि समं महात्मभिः (कि०) । ६. अन्तःसारविहीनानामुपदेशो न विद्यते । ७. अन्धस्य दीपो बधिरस्य गीतम् । ८. अर्धो घटो घोषमुपैति नूनम् । ९. अल्पविद्यो महागर्वी । १०. अल्पस्य हेतोर्बहु हातुमिच्छन्, विचारमूढः प्रतिभासि मे त्वम् (र०) । ११. अवस्तुनि कृतक्लेशो मूर्खो यात्यवहास्यताम् (क०) । १२. आपदेत्युभयलोकदूषणी, वर्तमानमपथे हि दुर्मतिम् (कि०) । १३. उपदेशो हि मूर्खाणां प्रकोपाय न शान्तये (प०) । १४. क्षमन्ते न विचारं हि, मूर्खा विषयलोलुपाः (क०) । १५. जायन्ते वत मूढानां संवादा अपि तादृशाः (क०) । १६. ज्ञानलवदुर्विदग्धं ब्रह्मापि नरं न रञ्जयति (भ०) । १७. दर्दुरा यत्र वक्तारस्तत्र मौनं हि शोभनम् । १८. न तु प्रतिनिविष्टमूर्खजनचित्तमाराधयेत् । १९. निष्प्रज्ञो नाशयत्येव प्रभोरर्थमथात्मनः (क०) । २०. प्राप्तोऽप्यर्थः क्षणादेव हार्यते मन्दबुद्धिना (क०) । २१. बलं मूर्खस्य मौनित्वम् । २२. बहुवचनमल्पसारं यः कथयति विप्रलापी सः । २३. भवति योजयितुर्वचनीयता । २४. मदमूढबुद्धिषु विवेकिता कुतः (शि०) । २५. मूढः परप्रत्ययनेयबुद्धिः (मालविका०) । २६. मूर्खस्य किं शास्त्रकथाप्रसङ्गः । २७. मूर्खाणां बोधको रिपुः । २८. मूर्खोऽनुभवति क्लेशं, न कार्यं कुरुते पुनः (क०) । २९. मोहान्धमविवेकं हि श्रीश्चिराय न सेवते (क०) । ३०. लोके पशुश्च मूर्खश्च निर्विवेकमती समौ (क०) । ३१. लोकोपहसिताः शश्वत् सीदन्त्येव ह्यबुद्धयः (क०) । ३२. विद्या विवादाय धनं मदाय । ३३. विद्याविहीनः पशुः । ३४. विभूषणं मौनमपण्डितानाम् (भ०) । ३५. संवृणोति खलु दोषमज्ञता (कि०) । ३६. सर्वस्यौषधमस्ति शास्त्रविहितं मूर्खस्य नास्त्यौषधम् (प०) । ३७. स्रजमपि शिरस्यन्धः क्षिप्तां धुनोत्यहिशंकया (शा०) । ३८. स्वगृहे पूज्यते मूर्खः । ३९. हितोपदेशो मूर्खस्य कोपायैव न शान्तये (क०) ।

(१२) विचारात्मक

(क) आशा

१. आशा नाम नदी मनोरथजला तृष्णातरङ्गाकुला (भ०) । २. आशाबन्धः कुसुमसदृशं प्रायशो ह्यङ्गनानां, सद्यःपाति प्रणयि हृदयं विप्रयोगे रुणद्धि (मे०) । ३. एवमाशाग्रहग्रस्तैः क्रीडन्ति धनिनोऽर्थिभिः (हि०) । ४. गुर्वपि विरहदुःखमाशाबन्धः साहयति (शा०) । ५. धिगाशा सर्वदोषभूः । ६. नास्ति तृष्णासमो व्याधिः ।

(ख) उद्यम-प्रशंसा

१. अगच्छन् वैनतेयोऽपि पदमेकं न गच्छति। २. अचिरांशुविलासचञ्चला, ननु लक्ष्मीः फलमानुषङ्गिकम् (कि०)। ३. अप्राप्यं नाम नेहास्ति धीरस्य व्यवसायिनः (क०)। ४. अर्थो हि नष्टकार्यार्थैर्नायत्नेनाधिगम्यते (रा०)। ५. इह जगति हि न निरीहदेहिनं श्रियः संश्रयन्ते (द०)। ६. उत्साहवन्तः पुरुषा नावसीदन्ति कर्मसु (रा०)। ७. उद्यमेन विना राजन्न सिध्यन्ति मनोरथाः (प०)। ८. उद्यमेन हि सिध्यन्ति कार्याणि न मनोरथैः (प०)। ९. उद्योगः पुरुषलक्षणम्। १०. उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः (प०)। ११. क ईप्सितार्थस्थिरनिश्चयं मनः, पयश्च निम्नाभिमुखं प्रतीपयेत् (कु०)। १२. कर्मण्येवाधिकारस्ते मा फलेषु कदाचन (गी०)। १३. किं दूरं व्यवसायिनाम् (चा०)। १४. कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः (यजु०)। १५. कृधी न ऊर्ध्वान् चरथाय जीवसे (ऋग्०)। १६. कोऽतिभारः समर्थानाम् (प०)। १७. गुणसंहतेः समतिरिक्तमहो निजमेव सत्त्वमुपकारि सताम् (कि०)। १८. धिग्जीवितं चोद्यमवर्जितस्य। १९. नहि दुष्करमस्तीह किंचिदध्यवसायिनाम् (क०)। २०. नहि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः। २१. निवसन्ति पराक्रमाश्रया न विषादेन समं समृद्धयः (कि०)। २२. प्राप्नोतीष्टमविक्लवः (क०)। २३. यत्ने कृते यदि न सिध्यति कोऽत्र दोषः (हि०)। २४. यदनुद्वेगतः साध्यः पुरुषार्थः सदा बुधैः (क०)। २५. यस्तु क्रियावान् पुरुषः स विद्वान्। २६. सत्त्वाधीना हि सिद्धयः (क०)। २७. सत्त्वानुरूपं सर्वस्य, धाता सर्वं प्रयच्छति (क०)। २८. समर्थो यो नित्यं स जयतितरां कोऽपि पुरुषः। २९. सर्वः कृच्छ्रगतोऽपि वाञ्छति जनः सत्त्वानुरूपं फलम् (भ०)। ३०. साहसे श्रीः प्रतिवसति (मृ०)। ३१. सिध्यन्ति कुत्र सुकृतानि विना श्रमेण। ३२. सुकृती चानुभूयैव दुःखमप्यश्नुते सुखम् (क०)। ३३. हतं ज्ञानं क्रियाहीनम्।

(ग) एकता

१. ऐकचित्ते द्वयोरेव किमसाध्यं भवेदिति (क०)। २. पञ्चभिर्मिलितैः किं यज्जगतीह न साध्यते (नै०)। ३. महोदयानामपि संघवृत्तितां, सहायसाध्याः प्रदिशन्ति सिद्धयः (कि०)। ४. संगच्छध्वं संवदध्वं सं वो मनांसि जानताम् (ऋग्०)। ५. संघे शक्तिः कलौ युगे। ६. समानी व आकूतिः समाना हृदयानि वः (ऋग्०)। ७. समानो मन्त्रः समितिः समानी, समानं मनः सह चित्तमेषाम् (ऋग्०)।

(घ) कीर्ति

१. अनन्यगामिनी पुंसां कीर्तिरेका पतिव्रता। २. अपि स्वदेहात् किमुतेन्द्रियार्थाद्, यशोधनानां हि यशो गरीयः (र०)। ३. काकोऽपि जीवति चिराय बलिं च भुङ्क्ते (प०)। ४. कुकर्मान्तं यशो नृणाम्। ५. कुशिष्यमध्यापयतः कुतो यशः। ६. क्षितितले

किं जन्म कीर्ति विना । ७. जठरं को न बिभर्ति केवलम् । ८. पिण्डेष्वनास्था खलु भौतिकेषु (र०) । ९. प्राप्यते किं यशः शुभ्रमनङ्गीकृत्य साहसम् (क०) । १०. माने म्लाने कुतः सुखम् । ११. यशः पुण्यैरवाप्यते (चा०) । १२. यशस्तु रक्ष्यं परतो यशोधनैः (र०) । १३. संभावितस्य चाकीर्तिर्मरणादतिरिच्यते (गी०) । १४. सर्वं रत्नमुपद्रवेण सहितं निर्दोषमेकं यशः । १५. सहते विरहक्लेशं यशस्वी नायशः पुनः (क०) ।

(ङ) दान

१. आदानं हि विसर्गाय सतां वारिमुचामिव (र०) । २. उपार्जितानां वित्तानां त्याग एव हि रक्षणम् (प०) । ३. कुपात्रदानाच्च भवेद् दरिद्रः । ४. कुप्येत् को नातियाचितः । ५. त्यागाज्जगति पूज्यन्ते, पशुपाषाणपादपाः । ६. त्यागी भवति वा न वा । ७. दानं भोगो नाशश्च तिस्रो गतयो भवन्ति वित्तस्य (प०) । ८. देशे काले च पात्रे च, तद् दानं सात्विकं स्मृतम् (गी०) । ९. श्रद्धया देयम् (तै० उप०) । १०. श्रद्धया न विना दानम् । ११. सकलगुणसीमा वितरणम् । १२. सरित्पतिर्नहि समुपैति रिक्तताम् (शि०) । १३. हस्तस्य भूषणं दानम् ।

(च) परोपकार

१. अनुभवति हि मूर्ध्ना पादपस्तीव्रमुष्णं, शमयति परितापं छायया संश्रितानाम् (शा०) । २. अपृष्टोऽपि हितं ब्रूयाद् , यस्य नेच्छेत् पराभवम् । ३. आपन्नत्राणविकलैः किं प्राणैः पौरुषेण वा (क०) । ४. आपन्नार्तिप्रशमनफलाः सम्पदो ह्युत्तमानाम् (मे०) । ५. इच्छादानपरोपकारकरणं पात्रानुरूपं फलम् । ६. उपकृत्य निसर्गतः परेषामुपरोधं नहि कुर्वते महान्तः (शि०) । ७. उपदेशपराः परेष्वपि, स्वविनाशाभिमुखेषु साधवः (शि०) । ८. किमदेयमुदाराणामुपकारिषु तुष्यताम् (क०) । ९. धनानि जीवितं चैव परार्थे प्राज्ञ उत्सृजेत् (प०) । १०. नहि प्रियं प्रवक्तुमिच्छन्ति मृषा हितैषिणः (कि०) । ११. नास्त्यदेयं महात्मनाम् । १२. परहितनिरतानामादरो नात्मकार्ये । १३. परार्थप्रतिपन्ना हि नेक्षन्ते स्वार्थमुत्तमाः (क०) । १४. परोपकारजं पुण्यं न स्यात् क्रतुशतैरपि । १५. परोपकाराय सतां विभूतयः । १६. परोपकारार्थमिदं शरीरम् । १७. पर्यायपीतस्य सुरैर्हिमांशोः, कलाक्षयः श्लाघ्यतरो हि वृद्धेः (र०) । १८. भक्त्या कार्यधुरं वहन्ति कृतिनस्ते दुर्लभास्त्वादृशाः । १९. मिथ्या परोपकारो हि कुतः स्यात् कस्य शर्मणे (क०) । २०. युक्तानां खलु महतां परोपकारे, कल्याणी भवति रुजत्स्वपि प्रवृत्तिः (कि०) । २१. रविपीतजला तपात्यये पुनरोघेन हि युज्यते नदी (कु०) । २२. वरविभवभूषा वितरणम् । २३. साधूनां हि परोपकारकरणे नोपाध्यपेक्षं मनः । २४. स्वत एव सतां परार्थता, ग्रहणानां हि यथा यथार्थता (शि०) । २५. स्वभाव एवैष परोपकारिणाम् (शा०) । २६. स्वामापदं प्रोज्झ्य विपत्तिमग्नं, शोचन्ति सन्तो ह्युपकारिपक्षम् (कि०) ।

(छ) लोभ

१. अर्थार्थी जीवलोकोऽयं श्मशानमपि सेवते (प०)। २. अर्थातुराणां न गुरुर्न बन्धुः। ३. कष्टो हि बान्धवस्नेहं राज्यलोभोऽतिवर्तते (क०)। ४. कृतघ्ना धनलोभान्धा नोपकारेक्षणक्षमाः (क०)। ५. केषां हि नापदां हेतुरतिलोभान्धबुद्धिता (क०)। ६. कोऽर्थी गतो गौरवम् (प०)। ७. तृष्णैका तरुणायते (प०)। ८. प्राणेभ्योऽप्यर्थमात्रा हि कृपणस्य गरीयसी (क०)। ९. लुब्धमर्थेन गृह्णीयात् (प०)। १०. लुब्धानां याचकः शत्रुः। ११. लोभः पापस्य कारणम्। १२. लोभमूलानि पापानि।

(ज) सन्तोष

१. अन्तो नास्ति पिपासायाः सन्तोषः परमं सुखम्। २. अपां हि तृप्ताय न वारिधारा, स्वादुः सुगन्धिः स्वदते तुषारा (नै०)। ३. न तोषात् परमं सुखम्। ४. न तोषो महतां मृषा (क०)। ५. मनसि च परितुष्टे कोऽर्थवान् को दरिद्रः। ६. सन्तोष एवं पुरुषस्य परं निधानम्। ७. सन्तोषतुल्यं धनमस्ति नान्यत्।

(झ) सौन्दर्य

१. किमिव हि मधुराणां मण्डनं नाकृतीनाम् (शा०)। २. केवलोऽपि सुभगो नवाम्बुदः, किं पुनस्त्रिदशचापलाञ्छितः (र०)। ३. क्षणे क्षणे यन्नवतामुपैति, तदेव रूपं रमणीयतायाः (शि०)। ४. गुणान् भूषयते रूपम्। ५. न रम्यमाहार्यमपेक्षते गुणम् (कि०)। ६. न षट्पदश्रेणिभिरेव पंकजं, सशैवलासंगमपि प्रकाशते (कु०)। ७. प्रागेव मुक्ता नयनाभिरामाः, प्राप्येन्द्रनीलं किमुतोन्मयूखम् (र०)। ८. प्रियेषु सौभाग्यफला हि चारुता (कु०)। ९. भवन्ति साम्येऽपि निविष्टचेतसां, वपुर्विशेषेष्वतिगौरवाः क्रियाः (कु०)। १०. यतो रूपं ततः शीलम्। ११. यत्राकृतिस्तत्र गुणा वसन्ति। १२. यदेव रोचते यस्मै भवेत्तत्तस्य सुन्दरम्। १३. रम्याणां विकृतिरपि श्रियं तनोति (कि०)। १४. सेयमाकृतिर्न व्यभिचरति शीलम् (द०)। १५. हरति मनो मधुरा हि यौवनश्रीः (कि०)।

(१३) मनोभाव

(क) करुण-रस

१. अपि ग्रावा रोदित्यपि दलति वज्रस्य हृदयम् (उ०)। २. अभितप्तमयोऽपि मार्दवं, भजते कैव कथा शरीरिषु (र०)। ३. इष्टमूलानि शोकानि। ४. दुःखिते मनसि सर्वमसह्यम् (कि०)। ५. प्रायः सर्वो भवति करुणावृत्तिरार्द्रान्तरात्मा (मे०)। ६. प्रियबन्धुविनाशोत्थः शोकाग्निः कं न तापयेत् (क०)। ७. प्रियानाशे कृत्स्नं किल जगदरण्यं हि भवति (उ०)। ८. सन्धत्ते भृशमरतिं हि सद्वियोगः (कि०)।

(ख) क्रोध

१. क्रोधः संसारबन्धनम्। २. क्रोधो मूलमनर्थानाम् (हि०)। ३. जितक्रोधेन सर्वं हि जगदेतद् विजीयते (क०)। ४. जितक्रोधो न दुःखस्यास्पदीभवेत् (क०)। ५. धर्मक्षयकरः क्रोधः। ६. नास्ति क्रोधसमो वह्निः।

(ग) चिन्ता

१. चिता दहति निर्जीवं, चिन्ता चैव सजीवकम् । २. चिन्ता जरा मनुष्याणाम् । ३. चिन्तासमं नास्ति शरीरशोषणम् ।

(घ) प्रेम (प्रेम-स्वभाव)

१. अनुरागान्धमनसां विचारः सहसा कुतः (क०) । २. अपथे पदमर्पयन्ति हि श्रुतवन्तोऽपि रजोनिमीलिताः (र०) । ३. अपायो मस्तकस्थो हि, विषयग्रस्तचेतसाम् (क०) । ४. अविज्ञातेऽपि बन्धौ हि, बलात् प्रह्लादते मनः (कि०) । ५. आशु बध्नाति हि प्रेम, प्राग्जन्मान्तरसंस्तवः (क०) । ६. आहुः सप्तपदी मैत्री । ७. गुणः खल्वनुरागस्य कारणं न बलात्कारः (मृ०) । ८. चित्तं जानाति जन्तूनां प्रेम जन्मान्तरार्जितम् (क०) । ९. जनानुरागप्रभवा हि सम्पदः । १०. तारामैत्रकं चक्षूरागः (उ०) । ११. दयितं जनः खलु गुणीति मन्यते (शि०) । १२. दयितास्वनवस्थितं नृणां, न खलु प्रेम चलं सुहृज्जने (कु०) । १३. प्रेम पश्यति भयान्यपदेऽपि (कि०) । १४. भावस्थिराणि जननान्तर-सौहृदानि (शा०) । १५. लोके हि लोहेभ्यः कठिनतराः खलु स्नेहमया बन्धनपाशाः (ह०)। १६. वसन्ति हि प्रेम्णि गुणा न वस्तुनि (कि०) । १७. व्यतिषजति पदार्थानान्तरः कोऽपि हेतुः (उ०) । १८. सखि साहजिकं प्रेम दूरादपि विजायते । १९. सतां ''संगतं, मनीषिभिः साप्तपदीनमुच्यते (कु०) । २०. सर्वं स्नेहात् प्रवर्तते (महा०) । २१. सर्वः कान्तमात्मीयं पश्यति (शा०) । २२. सर्वः प्रियः खलु भवत्यनुरूपचेष्टः (शि०) । २३. स्नेहमूलानि दुःखानि (महा०) ।

(ङ) रुचि

१. अनपेक्ष्य गुणागुणौ जनः, स्वरुचिं निश्चयतोऽनुधावति (शि०) । २. तस्य तदेव हि मधुरं, यस्य मनो यत्र संलग्नम् ।

(च) शृंगार

१. इष्टप्रवासजनितान्यबलाजनस्य, दुःखानि नूनमतिमात्रसुदुःसहानि (शा०) । २. प्रभवति मण्डयितुं वधूरनङ्गः (कि०) । ३. वाम एव सुरतेष्वपि कामः (कि०) । ४. सन्तापकारिणो बन्धुजनविप्रयोगा भवन्ति । ५. सन्धत्ते भृशमरतिं हि सद्वियोगः (कि०) । ६. साधनेषु हि रतेरुपधत्ते रम्यतां प्रियसमागम एव (कि०) । ७. सूर्यापाये न खलु कमलं पुष्यति स्वामभिख्याम् (मे०) ।

(छ) स्वाभिमान

१. जन्मिनो मानहीनस्य, तृणस्य च समा गतिः (कि०) । २. न स्पृशति पल्वलाम्भः पंजरशेषोऽपि कुंजरः क्वापि । ३. परभुक्ते हि कमले किमलेर्जायते रतिः (क०) । ४. पुरुषस्तावदेवासौ यावन्मानान्न हीयते (कि०) ।

(१४) व्यवहार

(क) अतिथि-सत्कार

१. अतिथिदेवो भव (तैत्ति० उ०)। २. अभ्यागतो यत्र न तत्र लक्ष्मीः। ३. यथाशक्त्यतिथेः पूजा धर्मो हि गृहमेधिनाम् (क०)।

(ख) अति सर्वत्र वर्जयेत्

१. अतिदानाद् बलिर्बद्धः (भा०)। २. अतिपरिचयादवज्ञा, सन्ततगमनादनादरो भवति। ३. अतिभुक्तिरतीवोक्तिः सद्यः प्राणापहारिणी। ४. अतिलोभो न कर्तव्यः, चक्रं भ्रमति मस्तके (प०)। ५. सर्वमतिमात्रं दोषाय (उ०)।

(ग) अस्तेय (चोर-स्वभाव)

१. कस्यचित् किमपि नो हरणीयम्। २. चोराणामनृतं बलम्। ३. चौरे गते वा किमु सावधानम्। ४. तस्करस्य कुतो धर्मः। ५. तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद् धनम् (यजु०)।

(घ) इष्टलाभ

१. कः शरीरनिर्वापयित्रीं शारदीं ज्योत्स्नां पटान्तेन वारयति (शा०)। २. कायः कस्य न वल्लभः। ३. चकास्ति योग्येन हि योग्यसंगमः (नै०)। ४. ददाति तीव्रसत्त्वानामिष्टमीश्वर एव हि (क०)। ५. धीराश्च सोढविरहाः प्राप्नुवन्तीष्टसंगमम् (क०)।

(ङ) कलह-निन्दा

१. अस्वर्ग्यं लोकविद्विष्टम्। २. अहो दुरन्ता बलवद्विरोधिता (कि०)। ३. ईर्ष्या हि विवेकपरिपन्थिनी (क०)। ४. कलहान्तानि हर्म्याणि (प०)। ५. वाङ्मात्रोत्पादितासह्यवैरात् को नानुतप्यते (क०)।

(च) कृषि

१. अल्पबीजं हतं क्षेत्रम्। २. नाना फलैः फलति कल्पलतेव भूमिः (भ०)। ३. नास्ति धान्यसमं प्रियम्। ४. यथा बीजं तथाङ्कुरः। ५. यथा वृक्षस्तथा फलम्।

(छ) पराश्रय

१. कष्टः खलु पराश्रयः। २. कष्टादपि कष्टतरं परगृहवासः परान्नं च। ३. नैवाश्रितेषु महतां गुणदोषशंका।

(ज) याञ्चा-निन्दा

१. अभ्यर्थनाभंगभयेन साधुर्माध्यस्थ्यमिष्टेऽप्यवलम्बतेऽर्थे (कु०)। २. अर्थिनि जने त्यागं विना श्रीश्च का। ३. यं यं पश्यसि तस्य तस्य पुरतो मा ब्रूहि दीनं वचः (भ०)। ४. याचनान्तं हि गौरवम्। ५. याञ्चा मोघा वरमधिगुणे नाधमे लब्धकामा (मे०)। ६. वरं हि मानिनो मृत्युर्न दैन्यं स्वजनाग्रतः (क०)।

(झ) विघ्न

१. छिद्रेष्वनर्था बहुलीभवन्ति (प०)। २. रन्ध्रोपनिपातिनोऽनर्थाः (शा०)। ३. विघ्नवत्यः प्रार्थितार्थसिद्धयः (शा०)। ४. श्रेयांसि लब्धुमसुखानि विनाऽन्तरायैः (कि०)। ५. सत्यः प्रवादो यच्छिद्रेष्वनर्था यान्ति भूरिताम् (क०)। ६. सर्वारम्भा हि दोषेण धूमेनाग्निरिवावृताः।

(ञ) स्वार्थ

१. आत्मार्थे पृथिवीं त्यजेत् (प०)। २. कृतार्थः स्वामिनं द्वेष्टि (प०)। ३. कृतार्थाश्च प्रयोजकम् (महा०)। ४. परसेवैकसक्तानां को हि स्नेहो निजे जने (क०)। ५. सर्वे कार्यवशाज्जनोऽभिरमते तत्कस्य को वल्लभः (भ०)। ६. सर्वः स्वार्थं समीहते (शि०)। ७. सर्वथा स्वहितमाचरणीयं किं करिष्यति जनो बहुजल्पः।

(ट) नीति

१. अहो दुरन्ता बलवद्विरोधिता (कि०)। २. आदौ साम प्रयोक्तव्यम् (प०)। ३. आर्जवं हि कुटिलेषु न नीतिः (नै०)। ४. आहारे व्यवहारे च त्यक्तलज्जः सुखी भवेत्। ५. इतो भ्रष्टस्ततो भ्रष्टः। ६. इदं च नास्ति न परं च लभ्यते। ७. इष्टं धर्मेण योजयेत् (प०)। ८. उच्छ्रायं नयति यदृच्छयाऽपि योगः (क०)। ९. उपायं चिन्तयेत् प्राज्ञः (प०)। १०. उपायमास्थितस्यापि नश्यन्त्यर्थाः प्रमाद्यतः (शि०)। ११. उपायेन हि यच्छक्यं न तच्छक्यं पराक्रमैः (प०)। १२. ऋणकर्ता पिता शत्रुः (प०)। १३. एको वासः पत्तने वा वने वा (भ०)। १४. क उष्णोदकेन नवमालिकां सिञ्चति (शा०)। १५. कण्टकेनैव कण्टकम् (प०)। १६. के वा न स्युः परिभवपदं निष्फलारम्भयत्नाः (मे०)। १७. को न याति वशं लोके मुखे पिण्डेन पूरितः। १८. गतं न शोचामि कृतं न मन्ये। १९. ग्रामस्यार्थे कुलं त्यजेत्। २०. चलति जयान्न जिगीषतां हि चेतः (कि०)। २१. चलत्येकेन पादेन तिष्ठत्येकेन पण्डितः (शा० प०)। २२. त्यजेदेकं कुलस्यार्थे (प०)। २३. न काचस्य कृते जातु युक्ता मुक्तामणेः क्षतिः (क०)। २४. न कूपखननं युक्तं प्रदीप्ते वह्निना गृहे (हि०)। २५. न पादपोन्मूलनशक्ति रंहः शिलोच्चये मूर्च्छति मारुतस्य (र०)। २६. न भयं चास्ति जाग्रतः। २७. नयहीनादपरज्यते जनः (कि०)। २८. नहि तापयितुं शक्यं सागराम्भस्तृणोल्कया। २९. नार्कातपैर्जलजमेति हिमैस्तु दाहम् (नै०)। ३०. नासमीक्ष्य परं स्थानं पूर्वमायतनं त्यजेत् (शा० प०)। ३१. निपातनीया हि सतामसाधवः (शि०)। ३२. नीचैरनीचैरतिनीचनीचैः सर्वैरुपायैः फलमेव साध्यम्। ३३. नृपतिर्जनपदानां दुर्लभः कार्यकर्ता (प०)। ३४. पयःपानं भुजङ्गानां केवलं विषवर्धनम् (प०)। ३५. पयो गते किं खलु सेतुबन्धः। ३६. परवृद्धिषु बद्धमत्सराणां किमिव ह्यस्ति दुरात्मनामलङ्घ्यम् (कि०)। ३७. परसदननिविष्टः को लघुत्वं न याति (भ०)।

३८. पाणौ पयसा दग्धे तक्रं फूत्कृत्य पामरः पिबति। ३९. प्रकर्षतन्त्रा हि रणे जयश्रीः (कि०)। ४०. प्रकृत्या ह्यमणिः श्रेयान् नालंकारश्च्युतोपलः (कि०)। ४१. प्रच्छन्नमप्यूह्यते हि चेष्टा (कि०)। ४२. प्रतीयन्ते न नीतिज्ञाः कृतावज्ञस्य वैरिणः (क०)। ४३. प्रभुश्च निर्विचारश्च नीतिज्ञैर्न प्रशस्यते (क०)। ४४. प्रायोऽशुभस्य कार्यस्य कालहारः प्रतिक्रिया (क०)। ४५. प्रार्थनाऽधिकबले विपत्फला (कि०)। ४६. बधिरान्मन्दकर्णः श्रेयान्। ४७. बन्धुरप्यहितः परः। ४८. बहुविघ्नास्तु सदा कल्याणसिद्धयः (क०)। ४९. भवन्ति क्लेशबहुलाः सर्वस्यापीह सिद्धयः (क०)। ५०. भवन्ति वाचोऽवसरे प्रयुक्ता, ध्रुवं प्रविस्पष्टफलोदयाय (कु०)। ५१. भेदस्तत्र प्रयोक्तव्यो यतः स वशकारकः (प०)। ५२. महानपि प्रसङ्गेन नीचं सेवितुमिच्छति। ५३. महोदयानामपि संघवृत्तितां, सहायसाध्याः प्रदिशन्ति सिद्धयः (कि०)। ५४. मायाचारो मायया वर्तितव्यः, साध्वाचारः साधुना प्रत्युपेयः (महा०)। ५५. मुख्यमङ्गं हि मन्त्रस्य विनिपातप्रतिक्रिया (क०)। ५६. मुह्यत्येव हि कृच्छ्रेषु संभ्रमज्वलितं मनः (कि०)। ५७. मौनं सर्वार्थसाधकम्। ५८. मौनं स्वीकृतिलक्षणम्। ५९. मौनिनः कलहो नास्ति। ६०. यथा देशस्तथा भाषा। ६१. यथा राजा तथा प्रजा। ६२. यदि वाऽत्यन्तमृदुता न कस्य परिभूयते (क०)। ६३. यद्यपि शुद्धं लोकविरुद्धं नाचरणीयं नाचरणीयम्। ६४. यान्ति न्यायप्रवृत्तस्य, तिर्यञ्चोऽपि सहायताम् (अ०)। ६५. येन केन प्रकारेण प्रसिद्धः पुरुषो भवेत्। ६६. येनेष्टं तेन गम्यताम्। ६७. रत्नव्ययेन पाषाणं को हि रक्षितुमर्हति (क०)। ६८. वरयेत् कुलजां प्राज्ञो विरूपामपि कन्यकाम्। ६९. विक्रीते करिणि किमंकुशे विवादः। ७०. व्रजन्ति ते मूढधियः पराभवं, भवन्ति मायाविषु ये न मायिनः (कि०)। ७१. शुष्केन्धने वह्निरुपैति वृद्धिम्। ७२. श्रेयांसि लब्धुमसुखानि विनाऽन्तरायैः (कि०)। ७३. सदाऽनुकूलेषु हि कुर्वते रतिं, नृपेष्वमात्येषु च सर्वसम्पदः (कि०)। ७४. सन्दीप्ते भवने तु कूपखननं प्रत्युद्यमः कीदृशः (भ०)। ७५. सन्धिं कृत्वा तु हन्तव्यः संप्राप्तेऽवसरे पुनः (क०)। ७६. संमुखीनो हि जयो रन्ध्रप्रहारिणाम् (र०)। ७७. सर्वनाशे समुत्पन्नेऽर्धं त्यजति पण्डितः (प०)।

(१५) पुरुषस्त्री-स्वाभावादि

(क) कन्या (पुत्री)

१. अर्थो हि कन्या परकीय एव (शा०)। २. अशोच्या हि पितुः कन्या, सद्भर्तृप्रतिपादिता (कु०)। ३. कन्या नाम महद् दुःखं, धिगहो महतामपि (क०)। ४. कन्यापितृत्वं खलु नाम कष्टम्। ५. शोककन्दः क्व कन्या हि, क्वानन्दः कायवान् सुतः (क०)। ६. स्नुषात्वं पापानां फलमधनगेहेषु सुदृशाम्।

(ख) पुत्र

१. अपुत्राणां किल न सन्ति लोकाः शुभाः (का०)। २. कः सूनुर्विनयं विना। ३. कुपुत्रेण कुलं नष्टम्। ४. कोऽर्थः पुत्रेण जातेन, यो न विद्वान् न धार्मिकः (हि०)। ५. दुर्लभं क्षेमकृत् सुतः। ६. धिक् पुत्रमविनीतं च। ७. न चापत्यसमः स्नेहः। ८. न पुत्रात् परमो लाभः। ९. पुत्रः शत्रुरपण्डितः (चा०)। १०. पुत्रहीनं गृहं शून्यम्। ११. पुत्रादपि भयं यत्र तत्र सौख्यं हि कीदृशम्। १२. पुत्रोदये माद्यति का न हर्षात्। १३. मातापितृभ्यां शप्तः सन्न जातु सुखमश्नुते (क०)। १४. शोककन्दः क्व कन्या हि, क्वानन्दः कायवान् सुतः (क०)। १५. सत्पुत्र एव कुलसद्मनि कोऽपि दीपः। १६. सन्ततिः पुण्यमाख्याति। १७. सन्ततिः शुद्धवंश्या हि, परत्रेह च शर्मणे (र०)।

(ग) स्त्रीचरित-निन्दा

१. अधरेष्वमृतं हि योषितां, हृदि हालाहलमेव केवलम्। २. अनुरागपरायत्ताः कुर्वते किं न योषितः (क०)। ३. अन्तर्विषमया ह्येता बहिश्चैव मनोरमाः (प०)। ४. अविनीता रिपुर्भार्या। ५. कठिनाः खलु स्त्रियः (कु०)। ६. कष्टा हि कुटिलश्वश्रूपरतन्त्र-वधूस्थितिः(क०)। ७. किं किं करोति न निरर्गलतां गता स्त्री। ८. किं न कुर्वन्ति योषितः (भ०)। ९. कुगेहिनीं प्राप्य गृहे कुतः सुखम्। १०. न स्त्री चलितचारित्रा निम्नोन्नतम-वेक्षते (क०)। ११. नार्यः समाश्रितजनं हि कलङ्कयन्ति। १२. प्रत्ययः स्त्रीषु मुष्णाति विमर्शं विदुषामपि (क०)। १३. मद्ये मारैकसुहृदि प्रसक्ता स्त्री सती कुतः (क०)। १४. वञ्च्यन्ते हेलयैवेह कुस्त्रीभिः सरलाशयाः (क०)। १५. वेश्यानां च कुतः स्नेहः। १६. संनिकृष्टे निकृष्टेऽपि कष्टं रज्यन्ति कुस्त्रियः (क०)।

(घ) स्त्रीधर्म आदि

१. इहामुत्र च नारीणां परमा हि गतिः पतिः (क०)। २. उपपन्ना हि दारेषु प्रभुता सर्वतोमुखी (शा०)। ३. कष्टं हन्त मृगीदृशां पतिगृहं प्रायेण कारागृहम्। ४. प्रमदाः पतिमार्गगा इति प्रतिपन्नं हि विचेतनैरपि (कु०)। ५. प्रियेषु सौभाग्यफला हि चारुता (कु०)। ६. भर्तृनाथा हि नार्यः (प्रतिमा०)। ७. भर्तृमार्गानुसरणं स्त्रीणां हि परमं व्रतम् (क०)।

(ङ) स्त्रीशील-प्रशंसा

१. अचिन्त्यं शीलगुप्तानां चरितं कुलयोषिताम् (क०)। २. असाध्यं सत्यसाध्वीनां किमस्ति हि जगत्त्रये (क०)। ३. असारे खलु संसारे, सारं सारङ्गलोचना। ४. आपद्यपि सतीवृत्तं, किं मुञ्चन्ति कुलस्त्रियः (क०)। ५. का नाम कुलजा हि स्त्री, भर्तृद्रोहं करिष्यति (क०)। ६. किं नाम न सहन्ते हि, भर्तृभक्ताः कुलाङ्गनाः (क०)। ७. कुलवधूः का स्वामिभक्तिं विना। ८. क्रियाणां खलु धर्म्याणां

सत्पत्न्यो मूलकारणम् (कु०)। ९. तस्मात् सर्वं परित्यज्य पतिमेकं भजेत् सती। १०. धिग् गृहं गृहिणीशून्यम्। ११. न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यते। १२. न पतिव्यतिरेकेण सुस्त्रीणामपरा गतिः (क०)। १३. न भार्यायाः परं सुखम्। १४. नारीणां भूषणं पतिः। १५. नारीणां भूषणं शीलम्। १६. नास्ति भर्तुः समो बन्धुः (वि०)। १७. नेर्ष्यां भर्तृहितैषिण्यो गणयन्ति हि सुस्त्रियः (क०)। १८. पुत्रप्रयोजना दाराः। १९. पुरन्ध्रीणां चित्तं कुसुमसुकुमारं हि भवति (उ०)। २०. पेशलं हि सतीमनः (क०)। २१. भर्तारं हि विना नान्यः सतीनामस्ति बान्धवः (क०)। २२. भवन्त्यव्यभिचारिण्यो भर्तुरिष्टे पतिव्रताः (कु०)। २३. भार्या मूलं गृहस्थस्य। २४. भार्यासमं नास्ति शरीरतोषणम्। २५. भार्याहीनं गृहस्थस्य शून्यमेव गृहं मतम्। २६. यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः (म०)। २७. या सौन्दर्यगुणान्विता पतिरता सा कामिनी कामिनी। २८. शुचिर्नारी पतिव्रता। २९. सतीधर्मो हि सुस्त्रीणां, चिन्त्यो न सुहृदादयः (क०)। ३०. स्निग्धमुग्धा हि सत्स्त्रियः (क०)। ३१. स्फुटमभिभूषयति स्त्रियस्त्रपैव (शि०)। ३२. स्वसुखं नास्ति साध्वीनां, तासां भर्तृसुखं सुखम् (क०)।

(च) स्त्री-स्वभावादि-वर्णन

१. अहो विनेन्द्रजालेन स्त्रीणां चेष्टा न विद्यते (क०)। २. आदावसत्यवचनं पश्चाज्जाता हि कुस्त्रियः (क०)। ३. उदारसत्त्वं वृणुते, स्वयं हि श्रीरिवाङ्गना (क०)। ४. कान्ता रूपवती शत्रुः। ५. को हि वित्तं रहस्यं वा, स्त्रीषु शक्नोति गूहितुम् (क०)। ६. क्षुभ्यन्ति प्रसभमहो विनापि हेतोर्लीलाभिः किमु सति कारणे रमण्यः (शि०)। ७. जातापत्या पतिं द्वेष्टि। ८. तदेव दुःसहं स्त्रीणामिह प्रणयखण्डनम् (क०)। ९. धिक् कलत्रमपुत्रकम्। १०. नवाङ्गनानां नव एव पन्थाः। ११. न स्त्री स्वातन्त्र्यमर्हति (महा०)। १२. न स्नेहो न च दाक्षिण्यं, स्त्रीष्वहो चापलादृते (क०)। १३. नहि नार्यो विनेर्ष्यया। १४. नहि वन्ध्याऽश्नुते दुःखं, यथा हि मृतपुत्रिणी। १५. निसर्गसिद्धो नारीणां, सपत्नीषु हि मत्सरः (क०)। १६. प्रत्युत्पन्नमति स्त्रैणम् (शा०)। १७. प्रायः श्वश्रूस्नुषयोर्न दृश्यते सौहृदं लोके। १८. प्रायः स्त्रियो भवन्तीह, निसर्गविषमाः शठाः (क०)। १९. प्रायेण भूमिपतयः प्रमदा लताश्च, यः पार्श्वतो भवति तं परिवेष्टयन्ति (प०)। २०. बत स्त्रीणां चञ्चलाश्चित्तवृत्तयः (क०)। २१. युवतिजनः खलु नाप्यतेऽनुरूपः (कि०)। २२. स्त्रियाश्चरित्रं पुरुषस्य भाग्यं, देवो न जानाति कुतो मनुष्यः। २३. स्त्रियो नष्टा ह्यभर्तृकाः। २४. स्त्रीचित्तमहो विचित्रमिति (क०)। २५. स्त्रीणां प्रियालोकफलो हि वेषः (कु०)। २६. स्त्रीणां भावानुरक्तं हि, विरहासहनं मनः (क०)। २७. स्त्रीणामलीकमुग्धं हि, वचः को मन्यते मृषा (क०)। २८. स्त्रीणामाद्यं प्रणयवचनं विभ्रमो हि प्रियेषु (मे०)। २९. स्त्री पुंवच्च प्रभवति यदा, तद्धि गेहं विनष्टम्।

३०. स्त्रीबुद्धिः प्रलयावहा (का० नी०)। ३१. स्त्रीभिः कस्य न खण्डितं भुवि मनः (भ०)। ३२. स्त्री विनश्यति रूपेण (शा० प०)। ३३. स्त्रीषु वाक्संयमः कुतः (क०)। ३४. स्वाधीना दयिता सुतावधि।

(१६) कवि, काव्य, कविता

१. कलासीमा काव्यम्। २. कवयः किं न पश्यन्ति। ३. काव्यशास्त्रविनोदेन कालो गच्छति धीमताम् (हि०)। ४. केषां नैषा कथय कविताकामिनी कौतुकाय। ५. पिपासितैः काव्यरसो न पीयते। ६. पिबामः शास्त्रौघानुत विविधकाव्यामृतरसान्। ७. सुकविता यद्यस्ति राज्येन किम्। ८. स्फुटता न पदैरपाकृता, न च न स्वीकृतमर्थगौरवम्। रचिता पृथगर्थता गिरां, न च सामर्थ्यमपोहितं क्वचित् (कि०)।

(१७) विविध

(क) कलि

१. कलौ वेदान्तिनो भान्ति, फाल्गुने बालका इव। २. पश्यन्तु लोकाः कलिकौतुकानि। ३. पश्यन्तु लोकाः कलिदोषकाणि। ४. साधुः सीदति दुर्जनः प्रभवति प्राप्ते कलौ दुर्युगे।

(ख) शकुन

१. अन्तरापाति हि श्रेयः, कार्यसम्पत्तिसूचकम् (क०)। २. अव्याक्षेपो भविष्यन्त्याः कार्यसिद्धेर्हि लक्षणम् (र०)। ३. आवेदयन्ति हि प्रत्यासन्नमानन्दमग्रपातीनि शुभानि निमित्तानि (का०)। ४. आमुखापाति कल्याणं, कार्यसिद्धिं हि शंसति (क०)। ५. भवन्त्युदयकाले हि सत्कल्याणपरम्पराः (क०)।

(ग) विविध सुभाषित

१. अधिकस्याधिकं फलम्। २. अनाश्रया न शोभन्ते पण्डिता वनिता लताः। ३. अपवाद एव सुलभो द्रष्टुर्गुणो दूरतः। ४. अपुत्रस्य गृहं शून्यम्। ५. अप्रकटीकृतशक्तिः शक्तोऽपि जनस्तिरस्क्रियां लभते। ६. अप्रियस्य च पथ्यस्य वक्ता श्रोता च दुर्लभः (प०)। ७. अभोगस्य हतं धनम् (प०)। ८. अर्धमात्रालाघवेन पुत्रोत्सवं मन्यन्ते वैयाकरणाः। ९. अल्पश्च कालो बहवश्च विघ्नाः। १०. अशनेरमृतस्य चोभयोर्वशिनश्चाम्बुधराश्च योनयः (कु०)। ११. अहो दुर्निवारता व्यसनोपनिपातानाम् (का०)। १२. आज्ञा गुरूणां ह्यविचारणीया (र०)। १३. इन्द्रोऽपि लघुतां याति, स्वयं प्रख्यापितैर्गुणैः (प०)। १४. कस्यचित् किमपि नो हरणीयं, मर्मवाक्यमपि नोच्चरणीयम्। १५. क्लेशः फलेन हि पुनर्नवतां विधत्ते। १६. क्षुधातुराणां न रुचिर्न पक्वम्। १७. घनाम्बुना राजपथे हि पिच्छिले, क्वचिद् बुधैरप्यपथेन गम्यते (नै०)। १८. चक्षुःपूतं न्यसेत् पादम्

(चा०)। १९. जातौ जातौ नवाचाराः। २०. जामाता दशमो ग्रहः। २१. जीवो जीवस्य जीवनम्। २२. ज्येष्ठभ्राता पितुः समः। २३. दया मांसाशिनः कुतः (प०)। २४. दिशत्यपायं हि सतामतिक्रमः (कि०)। २५. दुर्लभः स गुरुर्लोके शिष्यचिन्तापहारकः। २६. दुर्लभः स्वजनप्रियः। २७. देहस्नेहो हि दुस्त्यजः (क०)। २८. नक्रः स्वस्थानमासाद्य गजेन्द्रमपि कर्षति (प०)। २९. न नश्यति तमो नाम, कृतया दीपवार्तया। ३०. ननु तैलनिषेकबिन्दुना, सह दीपार्चिरुपैति मेदिनीम् (र०)। ३१. न पादपोन्मूलनशक्ति रंहः, शिलोच्चये मूर्च्छति मारुतस्य (र०)। ३२. न प्रभातरलं ज्योतिरुदेति वसुधातलात् (शा०)। ३३. न भूतो न भविष्यति। ३४. न रत्नमन्विष्यति मृग्यते हि तत् (कु०)। ३५. नाराणां नापितो धूर्तः (प०)। ३६. न सुवर्णे ध्वनिस्तादृग्, यादृक् कांस्ये प्रजायते। ३७. नहि प्रफुल्लं सहकारमेत्य, वृक्षान्तरं कांक्षति षट्पदालिः (र०)। ३८. नहि सिंहो गजास्कन्दी भयाद् गिरिगुहाश्रयः। ३९. नाकाले म्रियते जन्तुर्विद्धः शरशतैरपि (प०)। ४०. नाल्पीयान् बहुसुकृतं हिनस्ति दोषः (कि०)। ४१. निःसारस्य पदार्थस्य प्रायेणाडम्बरो महान्। ४२. निरस्तपादपे देशे एरण्डोऽपि द्रुमायते (हि०)। ४३. निर्वाणदीपे किमु तैलदानम्। ४४. नैकत्र सर्वो गुणसंनिपातः। ४५. पङ्को हि नभसि क्षिप्तः क्षेप्तुः पतति मूर्धनि (क०)। ४६. परोपदेशवेलायां शिष्टाः सर्वे भवन्ति वै। ४७. परोपदेशे पाण्डित्यं सर्वेषां सुकरं नृणाम्। ४८. प्रकृत्या ह्यमणिः श्रेयान् नालंकारश्च्युतोपलः (कि०)। ४९. प्रत्यासन्नविपत्तिमूढमनसां प्रायो मतिः क्षीयते। ५०. फणाटोपो भयंकरः (प०)। ५१. बालानां रोदनं बलम्। ५२. भवत्यपाये परिमोहिनी मतिः (कि०)। ५३. भवन्ति भव्येषु हि पक्षपाताः (कि०)। ५४. मनोरथानामगतिर्न विद्यते (कु०)। ५५. मुण्डे मुण्डे मतिर्भिन्ना। ५६. यत्तदग्रे विषमिव परिणामेऽमृतोपमम्। ५७. यदध्यासितमर्हद्भिस्तद्धि तीर्थं प्रचक्षते (कु०)। ५८. यदन्नं भक्षयेन्नित्यं जायते तादृशी मतिः। ५९. यद्वा तद् वा भविष्यति। ६०. याचको याचकं दृष्ट्वा श्वानवद् गुर्गुरायते। ६१. यादृशास्तन्तवः कामं तादृशो जायते पटः (क०)। ६२. योगस्तडित्तोयदयोरिवास्तु। ६३. यो यद् वपति बीजं हि, लभते तादृशं फलम् (क०)। ६४. रत्नं समागच्छतु काञ्चनेन। ६५. रत्नाकरे युज्यत एव रत्नम् (कु०)। ६६. रिक्तपाणिर्न प्रेक्षेत राजानं देवतां गुरुम्। ६७. लाभः परं तव मुखे खलु भस्मपातः। ६८. वासः प्रधानं खलु योग्यतायाः। ६९. वासोविहीनं विजहाति लक्ष्मीः। ७०. विना मलयमन्यत्र चन्दनं न प्ररोहति। ७१. विनाशकाले विपरीतबुद्धिः। ७२. विवक्षितं ह्यनुक्तमनुतापं जनयति (शा०)। ७३. विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसाम्प्रतम् (कु०)। ७४. शस्त्राघाता न तथा सूचीक्षतवेदना यादृक्। ७५. शिष्यपापं गुरुस्तथा। ७६. शुभस्य शीघ्रम्, अशुभस्य कालहरणम्। ७७. श्यालको गृहनाशाय (चा०)। ७८. संपत्सम्पदं विपद् विपदमनुबध्नातीति (का०)। ७९. सम्पूर्णकुम्भो न करोति शब्दम्। ८०. सागरं वर्जयित्वा कुत्र वा महानद्यवतरति (शा०)। ८१. सुखमुपदिश्यते परस्य (का०)। ८२. स्थानभ्रष्टा न शोभन्ते दन्ताः केशा नखा नराः (प०)। ८३. स्वदेशजातस्य नरस्य नूनं गुणाधिकस्यापि भवेदवज्ञा।

(११) पारिभाषिक-शब्दकोश

सूचना—(१) संस्कृत-व्याकरण को ठीक-ठीक समझने के लिए आवश्यक एवं अत्युपयोगी सभी पारिभाषिक शब्दों का यहाँ पर संग्रह किया गया है। विद्यार्थी इन शब्दों को बहुत सावधानी से स्मरण कर लें। (२) पारिभाषिक शब्दों के साथ उनके मूल-नियम पाणिनिके सूत्र आदि के रूप में दिए गए हैं। (३) इस शब्दकोश में सभी शब्द अकारादि-क्रम से दिए गए हैं।

(१) अकर्मक—अकर्मक वे धातुएँ होती हैं, जिनके साथ कर्म नहीं आता। अकर्मक की साधारणतया पहचान यह है कि जिनमें किम् (किसको, क्या) का प्रश्न नहीं उठता। अकर्मक के लिए यह नियम स्मरण कर लें। इन अर्थोंवाली धातुएँ अकर्मक होती हैं। 'लज्जासत्तास्थितिजागरणं, वृद्धिक्षयभयजीवतिमरणम्। शयनक्रीडा-रुचिदीप्त्यर्थं, धातुगणं तमकर्मकमाहुः' ॥ फलव्यधिकरणव्यापारवाचकत्वं सकर्मकत्वम्। फलसमानाधिकरणव्यापारवाचकत्वमकर्मकत्वम्।

(२) अक्षर—(अक्षरं न क्षरं विद्यात्, अश्नोतेर्वा सरोऽक्षरम्) अविनाशी और व्यापक होने के कारण स्वर और व्यंजन वर्णों को अक्षर कहते हैं।

(३) अघोष—खय् प्रत्याहार अर्थात् वर्गों के प्रथम और द्वितीय अक्षर, जिह्वामूलीय ≍ क, उपध्मानीय ≍ प, विसर्ग और श ष स ये अघोष वर्ण हैं।

(४) अच्—स्वरों को अच् कहते हैं। वे हैं—अ से लेकर औ तक स्वर।

(५) अजन्त—(अच् + अन्त) स्वर अन्तवाले शब्द या धातु आदि।

(६) अध्याहार—(सूत्रे अश्रूयमाणत्वे सति अर्थप्रत्यायकत्वम्) सूत्र में जो शब्द या अर्थ नहीं हैं और वह शब्द या अर्थ लिया जाता है तो उस अंश को अध्याहार कहते हैं।

(७) अनिट्—(न + इट्) जिन धातुओं में साधारणतया बीच में 'इ' नहीं लगता। जैसे—कृ, गम् आदि। इनका विशेष विवरण पृष्ठ २६८ पर दिया है। कृ> कर्ता, कर्तुम् आदि।

(८) अनुदात्त—(नीचैरनुदात्तः, १।२।३०) जिस स्वर को नीची ध्वनि से बोला जाता है, या जिस पर बल नहीं दिया जाता, उसे अनुदात्त कहते हैं। वेद में अक्षर के नीचे लकीर खींचकर अनुदात्त का संकेत किया जाता है। स्वरित के बाद अनुदात्त का चिह्न नहीं लगता।

(९) अनुनासिक—(मुखनासिकावचनोऽनुनासिकः, १।१।८) जिन वर्णों का उच्चारण मुख और नासिका दोनों के मेल से होता है, उन्हें अनुनासिक कहते हैं। अनुनासिक (ँ) चिह्न से युक्त सभी वर्ण तथा वर्गों के पंचमाक्षर ङ ञ ण न म अनुनासिक हैं।

(१०) अनुबन्ध—प्रत्ययों आदि के प्रारम्भ और अन्त में कुछ स्वर या व्यंजन इसलिए जुड़े होते हैं कि उस प्रत्यय के होने पर गुण, वृद्धि, संप्रसारण, कोई विशेष स्वर उदात्तादि, या अन्य कोई विशेष कार्य हो। ऐसे सहेतुक वर्णों को अनुबन्ध कहते हैं। ये 'इत्' होते हैं अर्थात् इनका लोप हो जाता है। जैसे—क्तवतु में क् और उ। शतृ में श् और ऋ। अतः क्तवतु को कित् कहेंगे, शतृ को शित्।

(११) अनुवृत्ति—पाणिनि के सूत्रों में पहले के सूत्रों से कुछ या पूरा अंश अगले सूत्रों में आता है, इसे अनुवृत्ति कहते हैं। पूर्व सूत्र के इस अंश को लेने पर ही अगले सूत्र का अर्थ पूरा होता है। कुछ अधिकार-सूत्र होते हैं, उनकी पूरे प्रकरण में अनुवृत्ति होती है। जैसे—प्राग्दीव्यतोऽण् (४।१।८३), तस्यापत्यम् (४।१।९२)।

(१२) अन्तरङ्ग—मुख्य कार्य। धातु और उपसर्ग का कार्य अन्तरङ्ग अर्थात् मुख्य होता है। (१३) अन्तस्थ—(यरलवा अन्तस्थाः) य र ल व को अन्तस्थ कहते हैं।

(१४) अन्वादेश—(किंचित्कार्यं विधातुमुपात्तस्य कार्यान्तरं विधातुं पुनरुपादानमन्वादेशः) पूर्वोक्त व्यक्ति आदि के पुनः किसी काम के लिए उल्लेख करने को अन्वादेश कहते हैं। जैसे—अनेन व्याकरणमधीतम्, एनं छन्दोऽध्यापय।

(१५) अपवाद—विशेष नियम। यह उत्सर्ग (सामान्य) नियम का बाधक होता है।

(१६) अपृक्त—(अपृक्त एकाल्प्रत्ययः, १।२।४१) एक अल् (स्वर या व्यंजन) मात्र शेष प्रत्यय को अपृक्त कहते हैं। जैसे—सु का स्, ति का त्, सि का स्।

(१७) अभ्यास—(पूर्वोऽभ्यासः, ६।१।४) लिट् लकार आदि में धातु को द्वित्व होने पर पहले आधे भाग को अभ्यास कहते हैं। जैसे—चकार में च, ददर्श में द।

(१८) अलुक्—विभक्ति आदि का लोप न होना। अलुक्समास में बीच की विभक्तियों का लोप नहीं होता है। जैसे—आत्मनेपदम्, परस्मैपदम्, सरसिजम्।

(१९) अल्पप्राण—(वर्गाणां प्रथमतृतीयपंचमा यरलवाश्चाल्पप्राणाः) वर्गों के प्रथम, तृतीय और पंचम अक्षर तथा य र ल व अल्पप्राण कहे जाते हैं। जैसे—कवर्ग में क ग ङ।

(२०) अवग्रह—(सूत्रेण विधीयमानकार्यस्य बोधकं चिह्नम्) सूत्र से किये गए कार्य के बोधक चिह्न को अवग्रह कहते हैं। ऽ = अ। ऽ यह संकेत अ हटा है, इसका बोधक है।

(२१) अव्यय—(स्वरादिनिपातमव्ययम्, १।१।३७) स्वर् आदि शब्द तथा सभी निपात अव्यय होते हैं। अव्यय वे हैं, जिनके रूप में कभी परिवर्तन या अन्तर नहीं होता।

(२२) अष्टाध्यायी—पाणिनि के व्याकरण-ग्रन्थ को अष्टाध्यायी कहते हैं। इसमें आठ अध्याय हैं, अतः अष्टाध्यायी नाम पड़ा। प्रत्येक अध्याय में ४ पाद हैं और प्रत्येक पाद में कुछ सूत्र। सूत्रों के आगे निर्दिष्ट संख्याओं का क्रमशः यह भाव है—(१) अध्याय की संख्या, (२) पाद की संख्या, (३) सूत्र की संख्या। यथा—१।१।१, अध्याय १, पाद १ का पहला सूत्र।

(२३) असिद्ध—(पूर्वत्रासिद्धम्, ८।२।१) किसी विशेष नियम की दृष्टि में किसी नियम या कार्य को न हुआ-सा समझना। जैसे—सवा सात अध्यायों की दृष्टि में अन्तिम तीन पाद असिद्ध हैं।

(२४) आख्यात—धातु और क्रिया को आख्यात कहते हैं। 'नामाख्यातोपसर्गनिपाताश्च'। (२५) आगम—शब्द या धातु के बीच में जो अक्षर या वर्ण और जुड़ जाते हैं, उन्हें आगम कहते हैं। जैसे—पयस् > पयांसि में न् का बीच में आगम है।

(२६) **आत्मनेपद**—(तङानावात्मनेपदम्, १।४।१००) तङ् (ते, एते, अन्ते आदि), शानच्, कानच्, ये आत्मनेपद होते हैं। जिन धातुओं के अन्त में ते एते अन्ते आदि लगते हैं, वे धातुएँ आत्मनेपदी कहाती हैं। जैसे—सेव् धातु। सेवते सेवेते०।

(२७) **आदेश**—किसी वर्ण या प्रत्यय आदि के स्थान पर कुछ नए प्रत्यय आदि के होने को आदेश कहते हैं। जैसे—आदाय में क्त्वा को ल्यप् आदेश। रमेशः में आ+ई को ए गुण। (२८) **आमन्त्रित**—(सामन्त्रितम्, २।३।४८) संबोधन को आमन्त्रित कहते हैं। हे अग्ने!

(२९) **आम्रेडित**—(तस्य परमाम्रेडितम्, ८।१।२) द्विरुक्तिवाले स्थानों पर उत्तरार्ध को आम्रेडित कहते हैं। जैसे—कान्+कान्=कांस्कान्, में बाद वाला कान्।

(३०) **आर्धधातुक**—(आर्धधातुकं शेषः, ३।४।११४) तिङ् (ति तः अन्ति आदि और ते एते अन्ते आदि) और शित् (शतृ आदि) से अतिरिक्त धातुओं से जुड़नेवाले प्रत्यय आर्धधातुक कहे जाते हैं। (लिट् च, ३।४।११५) लिट् के स्थान पर होनेवाले तिङ् भी आर्धधातुक होते हैं।

(३१) **इट्**—(आर्धधातुकस्येड्वलादेः, ७।२।३५) इट् का इ शेष रहता है। यह धातु और प्रत्यय के बीच में होता है। वलादि आर्धधातुक को इट् (इ) होता है। जैसे—पठिष्यति, पठितुम्। इस इट् (इ) के आधार पर ही धातुएँ सेट् या अनिट् कही जाती हैं। जिन धातुओं में साधारणतया इट् (इ) होता है, उन्हें सेट् (स+इट्) अर्थात् 'इ' वाली धातुएँ कहते हैं। जिनमें इट् (इ) नहीं होता, उन्हें अनिट् (न+इट्) कहते हैं।

(३२) **इत्**—(तस्य लोपः, १।३।९) जिसको इत् कहेंगे, उसका लोप हो जाएगा। अनुबन्धों को इत् कहते हैं। गुण आदि के लिए प्रत्ययों के आदि या अन्त में ये लगे होते हैं। बाद में ये हट जाते हैं। जैसे—शतृ में श् और ऋ। शतृ में श् हटा है, अतः इसे शित् कहेंगे। जो अक्षर हटा होगा, उसके आधार पर प्रत्यय कित् (क्+इत्), पित् (प्+इत्) आदि कहे जाते हैं। इत् होने वाले अक्षर ये हैं—(१) हलन्त्यम् (१।३।३) अन्तिम व्यंजन इत् होता है। (२) उपदेशेऽजनुनासिक इत् (१।३।२) उच्चारण में अनुनासिक-संकेत वाला स्वर। (३) चुटू (१।३।७) प्रत्यय के आदि के चवर्ग और टवर्ग। (४) लशक्वतद्धिते (१।३।८) तद्धित-प्रकरण को छोड़कर प्रत्यय के आदि के ल श और कवर्ग। (५) षः प्रत्ययस्य (१।३।६) प्रत्यय के आदि का ष्। इत्यादि।

(३३) **उणादि**—(उणादयो बहुलम्, ३।३।१) धातुओं से उण् आदि प्रत्यय होते हैं। इस उण् प्रत्यय के आधार पर व्याकरण में इस प्रकरण को उणादि-प्रकरण कहते हैं।

(३४) **उत्सर्ग**—साधारण नियमों को उत्सर्ग कहते हैं। विशेष को अपवाद।

(३५) **उदात्त**—(उच्चैरुदात्तः, १।२।२९) जिस स्वर को उच्च ध्वनि से बोला जाता है या जिस स्वर पर बल दिया जाता है, उसे उदात्त कहते हैं।

(३६) (क) **उपपद-विभक्ति**—किसी पद (शब्द) को मानकर जो विभक्ति होती है, उसे उपपद-विभक्ति कहते हैं। जैसे—गुरवे नमः में नमः पद के कारण चतुर्थी है। (ख) **कारक-विभक्ति**—क्रिया को मानकर जो विभक्ति होती है, उसे कारक-विभक्ति कहते हैं। जैसे—पाठं पठति में पठति क्रिया के आधार पर द्वितीया विभक्ति है।

(३७) **उपधा**—(अलोऽन्त्यात् पूर्व उपधा, १।१।६५) अन्तिम अल् (स्वर या व्यंजन) से पहले आने वाले वर्ण को उपधा कहते हैं। जैसे—लिख् धातु में उपधा में इ है।

(३८) **उपध्मानीय**—(कुप्वोः ≍क ≍पौ च, ८।३।३७) प फ से पहले ≍ अर्धविसर्ग के तुल्य ध्वनि को उपध्मानीय कहते हैं। जैसे—नॄं ≍पाहि। यह विसर्ग के स्थान पर होता है।

(३९) **उपसर्ग**—(उपसर्गाः क्रियायोगे, १।४।५९) धातु या क्रिया से पहले लगने वाले प्र परा आदि को उपसर्ग कहते हैं। ये २२ हैं—प्र परा अप सम् अनु अव निस् निर् दुस् दुर् वि आङ् नि अधि अपि अति सु उत् अभि प्रति परि उप।

(४०) **उभयपद**—परस्मैपद (ति, तः आदि), और आत्मनेपद (ते, एते, आदि) इन दोनों पदों के चिह्नों का लगना। जिन धातुओं में ये चिह्न लगते हैं, उन्हें उभयपदी कहते हैं। (४१) **ऊष्म**—(शषसहा ऊष्माणः) श ष स ह को ऊष्म वर्ण कहते हैं।

(४२) **ओष्ठ्य**—(उपूपध्मानीयानामोष्ठौ) उ ऊ, पवर्ग और उपध्मानीय इनका उच्चारण स्थान ओष्ठ है, अतः ये ओष्ठ्य वर्ण कहलाते हैं।

(४३) **कण्ठ्य**—(अकुहविसर्जनीयानां कण्ठः) अ आ, कवर्ग, ह और विसर्ग (:) इनका उच्चारण-स्थान कण्ठ है, अतः ये कण्ठ्य वर्ण कहलाते हैं।

(४४) **कर्मप्रवचनीय**—(कर्मप्रवचनीयाः, १।४।८३) अनु, उप, प्रति, परि आदि उपसर्ग कुछ अर्थों में कर्मप्रवचनीय होते हैं। इनके साथ द्वितीया आदि होती हैं।

(४५) **कारक**—प्रथमा, द्वितीया आदि को कारक या विभक्ति कहते हैं।

(४६) **कृत्**—(कर्तरि कृत्, ३।४।६७) धातु से होने वाले क्त क्तवतु शतृ शानच् आदि को कृत् प्रत्यय कहते हैं। क्त और खल् को छोड़कर शेष कृत् प्रत्यय कर्तृवाच्य में होते हैं।

(४७) **कृत्य**—(तयोरेव कृत्यक्तखलर्थाः, ३।४।७०) धातु से होने वाले तव्य, अनीय, य आदि को कृत्य प्रत्यय कहते हैं। ये भाव और कर्म वाच्य में होते हैं।

(४८) **कृदन्त**—जिन शब्दों के अन्त में कृत् प्रत्यय लगे होते हैं, उन्हें कृदन्त कहते हैं। (४९) **क्रिया**—धातुरूपों को क्रिया कहते हैं। जैसे—पचनम्, पठनम्।

(५०) **गण**—धातुओं को १० भागों में बाँटा गया है, उन्हें गण कहते हैं। भ्वादिगण आदि।

(५१) **गणपाठ**—कतिपय शब्दों से एक ही प्रत्यय लगता है। ऐसे शब्दों को एक गण (समूह) में रक्खा गया है। ऐसे शब्द-संग्रह को गणपाठ कहते हैं। जैसे—नद्यादिभ्यो ढक् (४।२।९७)।

(५२) **गति**—(गतिश्च, १।४।६०) उपसर्गों को गति कहते हैं। कुछ अन्य शब्द भी गति हैं।

(५३) **गुण**—(अदेङ् गुणः, १।१।२) अ, ए, ओ को गुण कहते हैं। गुण कहने पर ऋ ॠ को अर्, इ ई को ए, उ, ऊ को ओ हो जाता है।

(५४) **गुरु**—(संयोगे गुरु, १।४।११; दीर्घं च, १।४।१२) संयुक्त वर्ण बाद में हो तो ह्रस्व वर्ण गुरु होता है। सभी दीर्घ अक्षर गुरु होते हैं।

(५५) **घ**—(तरप्तमपौ घः, १।१।२२) तरप् और तमप् प्रत्ययों को घ कहते हैं।

(५६) घि—(शेषो घ्यसखि, १।४।७) ह्रस्व इ और उ अन्त वाले शब्द घि कहलाते हैं, स्त्रीलिंग शब्दों और सखि शब्द को छोड़कर।

(५७) घु—(दाधा घ्वदाप्, १।१।२०) दा और धा धातु को घु कहते हैं, दाप् को नहीं। **(५८) घोष**—हश् प्रत्याहार अर्थात् वर्ग के तृतीय चतुर्थ पंचम वर्ण और ह य व र ल घोष हैं।

(५९) जिह्वामूलीय—(कुप्वोः ≍ क ≍ पौ च, ८।३।३७) क ख से पहले ≍ अर्ध विसर्ग के तुल्य ध्वनि को जिह्वामूलीय कहते हैं। क ≍ करोति। यह विसर्ग के स्थान पर होता है। **(६०) टि**—(अचोऽन्त्यादि टि, १।१।६४) शब्द के अन्तिम ओर से जहाँ स्वर मिले, वह स्वर और आगे व्यंजन यदि हो तो वह टि कहलाता है। जैसे—मनस् में अस्, धनुष् में उष् टि है।

(६१) तपर—(तपरस्तत्कालस्य, १।१।७०) किसी स्वर के बाद त् लगा देने से उसी स्वर का ग्रहण होगा, अन्य दीर्घ आदि का नहीं। जैसे—अत् का अर्थ है ह्रस्व अ। आत् दीर्घ आ। **(६२) तद्धित**—शब्दों से पुत्र आदि अर्थों में होने वाले प्रत्ययों को तद्धित प्रत्यय कहते हैं। **(६३) तालव्य**—(इचुयशानां तालु) इ ई, चवर्ग, य, श का उच्चारण-स्थान तालु है, अतः इन्हें तालव्य वर्ण कहते हैं।

(६४) तिङ्—धातु के बाद लगने वाले ति तः आदि और ते एते आदि को तिङ् कहते हैं। **(६५) तिङन्त**—ति तः आदि से युक्त पठति आदि धातुरूपों को तिङन्त पद कहते हैं।

(६६) दन्त्य—(लृतुलसानां दन्ताः) लृ, तवर्ग, ल, स का उच्चारण-स्थान दन्त है, अतः इन्हें दन्त्य वर्ण कहते हैं।

(६७) दीर्घ—आ ई ऊ ॠ को दीर्घ स्वर कहते हैं। दीर्घ कहने पर ह्रस्व के स्थान पर ये होते हैं। **(६८) द्वित्व**—किसी वर्ण या वर्णसमूह को दो बार पढ़ने को द्वित्व कहते हैं। पपाठ में पठ् को द्वित्व है।

(६९) द्विरुक्ति—किसी शब्दरूप या धातुरूप को दो बार पढ़ना। स्मारं स्मारं, स्मृत्वा स्मृत्वा। **(७०) धातु**—भू पठ् कृ आदि क्रियावाचक शब्दों को धातु कहते हैं।

(७१) धातुपाठ—भू आदि धातुओं को १० गणों के अनुसार संग्रह किया गया है। इस धातु-संग्रह को धातुपाठ कहा जाता है। इसमें धातुओं के साथ उनके अर्थ आदि भी दिए गए हैं।

(७२) नदी—(१) (यू स्त्र्याख्यौ नदी, १।४।३) दीर्घ ईकारान्त ऊकारान्त स्त्रीलिंग शब्द नदी कहलाते हैं। (२) (ङिति ह्रस्वश्च, १।४।६) इकारान्त उकारान्त स्त्रीलिंग शब्द भी नदी कहलाते हैं, ङित् विभक्तियों में।

(७३) नपुंसकलिंग—यह तीन लिंगों में से एक लिंग है। फल, वारि, मधु आदि नपुं० शब्द हैं। **(७४) नाद**—हश् प्रत्याहार (वर्ग के तृतीय चतुर्थ पंचम वर्ण, ह य व र ल) नाद वर्ण हैं। **(७५) नाम**—संज्ञा शब्दों को नाम कहते हैं। 'नामाख्यातोपसर्गनिपाताश्च' निरुक्त।

(७६) निपात—(चादयोऽसत्त्वे, १।४।५७) च वा ह आदि को निपात कहते हैं। (स्वरादिनिपातमव्ययम्) सभी निपात अव्यय होते हैं, अतः ये सदा एकरूप रहते हैं।

(७७) निष्ठा—(क्तक्तवतू निष्ठा, १।१।२६) क्त और क्तवतु प्रत्ययों को निष्ठा कहते हैं।

(७८) पद—(१) (सुप्तिङन्तं पदम्, १।४।१४) सुप् (: औ अः आदि) से युक्त शब्दों और तिङ् (ति तः अन्ति आदि) से युक्त धातुरूपों को पद कहते हैं। जैसे—रामः, पठति। (२) स्वादिष्वसर्वनामस्थाने, १।४।१७) सु (स्) आदि प्रत्यय बाद में हों तो शब्द को पद कहते हैं, ये प्रत्यय बाद में होंगे तो नहीं—सु आदि प्रथम पाँच सुप्, यकारादि और स्वर आदि वाले प्रत्यय।

(७९) पदान्त—नियम ७८ में उक्त पद के अन्तिम अक्षर को पदान्त कहते हैं।

(८०) पररूप—(एङि पररूपम्, ६।१।९४) सन्धि-नियमों में दो स्वरों को मिलाने पर अगले स्वर के तुल्य रूप रह जाने को पररूप कहते हैं। जैसे—प्र+एजते = प्रेजते।

(८१) परस्मैपद—(लः परस्मैपदम्, १।४।९९) लकारों के स्थान पर होने-वाले ति, तः, अन्ति आदि प्रत्ययों को परस्मैपद कहते हैं। ये जिनके अन्त में लगते हैं, उन्हें परस्मैपदी धातु कहते हैं। ते, एते, अन्ते आदि को आत्मनेपद कहते हैं। शतृ प्रत्यय परस्मैपद में होता है।

(८२) परिभाषा—व्याकरण-सम्बन्धी कुछ विशेष नियमों को परिभाषा कहते हैं।

(८३) पुंलिंग—यह तीन लिंगों में से एक है। जैसे—रामः, हरिः।

(८४) पूर्वरूप—(एङः पदान्तादति, ६।१।१०९) सन्धि-नियमों में दो स्वरों को मिलाने पर पहले स्वर के तुल्य रूप रह जाने को पूर्वरूप कहते हैं। जैसे—हरे+अव=हरेऽव।

(८५) (क) प्रकृति—शब्द या धातु जिससे कोई प्रत्यय होता है, उसे प्रकृति कहते हैं। इसका दूसरा पारिभाषिक नाम 'अंग' है। जैसे—रामः में राम प्रकृति है और पठति में पठ्। (ख) प्रकृति-विकृति—शब्द या धातु के मूलरूप के स्थान पर जो नया आदेश होता है, उसे प्रकृति-विकृति या विकार-भाव कहते हैं। जैसे—उवाच में प्रकृति ब्रू धातु है, उसको विकृति विकार या आदेश वच् हुआ है। यह पूरे शब्द या धातु को भी होता है और कहीं पर उसके एक अंश को।

(८६) प्रकृतिभाव—(प्लुतप्रगृह्या अचि नित्यम्, ६।१।१२५) प्रकृतिभाव का अर्थ है कि वहाँ पर कोई सन्धि नहीं होती। प्लुत और प्रगृह्य वाले स्थानों पर प्रकृतिभाव होता है।

(८७) प्रगृह्य—(१) (ईदूदेद्द्विवचनं प्रगृह्यम्, १।१।११) प्रगृह्य वाले स्थान पर कोई सन्धि नहीं होती। ई, ऊ, ए अन्त वाले द्विवचनान्त रूप प्रगृह्य होते हैं, अतः सन्धि नहीं होगी। जैसे—हरी एतौ। (२) (अदसो मात्, १।१।१२) अदस् के म् के बाद ई, ऊ होंगे तो कोई सन्धि नहीं होगी। जैसे—अमी ईशाः। अमू आसाते।

(८८) प्रत्यय—(प्रत्ययः, ३।१।१) शब्दों और धातुओं के बाद लगने वाले सुप्, तिङ्, कृत्, तद्धित आदि को प्रत्यय कहते हैं। कुछ प्रत्यय पहले (बहुच् आदि) और बीच में (अकच् आदि) भी लगते हैं। बहुपटुः। उच्चकैः। प्रत्ययों में विशेष कार्य के लिए अनुबन्ध भी लगे होते हैं।

(८९) प्रत्याहार—(आदिरन्त्येन सहेता, १।१।७१) प्रत्याहार का अर्थ है संक्षेप में कथन। अच्, हल्, सुप्, तिङ् आदि प्रत्याहार हैं। अच्, हल् आदि के लिए पहला अक्षर अइउण् आदि १४ सूत्रों में ढूँढ़ें और अन्तिम अक्षर उन सूत्रों के अन्तिम अक्षर में। जैसे—अच् = अइउण् के अ से लेकर ऐऔच् के च् तक, पूरे स्वर। सुप् = सु से सुप् के प् तक। तिङ् = तिप् से महिङ् तक।

(९०) प्रयत्न—वर्णों के उच्चारण में जो प्रयत्न किया जाता है, उसे प्रयत्न कहते हैं। यह दो प्रकार का है—आभ्यन्तर और बाह्य। आभ्यन्तर चार प्रकार का है—स्पृष्ट, ईषत्-स्पृष्ट आदि। बाह्य ११ प्रकार का है—विवार, संवार आदि। (देखो सिद्धान्तकौमुदी संज्ञाप्रकरण)

(९१) प्रातिपदिक—(१) (अर्थवदधातुरप्रत्ययः प्रातिपदिकम्, १।२।४५) सार्थक शब्द को प्रातिपदिक कहते हैं। यही विभक्ति (सु आदि) लगने पर पद बनता है। (२) (कृत्तद्धितसमासाश्च, १।२।४६) कृत् और तद्धित प्रत्ययान्त तथा समास-युक्त शब्द भी प्रातिपदिक होते हैं।

(९२) प्रेरणार्थक—दूसरे से काम कराना। जैसे—लिखना से लिखवाना। इस अर्थ में णिच् होता है। **(९३) प्लुत**—ह्रस्व स्वर से तिगुनी मात्रा। अक्षर के आगे ३ लिखकर इसका संकेत करते हैं। देवदत्त३।

(९४) बहिरङ्ग—गौण नियम। धातु और उपसर्ग का कार्य अन्तरङ्ग होता है, शेष बहिरङ्ग। **(९५) बहुलम्**—विकल्प या ऐच्छिक नियम को बहुलम् कहते हैं।

(९६) भ—(यचि भम्, १।४।१८) यकारादि और स्वर-आदि वाला प्रत्यय बाद में हो तो उससे पहले के शब्द को भ कहते हैं, सु औ आदि प्रथम पाँच सुप् बाद में हों तो नहीं। **(९७) भाष्य**—पतंजलि-रचित महाभाष्य को संक्षेप में भाष्य कहते हैं।

(९८) मत्वर्थक प्रत्यय—मतुप् प्रत्यय 'वाला' या 'युक्त' अर्थ में होता है। इस अर्थ में होनेवाले सभी प्रत्ययों को मत्वर्थक प्रत्यय कहते हैं। जैसे—धनवान्, धनी।

(९९) महाप्राण—(द्वितीयचतुर्थौ शलश्च महाप्राणाः) वर्गों के द्वितीय और चतुर्थ अक्षर तथा श ष स ह महाप्राण वर्ण कहलाते हैं। जैसे—ख घ, छ झ, ठ ढ।

(१००) मात्रा—स्वरों के परिमाण को मात्रा कहते हैं। ह्रस्व या लघु अक्षर की एक मात्रा मानी जाती है, दीर्घ या गुरु की दो, प्लुत की तीन।

(१०१) मुनित्रय—(यथोत्तरं मुनीनां प्रामाण्यम्) पाणिनि, कात्यायन, पतंजलि इन तीनों को मुनित्रय कहते हैं। मतभेद होने पर बाद वाले मुनि का कथन प्रामाणिक माना जाता है।

(१०२) मूर्धन्य—(ऋटुरषाणां मूर्धा) ऋ ॠ, टवर्ग, र, ष का उच्चारण-स्थान मूर्धा है, अतः इन्हें मूर्धन्य कहते हैं।

(१०३) योगरूढ—योगरूढ उन शब्दों को कहते हैं, जिनमें यौगिक अर्थात् प्रकृति-प्रत्यय का अर्थ निकलता है, परन्तु वे किसी विशेष अर्थ में रूढ या प्रचलित हो गए हैं। जैसे—पंकज का अर्थ है—कीचड़ में होने वाला। पर यह कमल अर्थ में रूढ है।

(१०४) योगविभाग—पाणिनि के सूत्रों को कात्यायन आदि ने आवश्यकतानुसार विभक्त करके एक सूत्र (योग) के दो या तीन सूत्र बनाए हैं, इस सूत्र-विभाजन को योगविभाग कहते हैं।

(१०५) यौगिक—यौगिक उन शब्दों को कहते हैं, जिनमें प्रकृति और प्रत्यय का अर्थ निकलता है। जैसे—पाचकः-पच्+अकः, पकाने वाला।

(१०६) रूढ—रूढ उन शब्दों को कहते हैं, जिनमें प्रकृति और प्रत्यय का अर्थ नहीं निकलता है। जैसे—मणि, नूपुर आदि।

(१०७) **लघु**—(ह्रस्वं लघु, १।४।११) ह्रस्व अ इ उ ऋ को लघु वर्ण कहते हैं।

(१०८) **लिंग**—संस्कृत में तीन लिंग हैं—पुंलिंग, स्त्रीलिंग, नपुंसकलिंग।

(१०९) **लुक्**—(प्रत्ययस्य लुक्श्लुलुपः, १।१।६१) प्रत्यय के लोप का ही दूसरा नाम लुक् है। (११०) **लुप् (श्लु)**—(प्रत्ययस्य लुक्श्लुलुपः) प्रत्यय के लोप को लुप् और श्लु भी कहते हैं। (१११) **लोप**—(अदर्शनं लोपः, १।१।६०) प्रत्यय आदि के हट जाने को लोप कहते हैं।

(११२) **वचन**—संस्कृत में तीन वचन होते हैं—एकवचन, द्विवचन, बहुवचन। एक के लिए एकवचन, दो के लिए द्विवचन, तीन या अधिक के लिए बहुवचन।

(११३) **वर्ग**—व्यंजनों के कुछ विभागों को वर्ग कहते हैं। जैसे–कवर्ग—क से ङ तक, चवर्ग—च से ञ तक, टवर्ग—ट से ण, तवर्ग—त से न, पवर्ग—प से म तक।

(११४) **वर्ण**—अक्षरों को वर्ण भी कहते हैं। स्वर और व्यंजन ये सभी वर्ण हैं।

(११५) **वाक्य**—सार्थक पदों के समूह को वाक्य कहते हैं।

(११६) **वाच्य**—संस्कृत में ३ वाच्य (अर्थ) होते हैं—१. कर्तृवाच्य, २. कर्मवाच्य, ३. भाववाच्य। सकर्मक धातुओं के कर्तृवाच्य और कर्मवाच्य में रूप चलते हैं तथा अकर्मक धातुओं के कर्तृवाच्य और भाववाच्य में। कर्तृवाच्य में कर्ता मुख्य होता है, कर्मवाच्य में कर्म और भाववाच्य में क्रिया।

(११७) **वार्तिक**—कात्यायन और पतंजलि के द्वारा बनाए गए नियमों को वार्तिक कहते हैं। (११८) **विकल्प**—ऐच्छिक नियम को विकल्प कहते हैं।

(११९) **विभक्ति**—(विभक्तिश्च, १।४।१०४) सु औ आदि कारक-चिह्नों को विभक्ति या कारक कहते हैं। संबोधन-सहित ८ विभक्तियाँ हैं—प्रथमा, द्वितीया आदि।

(१२०) **विभाषा**—(न वेति विभाषा, १।१।४४) किसी नियम को ऐच्छिक या विकल्प से लगने को विभाषा कहते हैं। इसी अर्थ में वा, अन्यतरस्याम्, शब्द आते हैं।

(१२१) **विवार**—वर्गों के प्रथम द्वितीय अक्षर (क ख, च छ, ट ठ, त थ, प फ), विसर्ग, श ष स, ये विवार वर्ण हैं। इनके उच्चारण में मुख-द्वार खुला रहता है।

(१२२) **विवृत**—(विवृतमूष्मणां स्वराणां च) स्वरों और ऊष्मों (श ष स ह) का आभ्यन्तर प्रयत्न विवृत है। इनके उच्चारण में मुख-द्वार खुला रहता है।

(१२३) **विशेषण**—विशेष्य (व्यक्ति या वस्तु आदि) की विशेषता बताने वाले गुणबोधक शब्दों को विशेषण कहते हैं। विशेषण को भेदक भी कहते हैं।

(१२४) **विशेष्य**—जिस (व्यक्ति या वस्तु आदि) की विशेषता बताई जाती है, उसे विशेष्य कहते हैं। विशेष्य को भेद्य भी कहते हैं।

(१२५) **वीप्सा**—द्विरुक्ति अर्थात् दो बार पढ़ने को वीप्सा कहते हैं। जैसे—स्मृत्वा, स्मृत्वा, स्मारं स्मारम्।

(१२६) **वृत्ति**—(१) सूत्रों की व्याख्या को वृत्ति कहते हैं। (२)(परार्थाभिधानं वृत्तिः) कृत्, तद्धित, समास, एकशेष, सन् आदि से युक्त धातुरूपों को वृत्ति कहते हैं।

(१२७) **वृद्धि**—(वृद्धिरादैच्, १।१।१) आ, ऐ, औ को वृद्धि कहते हैं। वृद्धि कहने पर इ ई को ऐ होगा, उ ऊ को औ, ऋ ॠ को आर्, ए को ऐ और ओ को औ।

(१२८) **व्यंजन**—क से लेकर ह् तक के वर्णों को व्यंजन या हल् कहते हैं।

(१२९) **व्यधिकरण**—एक से अधिक आधार या शब्दादि में होने वाले कार्य को व्यधिकरण कहते हैं। वि = विभिन्न, अधिकरण = आधार। एक आधार वाला समानाधिकरण होता है।

(१३०) **शब्द**—सार्थक वर्ण या वर्णसमूह को शब्द या प्रातिपदिक कहते हैं।

(१३१) **शिक्षा**—वर्णों के उच्चारण आदि की शिक्षा देने वाले ग्रन्थों को शिक्षा कहते हैं। जैसे—पाणिनीयशिक्षा आदि ग्रन्थ। वैदिक शिक्षा और व्याकरण-ग्रन्थों को प्रातिशाख्य कहते हैं। (१३२) **श्लु**—प्रत्यय के लोप का ही एक नाम श्लु है। जुहोत्यादि० में श्लु होने पर गुण होता है।

(१३३) **श्वास**—वर्गों के प्रथम द्वितीय अक्षर (क ख, च छ, ट ठ, त थ, प फ), विसर्ग, श ष स, ये श्वास वर्ण हैं। इनके उच्चारण में श्वास बिना रगड़ खाए बाहर आता है। (१३४) **षट्**—(ष्णान्ताः षट्, १।१।२४) ष् और न् अन्त वाली संख्याओं को षट् कहते हैं।

(१३५) **संज्ञा**—व्यक्ति या वस्तु आदि के नाम को संज्ञा शब्द कहते हैं।

(१३६) **संयोग**—(हलोऽनन्तराः संयोगः, १।१।७) व्यंजनों के बीच में स्वर वर्ण न हों तो उन्हें संयुक्त अक्षर कहते हैं। जैसे—सम्बद्ध में म् और ब, द् और ध।

(१३७) **संवार**—हश् प्रत्याहार (वर्ग के तृतीय चतुर्थ पंचम वर्ण, ह य व र ल) संवार वर्ण हैं। इनके उच्चारण में मुख-द्वार कुछ संकुचित (सिकुड़ा) रहता है।

(१३८) **संवृत**—ह्रस्व अ बोलचाल में संवृत (मुख-द्वार संकुचित) होता है।

(१३९) **संहिता**-(परः संनिकर्षः संहिता, १।४।१०९) वर्णों की अत्यन्त समीपता को संहिता कहते हैं। संहिता की अवस्था में सभी सन्धि-नियम लगते हैं। एक पद में, धातु और उपसर्ग में, समासयुक्त पद में संहिता अवश्य होगी। वाक्य में संहिता ऐच्छिक है।

(१४०) **सकर्मक**—जिन धातुओं के साथ कर्म आता है, उन्हें सकर्मक धातु कहते हैं। (१४१) **सत्**—(तौ सत्, ३।२।१२७) शतृ और शानच् प्रत्ययों को सत् कहते हैं। (१४२) **सन्**—(धातोः कर्मणः० ३।१।७) इच्छा अर्थ में धातु से सन् प्रत्यय होता है। कृ > चिकीर्षति।

(१४३) **सन्धि**—स्वरों, व्यंजनों या विसर्ग के परस्पर मिलाने को सन्धि कहते हैं। (१४४) **समानाधिकरण**—एक आधार को समानाधिकरण कहते हैं।

(१४५) **समास**—समास का अर्थ है संक्षेप। दो या अधिक शब्दों को मिलाने या जोड़ने को समास कहते हैं। समास होने पर शब्दों के बीच की विभक्ति हट जाती है। समासयुक्त शब्द को समस्त पद कहते हैं। समस्त शब्द एक शब्द होता है। समास के ६ भेद हैं—१. अव्ययीभाव, २. तत्पुरुष, ३. कर्मधारय, ४. द्विगु, ५. बहुव्रीहि, ६. द्वन्द्व।

(१४६) **समासान्त**—समासयुक्त शब्द के अन्त में होने वाले कार्यों को समासान्त कहते हैं। (१४७) **समाहार**—समाहार का अर्थ है समूह। समाहार द्वन्द्व में प्रायः नपुं० एकवचन होता है। कभी स्त्रीलिंग भी होता है।

(१४८) **सम्प्रसारण**—(इग्यणः सम्प्रसारणम्, १।१।४५) य् को इ, व् को उ, र् को ऋ, ल् को ऌ हो जाने को सम्प्रसारण कहते हैं। सम्प्रसारण कहने पर ये कार्य होंगे।

(१४९) **सर्वनाम**—(सर्वादीनि सर्वनामानि, १।१।२७) सर्व, यत्, तत्, किम्, युष्मद्, अस्मद् आदि शब्दों को सर्वनाम कहते हैं। इनका सम्बोधन नहीं होता।

(१५०) **सर्वनामस्थान**—(सुडनपुंसकस्य, १।१।४३) प्रथमा और द्वितीया विभक्ति के पहले पाँच सुप् (कारकचिह्न, स् औ अः, अम् औ) को सर्वनामस्थान कहते हैं, नपुं० में नहीं।

(१५१) **सवर्ण**—(तुल्यास्यप्रयत्नं सवर्णम्, १।१।९) जिन वर्णों का स्थान और प्रयत्न मिलता है, उन्हें सवर्ण कहते हैं। जैसे—इ चवर्ग य श तालव्य हैं, अतः सवर्ण हैं।

(१५२) **सार्वधातुक**—(तिङ् शित्सार्वधातुकम्, ३।४।११३) धातुके बाद जुड़ने वाले तिङ् (ति तः आदि) और शित् प्रत्यय (शतृ आदि) सार्वधातुक कहलाते हैं। शेष आर्धधातुक होते हैं।

(१५३) **सुप्**—(स्वौजस''सुप्, ४।१।२) शब्दों के अन्त में लगने वाले प्रथमा से सप्तमी तक के कारक-चिह्न (स् औ अः आदि) सुप् कहलाते हैं।

(१५४) **सुबन्त**—सुप् (स् औ आदि) जिन शब्दों के अन्त में होते हैं, उन्हें सुबन्त कहते हैं।

(१५५) **सूत्र**—पाणिनि-रचित नियमों को सूत्र कहते हैं। इनके बाद निर्दिष्ट संख्याओं का क्रमशः भाव यह है—१. अध्याय-संख्या, २. पाद-संख्या, ३. सूत्र-संख्या।

